व्यासजीने जैसा समाधिकी अवस्थामें देखा, वैसे ही अक्षरशः भागवतको प्रकट किया. ''श्रीमद् भागवतके रूपमें आप साक्षात् कृष्ण ही है'' ऐसा पद्म-पुराणमें स्पष्ट ही है. ज्ञानावतार बादरायण व्यासजीने भागवतजीकी रचना की तथा उसमें भगवानकी सर्ग विसर्ग स्थान पोषण ऊति मन्वन्तर ईशानुकथा निरोध मुक्ति तथा आश्रय -ऐसी दशविध लीलाओंका निरूपण किया.(२३-२४)

भगवान् ब्रह्मणे देवर्षये स मुनये च सः।

प्राकाशयद् इदं व्यासः प्रादुश्चक्रे शुकादिभिः ।।२५।।

भगवानने ब्रह्माजीको, ब्रह्माजीने नारदजीको, नारदजीने व्यासजीको भागवतका ज्ञान कहा. अंततः व्यासजीने इस श्रीमद्भागवतका प्रकाश किया तथा शुकदेवजी आदि द्वारा इस शास्त्रको प्रकट किया. (२५)

[१]''कस्मै येने'त्यादि तत्रानेकत्रैतत् प्रदृश्यते।

अन्यत् स्मृतिपुराणाद्यप्यासीत् तादृग् हरीच्छया ।।२६।।

१.श्रीभागवतद्वादशस्कन्धे परम्परा इयं दर्शिता अन्यत्र च बहुषु स्थलेषु इति अर्थः. (१२।१३।१९)

'जिन्होनें ब्रह्माजीको कहा' इस वाक्यानुसार अनेक स्थानोंमें भागवतकी उत्पत्तिका प्रसंग श्रीमद्भागवतमें वर्णित हुआ है. अन्य स्मृति-पुराणादि भी भगवानकी कृपासे ऐसे ही प्रकट हुए हैं. (२६)

एवम् एतानि चत्वारि संशयघ्नानि च क्रमात्।

प्रकाशितानि हरिणा जीवानुग्रहकारिणा ।।२७।।

इस प्रकार वेद, गीता, ब्रह्मसूत्र तथा भागवत, क्रमशः संशयोंका नाश करनेवाले शास्त्र हैं, जिन्हें प्रभुने जीवों पर अनुग्रह करके प्रकट किया. (२७)

अनादित्वात् च भगवद्रूपत्वात् सर्वनिर्णये।
सर्वथैव प्रमाणं स्याद् एषाम् अक्षरम् अक्षरम्॥२८॥

ये सभी शास्त्र अनादि होनेसे तथा भगवद्रूप होनेसे प्रत्येक वस्तुका निर्णय करनेमें इन ग्रंथोंका प्रत्येक अक्षर प्रमाणस्वरूप है. (२८)

अन्यद् एभ्यो बहुतरम् अविरुद्धं प्रमापकम्।
विरोधीन्यप्रमाणानि मोहशास्त्राणि सृष्टये॥२९॥

इन शास्त्रोंसे विरुद्ध न हो ऐसे अन्य ग्रंथ भी प्रमाण है. परंतु इन शास्त्रोंसे विरुद्ध शास्त्र अप्रमाण हैं. विरुद्ध हों ऐसे सभी मोहशास्त्र सृष्टिक्रम (जन्म-मृत्यु) के लिए ही हैं. (२९)

[१]विरुद्धधर्माचिन्त्यं [२]तत् परोक्षं महद् अद्भुतम्।
अलौकिकेन शाब्देन ज्ञातुम् एतेन[३] शक्यते॥३०॥

१.'अणोरणीयान् महतो महीयान्' 'एकः सन् बहुधा विजायते' इत्यादि श्रुतिभिः 'सर्वतः पाणिपादं तत्' 'अनेक बाहूदर वक्त्रनेत्रं पश्यामि त्वां सर्वतो अनन्तरूपम्' इत्यादिस्मृतिभिः 'उभयव्यपदेशात् त्वहिकुण्डलवत्' 'श्रुतेस्तु शब्दमूलत्वाद्' इत्यादिसूत्रैश्च सिद्धान्तितम्. २.ब्रह्म. ३.'वेदाः श्रीकृष्ण' इत्यादि-पूर्वोक्तेन इति अर्थः.

एकदूसरेसे विरुद्ध ऐसे अनेक धर्मवाले, जिनका विचार न किया जा सके ऐसे, परोक्षस्वरूप, महान् तथा अद्भन्नत उन ब्रह्मका ज्ञान अलौकिक ऐसे शब्द प्रमाणसे ही हो सकता है. (३०)

यद्-यदिष्टं तु तत् सर्वं यद् वशे मृत्युरप्यसौ।
अवश्यमेव ज्ञातव्यं तद् दुःखातिनिवृत्तये॥३१॥

जो कुछ भी इष्ट है वो सभी कुछ उन्हीं का है कि जिनके वश मृत्यु भी है. मृत्युरूपी दुःखके सर्वथा नाश के लिए उन ब्रह्मका ज्ञान अवश्य प्राप्त करना चाहिए. (३१)

[१]लब्धवा सुदुर्लभम् इदं बहसम्भवान्ते
मानुष्यम् अर्थदम् अनित्यमपीह धीरः।

तूर्णं यतेत न पतेद् अनुमृत्यु यावद्

निःश्रेयसाय विषयः खलु सर्वतः स्यात् ।।३२ ।।

''अनेक जन्मोंके अंतमें अति दुर्लभ ऐसा अर्थ प्राप्ति करवानेवाला यह मनुष्य-शरीर प्राप्त करनेके बाद धीर पुरुष जो त्वरित ही प्रयत्न कर लेता है, उसका मृत्यु से भी उसका पतन नहीं होता है, क्योंकि ऐसे धीरपुरुष को प्रभुविषयक विषय परम कल्याण प्राप्त करनेके लिए ही सभी ओरसे प्राप्त होते हैं'' (भाग.पुरा.११।९।२९). (३२)

न जन्मनः प्राक् पितरौ नापत्यं मृत्यनन्तरम् ।

न स्त्री स्वीया विवाहात् प्राक् तस्मात् तन्ममता वृथा ।।३३ ।।

जन्म होनेसे पूर्व कोई माता-पिता नहीं थे, मृत्युके बाद कोई संतान नहीं बच जाते हैं, विवाह होनेसे पूर्व कोई पत्नी नहीं थी, अतः इन सभीके प्रति ममता व्यर्थ ही है. (३३)

विक्रीते गृहभूषादौ नष्टे दुःखं न जायते ।

अविक्रीते तु जायेत ममता तत्र कारणम् ।।३४ ।।

घर, आभूषण आदि को बेच देनेके बाद अथवा उनके नष्ट हो जानेके बाद उनका दुःख नहीं होता है. यदि बेचे न हों तो दुःख होता है, उसमें भी कारणस्वरूप ममता ही है. (३४)

देवदत्ताभिधे देहे मध्येऽहम् इति मन्यते ।

क्षणान्तरे मृतौ देहः क्व वा जीवः क्व गच्छति ।।३५ ।।

देव द्वारा दिए गए इस देहमें 'यह मैं हुं' ऐसा माना जाता है. परंतु एक क्षणके बाद ही मृत्यु हो जाने पर देह कहां जाता है तथा जीव कहां जाता है, यह कौन जान पाता है? (३५)

करोत्यघं कुटुम्बार्थं मृते [1]तद् रोदिति क्षणम् ।

न सहायः तदा दूतैः यदा नीयेत यातनाम् ।।३६।।

१.तस्मिन् इतिद्योतकम् अव्ययं तत्. तेन कुटुम्बे मृत इति अन्वयः.

परिवारके लिए मनुष्य पाप करता है, परंतु उसकी मृत्यु हो जानेके बाद परिवार तो क्षणमात्रके लिए विलाप करता है. जब यमके दूत यातना की ओर खींच जाते हैं, तब कोई भी सहायता करने नहीं आता है. (३६)

प्रिया स्त्री तनया गेहं धनाद्यत्रैव तिष्ठति।

देहोऽपि किन्तु यात्येकः पापपुण्यसहायवान्।।३७।।

प्रिय पत्नी, पुत्र, घर तथा धन आदि सभी कुछ यहीं रह जाता है, देह भी यहीं रह जाता है, पाप तथा पुण्यकी सहायतासे मनुष्य अकेला ही जाता है. (३७)

मुनिभिः सर्वगतिभिः खस्थानां ग्रहणादिकम्।

यथा तथाधोलोकस्य गतयोऽपि विनिश्चिताः।।३८।।

जैसे सर्वत्र गतिवाले मुनिओनें स्वस्थजनोंके लिए ग्रहण आदिका निर्णय किया है, उसी प्रकार पाताल लोककी गतिओंका भी निश्चय किया है. (३८)

देहेऽहन्ता च गेहादौ ममता मायया तु या।

ते संसारो वृथैतज्जं राग वैरादिकं त्यज।।३९।।

मायाके कारण जीवोंको देहमें अहंता तथा गृहादिमें ममता होती है. यह दोनों ही संसाररूप हैं तथा मिथ्या हैं. उनसे उत्पन्न राग, शत्रुता आदिका त्याग करो. (३९)

सदासम्बधिनं सर्व दुःखघ्नं नित्यम् ईश्वरम्।

स्नेहाद् भज महानन्दोऽमृतदेहो भविष्यति।।४०।।

नित्यता संबंधी सभी दुःखोंके नाशक नित्य ईश्वरका स्नेहसे आश्रय करनेसे, (संसारिक सुखों) उससे भी अधिक आनंद प्राप्त होगा तथा अमृत देह भी प्राप्त होगा. (४०)

असेवने महान् दोषः पाद्मे यज्जीवलक्षणे।

'दासभूतो हरेरेव नान्यस्यैव कदाचन'।।४१।।

इत्यसौ सहजो दासो जीवः सृष्टः स्वभक्तये।

अभजंस्तं तु तद्दत्तं 'यो भुंक्ते स्तेन एव सः'।।४२।।

प्रभुकी सेवा न की जाए तो बडा दोष होता है. पद्मपुराणमें जीवोंके लक्षणमें कहा है ''भगवान हरिका ही जीव दास है, अन्य किसीका कभी भी नहीं'' इस वचनके अनुसार जीव प्रभुका सहज दास होनेसे प्रभुकी भक्ति करनेके लिए ही उसका सृजन हुआ है. प्रभुका आश्रय नहीं करनेवाला प्रभु द्वारा कथित गीतावचन–''जो मनुष्य खाता है वह चोरीका खाता है'' (अनुसार पापी है.)

[१]''नृदेहम् आद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा'' ।।४३ ।।

अतोऽवश्यं सेवनीयो निरपेक्षोपकारकृत् ।
ज्ञातव्यश्च यथार्था स्याद् भक्तिर्ज्ञानं विना न यत् ।।४४ ।।

''(भगवान–) सबल गुरुरूपी सुकानवाले सुदुर्लभ इस आद्य देहको मैं अनुकूल पवन बनकर चलाता हुं. वह मनुष्य फिर भी यदि भवसागर को पार न करे तो वह आत्मघाती है'' (श्रीभाग.पु.११।२०।१७). अतः किसी भी प्रकारकी इच्छाको न रखते हुए उपकार करनेवाले भगवानका सेवन करना तथा ज्ञान प्राप्त करना, क्योंकि ज्ञान प्राप्त किए बिना यर्थाथ भक्ति नहीं हो पाती है. (४३–४४)

वेदादिनिष्ठा मुनयो बहवो ज्ञानचक्षुषः ।
अपश्यन् भक्तियोगेन सम्प्रापुः तं पुराविदः ।।४५ ।।

वेदादिमें निष्ठावाले तथा ज्ञानरूपी नेत्रवाले प्राचीन ज्ञानी मुनिओंने भक्तियोग द्वारा भगवानके दर्शन किये तथा उन प्रभुको प्राप्त किया. (४५)

यतमानो विदे वेदैः शक्त्या दीनो भजेद् रतः ।
माहात्म्यज्ञोऽस्य कृपया सुलभं स्यात् सुदुर्लभम् ।।४६ ।।

ज्ञानके लिए वेदोंकी सहायतासे शक्तिपूर्वक यत्न करते हुए दीन होकर प्रेमपूर्वक प्रभुका महात्म्यज्ञानपूर्वक आश्रय यदि किया जाए तो प्रभुकी कृपासे जो अत्यंत दुर्लभ है वह भी सुलभ हो जाता है. (४६)

सर्वैः अनन्यशरणैः प्रवर्ण्यमानं प्रमाणबन्दिगणैः ।
महतः फलान्तरङ्गं भजामि बीजं प्रपञ्चतरोः ।।४७ ।।

भगवानके अतिरिक्त अन्य किसीका जिसे आश्रय नहीं है ऐसे प्रमाण–रूपी बंदिजनोंके समूहने जिसका अत्यधिक वर्णन किया है ऐसे, तथा ब्रह्मांडरूपी महान वृक्षके अंदर फलवाले बीजरूप प्रभुका मैं आश्रय करता हुं. (४७)

इति श्रीमद्वल्लभाचार्यमतवर्त्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज
श्रीगोवर्द्धनशीघ्रकवि विरचिते वेदान्तचिन्तामणौ
प्रमाणनिरूपणं नाम द्वितीयं प्रकरणम्।।२।।

संक्षिप्तकार्यनिरूपणं नाम
तृतीयं प्रकरणम्

शुद्धाद्वैतैकरूपाय शुद्धद्वैतप्रदर्शिने ।
[१]शक्त्या सर्गादिलीलाय नमोऽस्त्वद्भुतकर्मणे ।।१ ।।

१.शक्तिप्रसारसमये प्रपञ्चावस्थायां शुद्धं द्वैतमिव दर्शयति इति अर्थः.

शुद्ध-अद्वैत एकरूप शुद्ध द्वैत बतानेवाले, तथा शक्तिसे सर्गादि लीला करनेवाले तथा अद्भन्नत कर्मवाले प्रभुको नमन हो. (१)

स विश्वं लीलयैवेदं सृजत्यवति हन्त्यजः ।
तथा 'यतो वा इमानि भूतानी'ति प्रपठ्यते ।।२ ।।
तैत्तिरीयेषु 'तस्माद् वा एतस्माद्' इति च स्फुटम् ।
तद् अस्य ब्रह्मरूपत्वं ब्रह्मकार्यस्य युज्यते ।।३ ।।

उन प्रभुकी लीला द्वारा ही विश्वका सृजन, पालन तथा लय होता है. इस विषयमें तैत्तरीय उपनिषदमें, ''जिनसे इन सभी पंचमहाभूतोंका जन्म हुआ है'' तथा ''उन ब्रह्मसे आकाश उत्पन्न हुआ है'' यह स्पष्ट है. अतः ब्रह्मके कार्यरूप यह विश्व ब्रह्मरूप है यह योग्य ही है. (२-३)

मृदुद्भूतघटादीनां मृण्मयत्वं निरीक्ष्यते ।
यत् 'सर्वं खल्विदं ब्रह्म तज्जलानि'ति हि श्रुतिः ।।४ ।।

मिट्टीसे उत्पन्न होनेवाले घटादि मृण्मय है यह देखा जाता है, उसी प्रकार ''यह सबकुछ ब्रह्म है. उन्हींसे विश्वका जन्म हुआ है, उन्हींमें स्थित है तथा उन्हींमें लय भी होता है.'' यह श्रुतिप्रमाण प्राप्त है. (४)

'सर्वं पुरुष एवेदं भूतं भव्यं भवच्च सत्' ।
इति भागवते सूक्तं पौरुषं समनूदितम् ।।५ ।।

'भूत वर्तमान तथा भविष्य सभी कुछ पुरुषरूप ही है' इस वचनानुसार भी सभी कुछ पुरुषोत्तममेंसे हुआ है, ऐसा पुरुषसूक्तके अनुसार कहा गया है (५)

यथा घटशरावाद्याकृतिमात्रेण भिद्यते ।
न भिद्यते मृण्मयत्वात् तथैवात्र चराचरम् ।।६ ।।

जैसे घट मिट्टीसे बने अन्य आकारोंसे भिन्न है, परंतु वे भी मिट्टीसे ही

निर्मित होनेसे सभी मृण्मय ही है, उसी प्रकार यह जड-चेतनात्मक जगत है. (६)

मृद् रूपा प्रथमावस्था मध्ये भिद्येत कारणात् ।

घटाद्याकारभेदेन मृत्सा तर्ह्यपि वस्तुतः ।।७ ।।

प्रथम अवस्था मिट्टी की है, मध्यावस्थामें कारणसे भिन्नता नहीं है. घटादि आकारभेद है, तथापि वस्तुस्थितिमें तो सभी कुछ मृण्मय ही है. (७)

लयेऽपि शकलाः सूक्ष्माः सूक्ष्मा जायन्तएव हि ।

ते मृद्येव प्रलीयन्त इत्यन्तेऽप्यस्य मृत्तिका ।।८ ।।

जब (मृण्मय पदार्थ) नष्ट होता है, तब छोटे-छोटे कण बन जाते है, उत्पन्न होते समय भी छोटे-छोटे कण ही थे. वे सभी कण मिट्टीमें लीन हो जाते हैं तथा अंततः मिट्टी, मिट्टी ही रह जाती है. (८)

तथा ब्रह्मैवात्र पूर्वम् अन्ते ब्रह्मैव शिष्यते ।

मध्ये क्रीडार्थभेदार्थं नाना [१]तेनेच्छया कृतम् ।।९ ।।

१. 'एको अहं बहु स्याम्' इत्यादि श्रुतिप्रमाणितया.

उसी प्रकार यहां भी प्रथम ब्रह्म हैं, अंतमें भी ब्रह्म ही बच जाते हैं. मध्यमें भी क्रीडा सिद्ध करनेके लिए ब्रह्म स्वेच्छया ही अनेक भेद उत्पन्न करते हैं. (९)

सर्वाकारं सर्वशक्ति सर्वधर्माश्रयो हि तत् ।

सच्चिदानन्दरूपं च तस्माद् आविरभूद् जगत् ।।१० ।।

उन ब्रह्ममें सभी आकार समाहित है, सभी शक्तियां स्थित हैं, तथा सभी धर्म-लक्षण आश्रय करके रहे हुए हैं. वह सत्, चित् तथा आनंदरूप है. ऐसे ब्रह्मसे जगतका आविर्भाव हुआ है. (१०)

जडजीवान्तरात्मानः पूर्वम् आविष्कृता इमे ।

[१]एकं द्वयं त्रयं तत्र भेदायास्थापयद् विभुः ।।११ ।।

१.तेन अत्र परेषाम् अप्रामाणिकविशेषणदानं शक्तिसंकोचो वादुर्वारः.

जड, जीव तथा अन्तर्यामी को सर्वप्रथम प्रकट किया. प्रभुने भेद दिखानेके लिए एक, दो, तीन ऐसी रचना की. (११)

जडे [१]सदंशः प्रकटश्चिदानन्दौ तिरोहितौ ।

जीवे च सच्चितावन्तर्यामिण्येतत् त्रयं स्फुटम् ।।१२।।

१.सदाद्यंशम्.

जडमें सदंश प्रकट हैं तथा चित् तथा आनंदांश छुपे हुए हैं. जीवमें सत् तथा चित् अंश प्रकट हैं तथा आनंदांश छुपा हुआ हैं. अंतर्यामीमें तीनों अंश प्रगट हैं. (१२)

सन्नाम विद्यते चित् च चैतन्येन प्रकाशते।

आनन्दः प्रियतातीवेत्येषां प्रत्यक्षलक्षणम् ।।१३ ।।

सत् अर्थात् जो यह द्रश्य है वह, चित्का प्रकाश चैतन्यसे होता है, आनंद अर्थात् प्रियता. इस प्रकार इन तीनोंके प्रत्यक्ष लक्षण है. (१३)

जडं सर्वं मृदश्मादि क्रियाशून्यं [१]स्वतो हि यत्।

सत्तामात्रं जडस्यास्ति न प्रीतिः न प्रकाशनम् ।।१४ ।।

१.स्वभावत इति अर्थः.

यह सभी मिट्टी, पत्थर आदि जड हैं तथा स्वेच्छया कोई क्रिया करपानेमें समर्थ नहीं हैं. जडमें मात्र सदंश होनेसे उनका अस्तित्व है, उनमें चेतन तथा आनंद नहीं है. (१४)

तनोर्यत् संबंध एव श्वासादिर्न शवेऽन्यथा।

सोऽणुमात्रश्च हृत्स्थानो जीवो जीवनकारणम् ।।१५ ।।

शरीरमें श्वासादिका संबंध है जो मृतदेहमें नहीं होता है. अणुमात्र तथा हृदयमें स्थित जीव ही जीवनका कारण है. (१५)

स विद्यतेऽखिले देहे चैतन्येन प्रकाशते।

जीवेन विषयानन्दो यद्यप्येषोऽनुभूयते ।।१६ ।।

न्यूनाधिकः स क्षणिको न पूर्णानन्द उच्यते।

'तस्यैवानन्दस्य मात्राम् उपजीवन्ति' हि श्रुतिः ।।१७ ।।

वह है तथा समग्र देहमें चैतन्य द्वारा प्रकाशित हो रहा है. इस विषयका आनंद यद्यपि जीव प्राप्त कर रहा है, तथापि वह आनंद न्यून तथा क्षणिक है; वह पूर्ण आनंद नहीं है. उपनिषदमें कहा है कि–''वे सभी ब्रह्मकी आनंदकी मात्राके आधार पर ही स्थित है.'' (१६–१७)

भिन्नः प्रतिशरीरं योऽणुर्हृत्स्थानो 'हंस'शब्दभाक्।

साक्षी सोऽन्तःस्थितः स्पष्टं तत्र तत् त्रयमेव हि ।।१८ ।।

हृदयमें स्थित, 'हंस' नामसे प्रसिद्ध अणुरूप जो स्थित है, वह साक्षी-रूप अंतर्यामी है. अतः जड, जीव तथा अंतर्यामी-ये तीनों स्पष्ट ही हैं. (१८)

भूतैः नाना तनूः सृष्ट्वा जीवान्तर्यामिणौ उभौ ।
प्रत्येकं संस्थाप्य जीवान्मायया ऽमोहयत् प्रभुः ।।१९ ।।

पंचमहाभूतों द्वारा अनेक प्रकारके देहोंकी रचना करके उनमें जीव तथा अंतर्यामीको स्थित करके प्रभुने अपनी माया द्वारा जीवोंको मोहित किया. (१९)

जडेष्वपीच्छया धर्मान् तिरोभाव्याखिलान् निजान् ।
केचित् क्वचित् क्वचित् केचित् शेषिताभेदसिद्धये ।।२० ।।

जड पदार्थोंमें भी अपने सभी धर्मोंका तिरोधान करके, भेद सिद्ध करनेके लिए किसीमें कहीं कहीं कुछ कुछ न्यून रखा. (२०)

प्ररोहो मार्दवं किंचिद् वृक्षे काठिन्यम् अश्मसु ।
अप्ररोहश्चेति भेदोऽयं मृज्जातेष्वपि गम्यते ।।२१।।

अंकुरित होना तथा कोमलता के गुण जैसे वृक्षमें हैं, तदनुसार वृद्धि प्राप्त न करना तथा कठोरता - ये दोनों ही गुणोंके भेद पार्थिव होने पर भी वृक्ष तथा पत्थरमें पाए जाते हैं. (२१)

अनुष्णाशीतलस्पर्शो भूवाय्वोरप्सु शीतलः ।
स तेजस्युष्ण एवेति धर्माणाम् अप्यनेकता ।।२२।।

पृथ्वी तथा वायुमें समशीतोष्ण स्पर्श है, किन्तु जलमें शीतल स्पर्श है तथा तेजमें ऊष्ण स्पर्श है. ऐसे धर्म अनेक हैं. (२२)

चिदाद्यभावतो रूपे बह्वाकारप्रकारतः ।
परस्परं विभिन्नानां धर्माणाम् अपि दर्शनात् ।।२३ ।।
सज्ञानानाञ्च जीवानां मायया मोहनाद् दृढम् ।
महान् प्रदृश्यते भेदो ब्रह्मत्वं नैव लक्ष्यते ।।२४ ।।

चित् आदिके अभावको लेकर तथा अनेक प्रकारके आकारोंको लेकर भिन्न-भिन्न धर्मोंका दर्शन होता है, ऐसे ज्ञानवाले जीवोंको मायासे अत्यधिक मोह होता है. इस प्रकार भेद दिखाइ देतें है तथा इन सभीमें रही हुई ब्रह्मात्मकताका बोध नहीं होता है. (२३-२४)

युग्मम् ।

वस्तुतस्त्वखिलं ब्रह्म त्रिकालेषु तथा स्मृतिः ।
'वासुदेवः सर्वम् इति स महात्मा सुदुर्लभः ।।२५।।
त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीद् इदम् आत्मतन्त्रे ।
त्वम् आदिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् ।।२६ ।।

वास्तविकतामें तो तीनों कालमें सभी कुछ ब्रह्म ही है तथा इसके समर्थनमें गीताका वाक्य है – ''सभी कुछ वासुदेवात्मक है ऐसा ज्ञान प्राप्त करनेवाला महात्मा पुरुष मिलना अत्यंत दुर्लभ है.''(२५)

''आत्मतंत्ररूप आपमें ही यह सबकुछ आरंभमें था, मध्यमें था तथा अंतमें भी था. घटके आदि, मध्य तथा अंतमें मिट्टी है, ऐसे आप इस जगतके आदि, अंत तथा मध्य हो, तथा पर से भी पर हो''(श्रीभाग.पु.८।६।१०). (२६)

'भूतानि विष्णुर्भुवनानि विष्णुः' ।
इति भागवते विष्णुपुराणेऽन्यत्र चोदितम् ।
तस्माद् अभिन्नमेवास्ति कारणाद् ब्रह्मणो जगत् ।।२७।।

'महाभूत विष्णु हैं, सभी जीव भी विष्णु हैं'', ऐसा भागवतमें, विष्णुपुराणमें तथा अन्य स्थानोंमें कहा गया है. अतः कारणरूप ब्रह्मसे कार्यरूप जगत अभिन्न ही है. (२७)

आविर्भावे चिदादीनां धर्माणाम् अपि सर्वशः ।
ब्रह्मैव एकं तदा पूर्णं सर्वं स्यादेव केवलम् ।।२८।।

सभी स्थलोंमें चित् आदि धर्मोंका आविर्भाव हो, उस स्थितिमें भी पूर्ण, एकमात्र ब्रह्म ही हैं. (२८)

दृश्येताकारतो भेदो मुद्रिकाकटकादिषु ।
आदिमध्यावसानेषु स्वर्णम् एवेति निश्चयः ।।२९ ।।

अंगूठी, चूडी आदिमें आकारोंका भेद दिखाई देता है. परंतु आदि, मध्य तथा अंतमें सभी कुछ स्वर्ण ही है, यह निश्चित है. (२९)

जीवानां ब्रह्मविज्ञानाद् आनन्दांशप्रकाशनात् ।
सर्वत्र लीलया तादृक् ब्रह्मैवैकं प्रतीयते ।।३० ।।

ब्रह्मका विशेष ज्ञान होनेसे तथा आनंदांशके प्रकट हो जानेसे जीवोंको सभी स्थलोंमें लीला होनेसे ब्रह्मका ही बोध होता है. (३०)

नानात्वम् ऐच्छिकं मध्ये अचिन्त्यत्वाद् दृश्यते महत्।
तमोनाशे शुद्धदृष्टेः 'नेह नानास्ति किञ्चन' ।।३१।।

प्रभुकी लीलाका विचार करना बुद्धिगम्य ही न होनेसे स्थितिकालमें प्रभुकी इच्छासे ही विश्वमें अनेकता दिखाइ दे रही है. अज्ञानका नाश होनेसे शुद्ध दर्शन होनेपर, ''यहां कुछ भी अनेक नहीं है.'' (ऐसा बोध होता है.) (३१)

ब्रह्मरूपः सदा सत्यः प्रपञ्चः तत्कृतोऽखिलः।
निरूप्यते हि वेदादौ शुद्धाद्वैतमतो मतम्।।३२।।

ब्रह्मरूप तथा सदा सत्य यह विश्वात्मक प्रपंच उन्हींका प्रकट किया हुआ है. इसी कारण वेदादि शास्त्रोंमें शुद्धाद्वैत मतका निरूपण किया गया है. (३२)

सत्यस्वरूपम् एतत्स्वस्माद् आविष्कृतं स्वयं येन।
कर्त्तारं भर्त्तारं हर्त्तारं भज सदा ललितलीलम्।।३३।।

जिन प्रभुने सत्यस्वरूपवाले इस जगतको अपनेआपमेंसे स्वयं ही आविर्भूत किया है, ऐसे कर्ता-भर्ता-हर्ता, ललित लीलावाले प्रभुका निरंतर आश्रय कर. (३३)

इति श्रीमद्वल्लभाचार्यमतवर्ति श्रीव्रजवल्लभचरणानुचर पंचनदीघनश्यामभट्टात्मज
श्रीगोवर्द्धनशीघ्रकवि विरचिते वेदान्तचिन्तामणौ
संक्षेपतस्त्रिविधकार्यनिरूपणं नाम तृतीयं प्रकरणम्।।३।।

d

प्रपञ्चसत्यत्वनिरूपणं नाम
चतुर्थं प्रकरणम्

भगवत् समवायित्वात् तादृप्यात् सत्यएव हि।
प्रपञ्चो, यादृशं स्वर्णं तादृक् स्यादेव कुण्डलम् ।।१ ।।

भगवान जगतके समवायि कारण होनेसे तथा इस प्रकार जगतरूप होनेसे प्रपंच सत्य है. जैसा स्वर्ण होता है, ऐसा ही कुंडल भी होता है. (१)

तन्तुकार्यं पटः तन्त्वात्मकः स्युः तन्तवो यथा।
सूक्ष्माः सिताश्च वस्त्रेऽपि तत् तादृक्षत्वमीक्ष्यते ।।२ ।।

तंतुओंके कार्यरूप वस्त्र तंतुरूप है. तंतु यदि सूक्ष्म तथा श्वेत हों तो वस्त्र भी तथैव ही होगा. (२)

'ऐतदात्म्यम् इदं सर्वं, तत्सत्यम्'इति पठ्यते।
'यद् इदं किञ्च तत्सत्यम्'इत्याचक्षत इत्यपि ।।३ ।।

''यह जो कुछ भी है, वह ब्रह्मरूप है.'', ''यह जो कुछ भी है सब सत्य है'', ऐसा श्रुति कहती है. ''यह जो कुछ भी है वह सत्य है'' ऐसा भी कहा गया है. (३)

'सर्व'शब्देन निर्दिश्य दृष्टश्रुतम् अदोऽखिलम्।
एतस्य ब्रह्मरूपत्वं सत्यत्वं च निरूप्यते ।।४ ।।

'सर्व' शब्द द्वारा यह सभी कुछ द्रश्य तथा श्राव्य जगत लक्षित हो गया होनेसे जगत ब्रह्मरूप है तथा सत्य है ऐसा स्पष्ट कहा गया है. (४)

कालत्रयेऽप्यबाध्यं यत् सत्यम् इत्युच्यते बुधैः।
'त्वय्यग्र आसीत्'पद्येऽपि सदा सत्ताभिधीयते ।।५ ।।

तीनों काल– भूत, भविष्य तथा वर्तमान में जिनका बाध नहीं होता है, ऐसे पदार्थको बुद्धिमान मनुष्य सत्य कहते हैं. 'यह आरंभमें आपमें था', इस श्लोकमें भी सनातन अस्तित्व कहा गया है. (५)

तस्मात् सनातनम् इदम् अखण्डं वर्त्तते सदा।
[१]मध्ये कार्यात्मना पूर्वोत्तरयोः कारणात्मना ।।६ ।।

१.वर्तत इति शेषः.

अतः स्थितिकालमें कार्यरूपमें तथा आदि तथा अंतमें कारणरूपमें, यह जगत सनातन स्थित है तथा अखंड है. (६)

''विश्वं हि ब्रह्म तन्मात्रं संस्थितं विष्णुमायया।
यथेदानीं तथा चाग्रे पश्चादप्येतद् ईदृशम्'' ।।७।।
उक्तं तृतीयस्कन्धेऽथ सूत्रकर्त्रा श्रुतेर्बलात्।
कारणानन्यताम् अस्योक्त्वा सत्यत्वं प्रपञ्चितम् ।।८।।

'यह विश्व ब्रह्मरूप, उन ब्रह्मकी मात्रारूपमें विष्णुकी मायासे स्थित है. अतः अभी जैसा है ऐसा ही आदिकालमें था तथा भविष्यमें भी ऐसा ही है.'– इस वाक्यानुसार भागवतके तृतीय स्कंधमें तथा सूत्रकार व्यासजीने श्रुतिके बलपर इस कार्यरूप विश्वकी उसके कारणरूप ब्रह्मके साथ अनन्यता– एकरूपता जो दिखाइ है वह सत्य ही है. (७–८)

१४–तदनन्यत्वमारम्भणशब्दादिभ्यः।। भावे चोपलब्धेः ।।

इन उपनिषदवाक्योंमें 'आरम्भण'शब्द कहे गए होनेसे जगत तथा ब्रह्म की अनन्यता दिखाइ है. हेतु है–'अस्तित्वके विषयमें मिलता होनेसे.' (ब्रह्म.सूत्र २।१।१४–१९)

१५–सत्वाच्चावरस्य ।।

'और जगतका अस्तित्व होनेसे'.

१६–असद्व्यपदेशाद् नेति चेद् न धर्मान्तरेण वाक्यशेषात्।

ऐसा वाक्य प्राप्त होता होनेसे ब्रह्मसे जगत अनन्य नहीं है, ऐसा यदि माना जाता हो, तो उत्तर है कि अन्य धर्मोंको लेकर अंतिम वाक्य भी ऐसा ही प्रतिपादन करते हैं.

१७–युक्तेः शब्दान्तराच्च ।।

यही बात शब्दकी युक्तिसे भी (सिद्ध) है.

१८–पटवच्च ।।

यहां उदाहरण वस्त्रका है. (अ. २. पा. १. सू.)

[१]ब्रह्मानन्योऽस्ति सत्योऽयं भावे सत्युपलभ्यते।
अवरस्य प्रपञ्चस्य सत्वम् उक्तश्रुतौ श्रुतम् ।।९।।

१. इत्यारभ्य द्वादशश्लोकपर्यन्तम् उक्तसूत्राणाम् अर्थः.

'असद्वा इदम्' इत्येतद् अव्याकृतिपरं मतम्।
'तदात्मानं स्वयम्'इति वाक्यशेषस्य सङ्गतेः ।।१०।।
समवेतं भवेत् कार्यं युक्तिर्बीजद्रुमादिवत्।
वाक्यान्तराणि सत्यत्वबोधकानि बहूनि हि ।।११।।
पटोऽनुभूयते सर्वो विस्तीर्णो नानुभूयते।
संकोचेऽल्पतया तद्वत् सृष्टिप्रलययोः जगत् ।।१२।।

(उपरोक्त सूत्रोंके अर्थका विवेचन)

यह प्रपंच ब्रह्मसे अनन्य है तथा सत्य है, क्योंकि जगतका अस्तित्व दिखाइ देता होनेसे. 'वाचारम्भण' श्रुतिमें प्रपंचकी सत्यता का ही निरूपण है. 'असद् वा' श्रुतिमें जो असत् शब्द है वह अव्याकृत रूपसे जगत ब्रह्ममें था, ऐसा कहता है. 'उसने अपनी आत्माको ही जगतके रूपमें बनाया' ऐसे अंतिम वाक्यकी भी वहां संगति प्राप्त होती है. बीज तथा वृक्षकी तरह जो कार्य है वह कारणसे ओतप्रोत है–ऐसी इस विषयमें युक्ति भी है. जगतका सत्यत्व दिखानेके लिए अनेक वाक्य भी प्राप्त हो ही जाते हैं. वस्त्रको यदि फैला दिया जाए तो उसका अनुभव होता है, किंतु यदि उसका संकोच किया जाए तो उसका अनुभव नहीं होता है. ऐसी ही स्थिति स्थितिकालमें तथा प्रलयकालमें जगतकी है. (९–१२)

व्याख्यातम् इत्थं भाष्ये सत्कार्यवादो विविच्यते।
एवं सर्वत्र वेदादौ युक्तिभिश्चानुभूयते ।।१३।।

अणुभाष्यमें इस प्रकार व्याख्या की गइ है, जहां जगतरूपी कार्य सत्य है ऐसा विवेचन किया गया है. इसी प्रकार वेदादिमें तथा युक्तिओंसे भी ज्ञात होता है. (१३)

आविर्भावतिरोभावाभ्यां नैवास्ति ह्यनित्यता।
आविर्भावे प्रतीयेत तिरोभावे तु नेच्छया ।।१४।।

आविर्भाव तथा तिरोभाव होता होनेसे जगतकी अनित्यता सिद्ध नहीं होती है. भगवद् इच्छासे ही आविभार्व होनेसे वहां वस्तुका अस्तित्व दिखाइ देता है, तथा जब तिरोभाव होता है तब दिखाइ नहीं देता है. (१४)

[१]आविष्कृतानि भूतेभ्यः शरीराणीच्छया स्वयम्।

ईश्वरो जीवयुक्तानि निमित्तीकृत्य केवलम् ।।१५ ।।

१.स्वयं भगवता इच्छया भूतेभ्यः शरीराणि आविष्कृतानि इति एको अन्वयः. किञ्च प्रभुः ईश्वरो जीवयुक्तानि तानि इति शेषः केवलं निमित्तीकृत्य भूतेभ्यः (मातृपितृवीर्यरजोभूतेभ्यः) तादृशानि इतराण्यपि आविष्कुरुते इति अपरः. तानि च कर्मानुसारेण जीवान् प्रापयति.

भूतेभ्य आविष्कुरुते तादृशानीतराण्यपि ।
तानि कर्मानुसारेण जीवान् प्रापयति प्रभुः ।।१६ ।।

प्रभुने अपनी इच्छासे महाभूतोंमेंसे शरीरोंका आविर्भाव किया है, ऐसे शरीरमें जीवात्माका प्रवेश करवाके, उस जीवात्माको निमित्त बनाकर अन्य शरीरोंका पंचमहाभूतोंमेंसे आविर्भाव करवाते है. प्रभु उन शरीरोंकी स्थिति कर्मानुसार करवाते हैं. (१५-१६)

युग्मम् ।

देहाः सक्त्येव भूतेषु भागैः कारणरूपतः ।
मध्ये कार्यात्मना भिन्ना लीयन्तेऽन्ते च कारणे ।।१७ ।।

महाभूतोंमें भिन्न-भिन्न प्रकारसे कारणके रूपमें रहे हुए देह हैं ही, स्थितिकालमें कार्यके रूपमें भिन्न-भिन्न प्रकट होते हैं तथा अंतमें पुनः कारणरूपमें समाहित हो जाते हैं. (१७)

जीवस्तु नित्यएवास्ति योगो भगवदिच्छया ।
आविर्भावतिरोभावशालि नित्यमतोऽखिलम् ।।१८ ।।

जीव नित्य है. प्रभुकी इच्छासे उनका योग होता है. अतः आविर्भाव-तिरोभाववाला यह सभीकुछ नित्य है. (१८)

व्यासेन भारते योद्धा ये हताः ते प्रदर्शिताः ।
इति नित्यं तिरोभावेऽपीच्छया दृश्यते क्वचित् ।।१९ ।।

महाभारतके युद्धमें जिन योद्धाओंकी मृत्यु हुई थी, उन्हें व्यासजीने दिखाया था. ऐसे तिरोभावमें भी भगवानकी इच्छासे पदार्थ नित्य (कारणरूपसे) स्थित होते ही हैं, ऐसा देखा जाता है. (१९)

केचिद्ं आहः जगन्मिथ्या भ्रमाद् ब्रह्मणि दृश्यते ।
यथेह रजतं शुक्तौ यथा रज्जौ भुजङ्गमः ।।२० ।।

शंका= कुछ लोग कहते हैं कि जगत मिथ्या है तथा ब्रह्ममें भ्रान्तिवश जगत दिखाइ देता है, जैसे सीपमें रजतका भ्रम उत्पन्न होता है तथा रस्सीमें सर्पकी भ्रांति होती है. (२०)

[१]ब्रह्माऽदृश्यं सर्वथैव निराकारं मते च ते।
साकारे दृश्यएव स्याद् आश्रये निश्चितं भ्रमः ।।२१ ।।
न धूल्याच्छन्नशुक्तौ वा वायौ वा भ्रान्तिरिष्यते।
किञ्च साधर्म्यमूलोऽयं शुक्तौ यत् चाकचक्यतः ।।२२ ।।
किं नान्यथा गजभ्रान्तिः मायिकं सगुणं जगत्।
निर्धर्मकं विमायं तत् साम्यगन्धोऽपि नानयोः ।।२३ ।।

१.पूर्वपक्षः. २.उत्तरपक्षः.

समाधान= मिथ्यावादीओंके मतानुसार ब्रह्म अदृश्य है तथा निराकार है. आश्रय साकार होनेके कारण भ्रम अवश्य होता है, परंतु सीपके ऊपर यदि रज जम गइ हो और वायुमें धूल फैली हुई हो तो रजतकी अथवा मृगजलकी भ्रांति नहीं होती है. सीपमें भी होता रजतका भ्रम चमकको साम्यताके कारण होता है. यदि ऐसा न होता तो हाथीकी भी भ्रांति उत्पन्न हो सकती है. वादीके मतानुसार जगत मायिक तथा सगुण है और ब्रह्म मायाविहीन तथा निर्धर्मक निर्गुण है. अतः दोनोंमें किसीभी प्रकारके साम्यकी कोई गंध नहीं है. (२१-२३)

हट्टादौ रजतं सत्यं वल्मीकादौ च पन्नगः।
दृश्यते तज्जसंस्कारात् कल्पयेद् धीर्मृषाश्रये ।।२४ ।।

दुकानमें रजत सत्य है तथा बिलमें रहा हुआ सर्प भी सत्य ही है. असत् आश्रय प्राप्त करनेके कारण पूर्वके उन-उन पदार्थोंको उनमें देखनेके संस्कारके कारण बुद्धि असत्का दर्शन करती है. (२४)

तथा भिन्नम् अतः सत्यं दृष्टं चेद् ईदृशं क्वचित्।
तदा कल्प्येत संस्कारा दृश्यते श्रूयते न तत् ।।२५ ।।

भिन्न स्वरूपमें सत्य पदार्थ तो रहा हुआ है ही. उसके समान कोई दूसरा पदार्थ देखनेमें आए तो ही उस पदार्थकी कल्पना उत्पन्न होती है, क्योंकि उसके ऐसे संस्कार होते है. अन्यथा उस पदार्थमें भ्रान्तिरूप अन्य पदार्थ दिखाई या सुनाई नहीं देते हैं. (२५)

नन्वसत्यो यथा स्वप्नो गृहवित्तादि लभ्यते।

मिथ्या तत्र[१] न निद्रान्ते [२]तद् असत्यम् इदं तथा ।।२६ ।।

१.स्वप्ने. २.स्वाप्निकं वस्तु.

शंका= स्वप्न असत्य होता है. उसमें घर, द्रव्य आदि जो भी प्राप्त होता है वह सभीकुछ मिथ्या है. निद्राके अंतमें वह सभी वस्तु असत्य है; ऐसा ही इस जगतके विषयमें भी समझना चाहिए. (२६)

इति चेद् न तदोद्भूतेः पापैः पुण्यैः न वै भवेत्।

दुःखं सुखं वा तत् सर्वं जगज्जाभ्यां तु जायते ।।२७ ।।

समाधान= यदि ऐसा कहा जाए तो उचित नहीं है, क्योंकि स्वप्नमें जन्म लेनेसे पाप तथा पुण्यों से जन्य सुखदुःख नहीं होते है, जबकि जगतमें होते पाप तथा पुण्यसे सुख-दुःखकी अनुभूति होती ही है. (२७)

दृष्टं जाग्रद् अवस्थायां यद् यद् घटपटादिकम्।

संस्कारात् कल्प्यते तत्-तद् मोहनाद् मायया मतेः ।।२८ ।।

जाग्रत अवस्थामें घट, वस्त्र आदि जो कुछ भी देखनेमें आता है वह सभी कुछ मायासे मोहित बुद्धिके संस्कारके कारण स्वप्नमें काल्पनिक रूपसे देखनेमें आते हैं. (२८)

अस्य जाग्रद् अवस्था तु मोक्षः तत्र न किञ्चन।

क्वत्यं सत्यं तदा दृष्ट्वाऽत्रासत्यं परिकल्पितम् ।।२९ ।।

इस जगतमें जाग्रत अवस्था भी है और मोक्ष भी है, जबकि स्वप्नमें ऐसा कुछ भी नहीं होता है. कहीं सत्य था, जिसे देखकर स्वप्नमें उस सत्यकी कल्पना की गइ होती है. (२९)

नन्वदृष्टमपि स्वप्ने दृश्यते शृङ्गवाञ्छशः।

चलन् वृक्षो गजः पीत इत्याद्यत्राखिलं तथा ।।३० ।।

इति चेद् न शशो वृक्षो हस्ती शृङ्गगतिक्रिया।

पीतवर्ण इमे दृष्टा योगमात्रं तु कल्प्यते ।।३१ ।।

शंका= कभी न देखे हों ऐसे पदार्थोंका भी स्वप्न तो आता ही है. जैसे सींगोंवाला खरगोश, चलता हुआ पेड, पीला हाथी; ऐसी दशामें इस जगतको भी समझो. समाधान= यदि ऐसा कहा जाए तो भी उचित नहीं है. खरगोश, वृक्ष,

हाथी, सींग, गति, क्रिया, पीलाश ये सभी दृश्य पदार्थ ही हैं. स्वप्नमें दिखाइ देता उनका योग ही काल्पनिक है (पदार्थ नहीं). (३०-३१)

गृहं सत्यं स्वयं सत्यो योगो ममतया मुधा।

जीवः सत्यः तनुः सत्याऽहंता [१]राजत्ववद् वृथा।।३२।।

१.स्वपने ''विप्रस्य राजा अहम्'' इति बुद्धिः यथा व्यर्था तथा.

घर सत्य है, मनुष्य स्वयं सत्य है, उन दोनोंके बीचका योग ही ममता जन्य होनेसे मिथ्या है. जीव भी सत्य है, देह भी सत्य ही है, उसमें स्थित राजा होनेकी अहंता ही मिथ्या है. (३२)

सिद्धान्त इति चेत् तर्हि दृष्टान्त उपपद्यते।

पुराणेष्वप्येतदर्थं स्वप्नाभत्वं क्वचित् कृतम्।।३३।।

यह सिद्धांत है, तभी दृष्टांत सिद्ध हो पातें हैं. इसीलिए पुराणोंमें कितनी बार स्वप्नकी आभाका वर्णन प्राप्त होता है. (३३)

अतः सूत्रेषु 'वैधर्म्यात् च न स्वप्नादिवत्वतः[१]।

निषिध्यते अधिकरणाद् असत्यत्वं तु वस्तुतः।।३४।।

१.अतःअस्माद् अधिकरणाद् इति अन्वयः.

इसी कारण ब्रह्मसूत्रमें 'वैधर्म्याच्च...' इस सूत्रमें दोनोंके धर्म विभिन्न होनेके कारण स्वप्न जैसी भ्रांति नहीं है'- ऐसा कहकर आधारस्थान होनेके कारण असत्यपनेका वस्तुस्थितिमें निषेध किया गया है. (३४)

स्वप्ने भुक्त्यम्बुपानाभ्यां क्षुत्तृण्नैव निवर्त्तते।

तदा देहकृतैः बन्धात् कथं मुच्येत साधनैः।।३५।।

स्वप्नमें भोजन करनेसे और जल पीनेसे किसीकी भूख-प्यास मिटती नहीं है; उसी प्रकार (स्वप्नमें) देह द्वारा किए गए साधनोंसे बंधनसे कैसे मुक्त हुआ जा सकता है? (३५)

तस्माद् असत्यं नैवेदं तादृप्यात् नित्यमेव हि।

श्रुतिष्वनेकत्र सत्यत्वम् उक्तं नान्यथा क्वचित्।।३६।।

इसीलिए यह जगत असत्य नहीं है और ब्रह्मरूप होनेसे नित्य ही है. श्रुतिवाक्योंमें अनेक स्थानोंमें जगत सत्य होनेका कहा गया है, असत्य है ऐसा कहीं नहीं कहा गया है. (३६)

एतत् केचिद् अविद्वांसो मायासंसृतिम् आत्मनः ।
अनाद्यावर्त्तितं नृणां कादाचित्कं प्रचक्षते ।।३७ ।।

''जगतके सत्य होनेका जिन्हें ज्ञान नहीं है, ऐसे अज्ञानीजन, 'आत्मा माया द्वारा निर्मित है, मनुष्य अनादिकालसे विवर्तरूपसे स्थित है', ऐसा कहा करते हैं'' (भाग.पुरा.१२।१०।४१) (३७)

'असत्यम् अप्रतिष्ठं ते जगद् आहुः अनीश्वरम्' ।
इत्यासुरेषु गणिता असत्यत्वप्रवादिनः ।।३८ ।।

'वे आसुरी प्रकृतिके लोग जगतको असत्य, प्रतिष्ठारहित और इश्वरहीन कहते हैं.' इस प्रकार गीताजीमें जगतको असत्य कहनेवालोंकी आसुरीजीवोंमें गणना की गई है. (३८)

दृढाहंतापदं देहो गेहादि ममतास्पदम् ।
यदा सत्यं विजानीयाद् न विरज्येत कश्चन ।।३९ ।।

देह अहंताका स्थान है तथा गृहादि ममताके स्थान है. इन दोनोंको यदि सत्य माने जाएं तो किसीको वैराग्य होगा ही नहीं. (३९)

वैराग्यार्थम्[१] असत्यत्वं पुराणेषु क्वचित् क्वचित् ।
[२]अभिप्रेत्य तिरोभावं कुत्रचित् संसृतिं तथा ।।४० ।।

१.अत इति शेषः. २.मुख्यौ आन्तरभेदाद् अनेकप्रकारा सृष्टिः. सर्वप्रकारापि सा 'प्रपञ्च'शब्देन उच्यते शास्त्रे. तास्वेव मायिकी संसारादिरूपापि सृष्टिः. ततश्च वैराग्यार्थं क्वचित् संसारमेव हृदिकृत्य ''प्रपञ्चो असत्यः'' इति उच्यते न तेन कार्यरूपः प्रपञ्चः तथा ज्ञेयः. क्वचित् च कार्य मध्यपतितानाम् अपि पदार्थानां तिरोभावं (विद्यमानस्य वस्तुनः अनुभवविषयत्वं) दृष्ट्वा तमेव हृदि कृत्वा 'प्रपञ्चः असत्यः' इति उच्यते.

क्रीडामये प्रभोः अस्मिन् संयोगविगमास्पदे ।
तिरोभाविनि नो रागः कर्तव्यः क्षणिके वृथा ।।४१ ।।

अतः वैराग्य होनेके लिए पुराणोंमें कहीं-कहीं जगतको लक्ष्य बनाके तथा विद्यमान वस्तुका कहीं तिरोभाव होता है, ऐसा दिखाके वर्णन किया गया है. ऐसे वर्णनोंमें आशय यह है कि प्रभुकी क्रीडाके रूपमें स्थित, संयोग तथा वियोग देनेवाले, तिरोभाव प्राप्त करनेवाले इस जगतमें निरर्थक आसक्ति नहीं

करनी चाहिए. (४०-४१)

शेषेणाऽप्यस्य नित्यत्वं निश्चितं पस्पशाह्निके।

''नित्यः कार्योऽथवा शब्द'' इत्याकारविचारणे ।।४२ ।।

शेषनारायणके अवतारस्वरूप महर्षि पतंजलिने भी पाणिनि-व्याकरण महाभाष्यमें 'पस्पशाह्निक'में जगत नित्य होनेका कहा है, जहां 'नित्यः...अर्थात् शब्द नित्य है और करने लायक है' -ऐसा विचार किया है. (४२)

''नित्ये शब्दार्थसम्बन्ध'' इत्येतत् तु विवृण्वता।

शब्दश्चार्थश्च संबंधः त्रयो नित्या निरूपिताः ।।४३ ।।

'नित्ये..' अर्थात् नित्यमें शब्द तथा अर्थका संबंध है, ऐसा विवरण करते हुए उन्होंने शब्द, अर्थ तथा उन दोनोंके संबंध, इन तीनोंको नित्य कहा है. (४३)

एवं सर्वत्र शास्त्रेषु नित्यमेव निरूपितम्।

आविर्भावतिरोभावाभ्यां मिथ्या भात्यनित्यता ।।४४ ।।

इस प्रकार सभी शास्त्रोंमें सर्वत्र जगतको नित्य कहा है. आविर्भाव तथा तिरोभाव के होनेसे जो अनित्यता है वह असत्य है. (४४)

असच्छास्त्रेष्वनित्यत्वं न्यायादिषु विविच्यते।

सनास्तिक्येषु मोहाय मुनिभिः निर्मितेष्विह ।।४५ ।।

उत्तरोत्तरसर्गार्थं मोहनाय मनीषिणाम्।

रुद्रादिदैवतैः कैश्चिद् मतेषु रचितेषु च ।।४६ ।।

मुनिओंको मोहित करनेके लिए नास्तिकतासे भरे हुए न्याय आदि असत् शास्त्रोंमें तथा सृष्टि निरंतर चलती रहे इसलिए बुद्धिशाली पुरुषोंको मोह करवानेके लिए रुद्रादि कुछ देवताओं द्वारा प्रकटित मतोंमें जगतको अनित्य बताया गया है. (४५-४६)

तादृक् शास्त्राभ्यसनतो भ्रान्तचित्ताः स्वकर्मभिः।

अप्राप्ततत्वा जायन्ते म्रियन्ते च मुहुर्मुहुः ।।४७ ।।

ऐसे शास्त्रोंका अभ्यास करनेसे चित्तभ्रम हुए लोगोंको ऐसे कर्मोंसे तत्त्वकी प्राप्ति नहीं होती है तथा पुनःपुनः जन्म तथा मृत्युके चक्रमें चलते रहते हैं. (४७)

'ज्ञानिनाम् अपि चेतांसि देवी भगवती हि सा।
बलाद् आकृष्य मोहाय महामाया प्रयच्छति' ।।४८।।

'वह भगवती देवी महामाया ज्ञानीओंके चित्तोंको बलपूर्वक मोहित कर देती है.' अर्थात् ज्ञानीजन भी मोहित हो जाते हैं''(मार्कंडेय.पु. अ.८१). (४८)

केचिद् एव तु वेदार्थं प्रसादात् सद्गुरोर्हरेः।
विनिश्चित्य भजन्तस्तं मुच्यन्ते प्राप्नुवन्त्यपि।।४९।।

जबकि कुछ लोग तो गुरु तथा हरिकी कृपासे निश्चयपूर्वक प्रभुका आश्रय करके मुक्त तो होते ही हैं, साथ ही साथ प्रभुको प्राप्त भी कर लेते हैं. (४९)

नित्यं स्वरूपम् अखिलम् आविर्भाव्य स्वयं तिरोभाव्य।
रममाणम् अविहतेच्छं हृत्पदके हीरकं विरचयाच्छं।।५०।।

अपने समग्र नित्य स्वरूपका स्वयं ही आविर्भाव करके स्वयं ही उसका तिरोभाव करके क्रीडाकी अखंड इच्छावाले सुंदर मणिरूप भगवानको हृदयरूपी पदकके ऊपर बिराजमान कर लो. (५०)

इति श्रीमद्वल्लभाचर्यमतवर्त्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज
गोवर्द्धनशीघ्रकवि विरचिते वेदान्तचिन्तामणौ
प्रपञ्चसत्यत्वनिरूपणं नाम तुर्य्यं प्रकरणम्।।४।।

d

आविर्भावतिरोभावनिरूपणं नाम
पञ्चमं प्रकरणम्

ननूत्पत्तिः घटस्यास्ति ध्वंसोऽप्यस्य विलोक्यते।
कथं वाच्या प्रपञ्चान्तःपातिनः तस्य नित्यता ।।१ ।।

शंका= घट उत्पन्न होता है तथा उसका नाश भी दिखाइ देता है, तो इस प्रपंचमें रहा हुआ घट नित्य है ऐसा कैसे कहा जा सकता है? अनादि पदार्थ को अनंत होनेसे नित्य कहा जा सकता है, परंतु नश्वर को नित्य कैसे कहा जा सकता है? (१)

[१]अनन्तं सत्यनादित्वे नित्यम् इत्युच्यते कथम्।
नश्वरं नित्यम् इति [२]चेद् यथैतत् कथ्यते तथा ।।२ ।।
घटे नष्टे तु किं नष्टं नाकारोऽन्यत्र[३] दृश्यते।
न मृत्तिका प्रस्थमिता चैतावत्येव लभ्यते ।।३ ।।
न नष्टा घटसंज्ञाऽपि शब्दानां नित्यता यतः।
सृष्ट्यारम्भाद् अनेके स्युः ध्वस्तास्ते सा तु विद्यते ।।४ ।।

१.पूर्वः पक्षः. २.उत्तरः पक्षः. ३.घटान्तरेषु.

उत्तर यह है कि घटका जब नाश होता है तब वह आकाररूपमें अन्य स्थान पर नहीं है, द्रष्टिगोचर नहीं है, परंतु मिट्टीका तो नाश नहीं होता है. घटके परिमाणके अनुरूप उतनी ही मिट्टी वहां पडी रहती ही है, तथा घट ऐसी संज्ञा का भी नाश नहीं होता है, क्योंकि शब्द तो नित्य है. सृष्टिके आरंभसे अद्यावधि अनेक घट हुए तथा उन सभीका नाश भी हो गया है तथापि घटकी संज्ञा तो रही हुई ही है. (२-३-४)

किन्त्वाकारमृदोर्यो अभूत् संज्ञाया वाचकत्वतः।
तत्राकार तिरोधाने संयोगः स न वर्त्तते ।।५ ।।

मात्र उस संज्ञाको कहनेवालेका तथा आकारका तथा मिट्टीका जो संयोग हुआ था, उस आकारमात्रका तिरोधान हुआ होनेसे वह नहीं है. (५)

सर्वाकारो हरिः पूर्ण एकैकाकारतः पृथक्।
बहत्वम् इच्छन् रूपाणि चकार द्विविधान्यपि[१] ।।६ ।।

१.चराचराणि.

सभी आकारोंवाले भगवान हरि पूर्ण है तथा एक-एक आकारसे भिन्न भी हैं. प्रभुने अनेक होनेकी इच्छा प्रकट की और जड-चेतन (अथवा आविर्भाव-तिरोभाववाले आकार) ऐसे दो रूपवाले हो गए. (६)

सर्ववर्णानुपूर्वीकैः शब्दैः वाच्योऽर्थतः स्वयम्।
व्यवहाराय नामान्यप्येकैकस्येच्छया व्यधात्॥७॥

सभी अक्षरोंवाले शब्दोंसे तथा अर्थोंसे वह स्वयं ही संज्ञा प्राप्त करते हैं तथा जगतके व्यवहारको चलानेके लिए अपनी इच्छासे एक-एक संज्ञाको स्वतंत्र करते हैं. (७)

''सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन् यदास्ते''।
'तद्धेदं तर्ह्यव्याकृतम् आसीत् तन्नामरूपाभ्यां व्याक्रियत'॥
'नामरूपे व्याकरवाणी'त्याद्याः श्रुतयोऽवदन्।
तच्चित्तौ बृहदारण्ये छान्दोग्येऽन्यत्र च क्रमात्॥८॥

'सभी रूप भिन्न-भिन्न करके उन्हें संज्ञा देकर उन नामोंको कहते हुए धीरपुरुष (प्रभु) बिराजते हैं.', 'पूर्वमें जो कुछ भी था वह अव्याकृत था. उन्हें नाम तथा रूप देकर व्याकृत किया.' 'नाम तथा रूपोंको प्रकट करता हुं' - इन सभी श्रुतियोंमें तच्चिति, बृहदारण्यक तथा छांदोग्य तथा अन्य शास्त्रोंमें भी इस बातकी स्पष्टता की गइ है. (८)

कम्बुग्रीवादिमान् तेष्वाकारो यो नियतः पुरा।
योगः तावन् मृदः तस्य चोत्पत्तिरिति कथ्यते॥९॥

घटमें कपाल, कम्बुग्रीव आदि जो आकार थे, उनका मिट्टीके साथ योग करनेपर हम उन्हें उत्पन्न हुआ कहते हैं. (९)

अयम् अर्थः पदाद् अस्माद् बोध्येत्थं स्वनामसु।
स्वीयेष्वेकैकरूपेषु संकेतो यः पुरा कृतः॥१०॥
तस्मात् परंपराप्राप्तात् तथा[१] व्यवहृतेस्तयोः।
योगं घटेत्यानुपूर्वी वक्ति वाच्यतया तदा॥११॥
व्यवहारा भवन्त्यस्मात् ते जलानयनादयः।
य आकारानुसाराद् वा सृष्ट्वा नियमिताः पुरा॥१२॥

१. प्राप्ताः तथा इति पुरातनः पाठः.

'इस शब्दमेंसे ये अर्थ बताओ' इस प्रकारसे अपने ही एक-एक रूपको अपने उन-उन नामोंको देकर जो संकेत पहले किया था, वह परंपरा चलती रही तथा नाम-रूपका व्यवहार हुआ. जो संयोग हुआ, उसे घट संज्ञा दी; वह उसका नाम हुआ. उस घटसंज्ञायुक्त रूपको लेकर जल भरकर लाना आदि आकारके अनुसारी व्यवहार निश्चित करनेमें आए और तदनुसार उपयोग प्रारंभ हुआ. (१०-११-१२).

अनन्तरं [१]तथेच्छातो निमित्तीकृत्य किञ्चन[२]।
तिरोभाव्यत आकारः क्रियते मृल्लयो मृदि ।।१३।।
घटशब्दस्य[३] वाच्यस्त्व दृश्यो योगो वियोगतः।
तत्राप्रवृत्तेः संज्ञाया नष्टो घट इतीरणा ।।१४।।

१. अदृष्टो भवतु इति मूलेच्छातः. २. पतनदण्डाघातादि. ३. घटशब्दस्य वाच्यो योगस्तु (आकारमृदो योगएव घटवाच्य इति) वियोगतः अदृश्यो (भवति). (अतएव) तत्र संज्ञाया अप्रवृत्तेः 'घटो नष्ट' इति ईरणा (भवति). सर्वत्र 'दृश्य' इत्येव पाठः. तदा तु 'घट'शब्दस्य वाच्यस्तु दृश्यो योगः वियोगतः तत्र संज्ञाया अप्रवृत्तेः घटोः नष्ट इति ईरणा इति अन्वयः.

तदुपरांत उस पदार्थका तिरोधान करनेकी इच्छा होनेपर किसी प्रसंगको निमित्त बनाकर आकारको तिरोहित किया गया तथा मिट्टीका मिट्टीमें लय किया गया. जिस योगके कारण उस आकारको घट कहा गया था, वही वियोगके कारण अदृश्य हुआ और वही घट संज्ञा अनुपयोगी बननेसे घटका नाश हुआ ऐसा कहा जाता है. (१३-१४)

पृथूदरत्वाद्याकारः समग्रस्तु तिरोहितः।
भिन्नभिन्ना य आकारा दृश्यन्तेऽवयवेषु ते ।।१५।।
पूर्वाकाराशभूता हि घटस्य शकला इव।
तेषामपि तिरोधानं यदाणुत्वं भवेत् तदा ।।१६।।

मोटा पेट आदि सभी आकार तिरोहित किये गए. अंगोंमें भी विविध आकार थे, घटके टुकडे, उनके पूर्वके अंश आदि सभी जब अणुरूप हो गए तब उन टुकडोंका भी तिरोधान हो गया. (१५-१६)

वस्तुनो विद्यमानस्य जीवानुभवयोग्यता।

आविर्भावः तिरोभावः अतोऽन्यथेति[१] हि लक्षणम् ।।१७।।

१. विद्यमानस्य वस्तुनो जीवानुभवयोग्यतातिरोभावः इति भावः.

जिस वस्तुका अस्तित्व होता है, उसका अनुभव करनेकी जीवकी जो योग्यता होती है, उसे आविर्भाव कहा जाता है, तथा उस योग्यता का न रह जाना तिरोभाव कहलाता है. यह इनके लक्षण हुए. (१७)

आविर्भावतिरोभावौ उत्पत्तिर्नाश इत्यपि।

शास्त्रविद्भिः विकल्प्येते विदुः ब्रह्मविदस्तु तौ ।।१८।।

शास्त्रको जाननेवाले आविर्भाव तथा तिरोभाव को अनुक्रमसे उत्पत्ति तथा नाश भी कहते हैं. किन्तु ब्रह्मवेत्ता तो आविर्भाव-तिरोभाव ही कहते है. (१८)

'तद् एतद् अक्षयं नित्यं जगन् मुनिवराखिलम्।

आविर्भाव-तिरोभाव जन्मनाश विकल्पवत्' ।।१९।।

[१]इति विष्णुपुराणेऽपि प्रथमांशे निरूपितम्।

उक्तं भागवतेऽप्येतद् दशमे हरिणा स्वयम् ।।२०।।

'हे मुनिवर! यह आविर्भाव तथा तिरोभाव अथवा जन्म तथा नाशवाला यह जगत अक्षय तथा नित्य है'(श्रीभाग.पु.१०।२२।५९) ऐसा विष्णुपुराणके प्रथम अंशमें कहा है तथा भागवतके दशमस्कंधमें तो भगवानने स्वयं कहा है. (१९-२०)

'खं वायुः ज्योतिरापो भूः तत्कृतेषु यथाशयम्।

आविस्तिरोऽल्पो भूर्येको नानात्वं यात्यसौ अपि' ।।२१।।

आकाश, वायु, तेज, जल तथा पृथ्वी- ये सभी प्रभु द्वारा निर्मित है. उनमें कहीं कुछ अधिक तथा कहीं कुछ न्यून, ऐसी विविधतामें आविर्भाव-तिरोभावयुक्त भगवान ही बिराजते है. (२१)

'तस्यैवं विजानतएवं[१] मन्वानस्ये'त्युपक्रम्य,।

आविर्भावतिरोभावौ आत्मनोऽन्नमात्मन इति श्रूयते ।।२२।।

१. छान्दोग्ये.

'इस प्रकारसे ज्ञानको धारणकरनेवाले ऐसा मानते हैं' वचनसे आरंभ

करके 'आविभार्व तथा तिरोभाव अपने ही अन्नरूप है' ऐसा छांदोग्य उपनिषदमें प्राप्त होता है. (२२)

स्पष्टं श्रुत्यन्तरे केन बृहदारण्यकादिमे।
मार्कण्डेयपुराणेऽपि तुर्येऽध्याये निरूप्यते ।।२३।।

केन, बृहदारण्यक आदि अन्य उपनिषदोंमें तथा मार्कंडेय पुराणके चौथे अध्यायमें भी यही तथ्य निरूपित हुआ है. (२३)

[१]आविर्भावतिरोभाव दृष्टादृष्टविलक्षणम्।
वदन्ति यत् सृष्टम् इदं तथैवान्ते च संहृतम् ।।२४।।

१. श्लो.३९

आविर्भाव तथा तिरोभाव, यह देखा हुआ तथा यह नहीं देखा हुआ, ऐसे लक्षणोंवाला यह जगत उत्पन्न हुआ है तथा अंतमें उसे लीन कर लिया जाएगा, ऐसा कहा गया है. (२४)

[१]पुराणे ब्रह्मवैवर्त्ते खण्डे श्रीकृष्णजन्मनः।
एकविंशे तथाध्याये नन्दादीन् कृष्ण आह तत् ।।२५।।

१. श्लो. ९ तथा श्लो.१२१

ब्रह्मवैवर्तपुराणमें श्रीकृष्णजन्मखंडके २१वे अध्यायमें श्रीकृष्णने नंदरायजीको कहा हैः (२५)

'स्थाने स्थाने पृथिव्यां च काले काले यथोचितम्।
ईशेच्छयाविर्भूतं हि न भवेत् प्रतिबन्धकम् ।।२६।।
ब्रह्माण्डं वा कतिविधम् आविर्भूतं तिरोहितम्।
विधेया वा कतिविधाः तस्य भ्रूभंगलीलया' ।।२७।।

पृथ्वीमें स्थान-स्थानपर तथा समय-समयमें ईश्वरकी इच्छाके अनुरूप आविर्भाव हुआ है; अतः उस कार्यमें कोई व्यवधानरूप बनता नहीं है. कितने ही ब्रह्मांडोंका आविर्भाव तथा कितनोंका ही तिरोधान भी; तथा प्रभुकी भ्रूभंगोंको चलाने मात्र से ही कितनी-कितनी ऐसी (जगतरूपी) क्रीडा हो जाती है. (२६-२७)

देहोऽपि पंचभूतेभ्य आविर्भूतः तद् इच्छया।
योगोत्र योग्यभागानां तेषां[१] तत् तादृग् आकृतेः[२] ।।२८।।

१. पंचभूतानाम्. २. सा च तादृग् आकृतिश्च इति.

प्रभुकी इच्छासे पंचमहाभूतोंमेंसे देहोंका आविर्भाव हुआ है. जहां जैसा इच्छित हो, ऐसे अंगोंके संयोगसे उन-उन आकारानुसार उत्पत्ति हुई है. (२८)

कर्मानुसारतः जीवः तावत् कालं भुनक्ति तम्।
व्यवहाराः तदा तस्मिन् स्युः मनुष्यगवादयः ।।२९।।

कर्मोंके अनुसार जीव उतने समयके लिए तदनुसार देहोंका भोग करते है, तब-तब ऐसे देहमें यह मनुष्य है, यह गाय है, इस प्रकारके व्यवहार होते हैं. (२९)

परतन्त्रः स तांस्त्यक्त्वा यदा देहान्तरं व्रजेत्।
वियुज्यन्ते दह्यमाने देहे [१]तान्याकृतिः तथा।।३०।।

१. भूतानि.

पराधीन वह जीव जब अन्य देहमें जाता है, तब देहका नाश हो जानेपर पूर्वके पंचमहाभूतोंके आकार एकदूसरेसे पृथक् हो जाते हैं. (३०)

आकारः तु तिरोधत्ते तेजो लीयेत तेजसि।
श्वासादिरूपो यो वायुः सोऽवशिष्टस्तु तं[१] विशेत्।।३१।।

१. महान्तं वायुम्.

आकारका तिरोधान होता है, तेजका लय तेजमें हो जाता है, श्वास आदिके रूपमें जो वायु बचती है वह भी वायुमें लीन हो जाती है. (३१)

आकारबद्ध आकाशः तत् तिरोधानतो [१]गतः।
जलं तेजसि भूमौ वा भूमिः भस्मादिरूपतः ।।३२।।

१. महाकाशे इति शेषः.

आकाशका जो आकार देहमें बंध गया था, वह भी तिरोहित हो जाता है, जल भी तेजमें अथवा पृथ्वीमें तथा पार्थिव अंग भस्म होकर पृथ्वीमें ही मिल जाता है. (३२)

वियुक्तान्यपि विद्यन्ते संज्ञाया अप्रवृत्तितः।
[१]संयोगस्याभिधेयत्वात् नष्टोऽसौ इति गद्यते ।।३३।।

१.संयोगस्य 'घट'इति अभिधेयत्वात् संज्ञाया अप्रवृत्तेः इत्यन्वयः.

उन सभी महाभूतोंका तथा अंगोंका लय हो जाने पर भी उन महाभूतोंका अस्तित्व तो रहता ही है. जिस संयोग विशेषके कारण उन्हें वह संज्ञा दी गई थी, वह संज्ञा मात्र रुक जाती है और उसकी मृत्यु हो गइ ऐसा व्यवहार देखा जाता है. (३३)

मुक्ताभिः ग्रथ्यते मध्ये निधाय पदकान्यपि।

[१]गुणैः तेषां स संयोगो हार इत्यभिधीयते ।।३४।।

१. मुक्तापदकादीनाम्.

बीचमें गांठ लगाकर तंतुओंमें मोतियोंको गुंथा जाता है. इन सभीका संयोग ही उसे 'आभूषण–हार' की संज्ञा प्रदान करता है. (३४)

मुक्तादीनां वियोगे न हारसंज्ञा प्रवर्त्तते।

संयोगविगमौ एव [१]तौ नैकस्यापि हि क्षयः ।।३५।।

१. व्यवह्रियमाणौ उत्पत्तिनाशौ इति अर्थः.

मोतियोंको पृथक् कर देनेपर उसकी संज्ञा हार नहीं रह जाती है. इसमें संयोग तथा वियोग, यह दो पदार्थ ही हैं, उनमेंसे भेदका भी क्षय नहीं होता है. (३५)

'यथा क्रीडोपस्कराणां संयोगविगमाविह।

इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम्' ।।३६।।

जिस प्रकार खिलाडीकी इच्छानुसार खेलके साधनोंका संयोग तथा वियोग होता है, उसी प्रकार ईश्वरकी इच्छासे मनुष्योंका संयोग और वियोग होता है. (३६)

इत्युक्तं प्रथमे स्कन्धे 'तृतीयेऽपि विवेचितम्।

''तन्निरोधोऽस्य शयनम् आविर्भावस्तु सम्भवः'' ।।३७।।

इस प्रकार भागवतके प्रथम स्कंधमें कहा है तथा तृतीय स्कंधमें स्पष्ट कहा गया है– ''इस सृष्टिकी प्रक्रियाको रोक देनेकी क्रिया प्रभुका शयन है तथा जो आविर्भाव है, वह जागरण है. (३७)

कार्यं कारणरूपेण तिरोभावे तु विद्यते।

आविर्भावे तु तद् रूपं तदिच्छातः विभिद्यते ।।३८।।

तिरोभावकी अवस्थामें कार्य अपने कारणरूपमें रहा होता है, तथा जब

आविर्भाव होता है तब प्रभुका ही रूप प्रभुकी इच्छानुसार भिन्नताको धारण करता है. (३८)

स एव प्रोयते हारः पुनः प्रोतुं यदीष्यते।
आविष्कुर्यात् तमेवैवं देहम् इच्छेद् यदीश्वरः ।।३९।।

जब हारको पुनः पिरोनेकी इच्छा होती है तब उसी हारको पिरो लिया जाता है, उसी प्रकार ईश्वर जब इच्छा प्रकट करते हैं तब इसी आविर्भावकी प्रक्रियासे उसी देहको आविर्भूत करते हैं. (३९)

मुद्रिकान् इष्टमाणिक्यं कुण्डले जटितं तथा।
परवान् ईशितुः जीवः तनुं याति तथेतराम् ।।४०।।

अंगूठीमें रहे हुए माणिकको जैसे वहांसे हटाकर कुंडलमें जड दिया जाता है, उसी प्रकार ईश्वर जब इच्छा करते हैं तब उसी देहका आविर्भाव करते हैं. (४०)

‘‘[1]वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही’’ ।।४१।।

‘जिस प्रकार मनुष्य पुराने वस्त्रोंको त्यागकर दूसरे वस्त्रोंको धारण करते हैं, उसी प्रकार जीव पुराने देहका त्याग करके नूतन देहोंसे जुड जाता है’(भग. गीता.२।२२) (४१)

मुद्रिकायाम् इन्द्रमणिः तस्यां जड्यत इच्छया।
परकायप्रवेशादौ जीवस्यावस्थितिः तथा ।।४२।।

जडत करनेवालेकी इच्छानुसार अंगूठीमें इंद्रमणिको जडा जा सकता है, उसी प्रकार पराये देहमें स्थित जीवात्माके प्रवेशकी भी स्थिति है. (४२)

तस्या तदेव माणिक्यं शक्यते जटितुं पुनः।
तथाविर्भाव्य तान् एव क्वचिद् दर्शयति प्रभुः ।।४३।।

उसमें स्थित मणिको उसी अंगूठीमें पुनः जडा जा सकता है, उसी प्रकार आविर्भूत करके प्रभु पुनः उन्हीं देहोंको भी दिखाते हैं. (४३)

भारते दर्शिताः सर्वे प्रादुर्भाव्य तएव हि।
व्यास द्वारा तु तत् स्पष्टं पर्वण्याश्रमवासिके ।।४४।।

महाभारतके युद्धके समाप्त होनेके बाद मृतकोंको प्रगट करके पुनः उन्हें

दिखाए जानेका प्रसंग 'आश्रमवासिक पर्व'में स्पष्टरूपसे वर्णित ही है. (४४)

'सर्वे भवन्तो गच्छन्तु नदीं भागीरथीं प्रति ।
ततो द्रक्ष्यथ सर्वान् तान् ये हताः स्म रणाजिरे'।।४५ ।।

'तुम सब गंगा नदीकी ओर जाओ. जो रणसंग्राममें मृत्यु प्राप्त हुए थे, उन भीको वहां देखोगे.' (४५)

ततः सर्वे सदाराः तत्र गत्वावगाह्य रात्रौ व्यासाश्रमं जग्मुः ।
'ततो व्यासो महातेजाः पुण्यं भागीरथीजलम् ।
अवगाह्याऽऽजुहावाथ सर्वान् लोकान् महामुनिः ।।४६ ।।
पाण्डवानाञ्च ये योधाः कौरवाणाञ्च सर्वशः।
राजानश्च महाभागा नानादेशनिवासिनः ।।४७ ।।
ततः सुतुमुलः शब्दः जलान्ते जनमेजय ।
प्रादुरासीद् यथा पूर्वं कुरुपाण्डवसेनयोः ।।४८ ।।
ततः ते पाण्डवाः सर्वे भीष्मद्रोणपुरोगमाः ।
ससैन्याः सलिलात् तस्मात् समुत्तस्थुः सहस्रशः'' ।।४९ ।।

तब अपनी पत्नीओंके साथ वे सभी गंगाजीके निकट गए, वहां स्नान किया तथा रात्रिको व्यासजीके आश्रममें गए. वहां महातेजस्वी महामुनि व्यासजीने गंगाके जलमें स्नान करके उन सभी लोगोंका आहुतियों द्वारा आह्वाहन किया. वे कौन-कौन थे? पांडवों तथा कौरवोंके पक्षके जो योद्धा, विभिन्न देशोंके महाभाग्यशाली राजा, तब हे जनमेजय! पानीमें भयानक शब्द प्रकट हुआ, पूर्वमें पांडवों तथा कौरवोंकी सेनामें हुआ था तत्समान ही. उस समय भीष्म तथा द्रोण जिनके अग्रभागमें हैं, ऐसे पांडव अपने सैन्यके साथ जलमेंसे हजारोंकी संख्यामें खडे हुए. (४६-४९)

इत्यादिना प्रत्येकं नाम्ना निरूप्य उवाच

''एकां रात्रिं विहृत्यैवं ते वीराः ताश्च योषितः ।
आमन्त्र्याऽन्योन्यमाश्लिष्य ततो जग्मुः यथागतम्''।।५०।।

आगेके श्लोकोंमें प्रत्येकको नामसे तथा वर्ण द्वारा बुलाए भी. 'उस रात्रि उन पुरुषों तथा स्त्रियोंनें विहार करके, जैसे आए थे उसी प्रकार पुनः लौट गए.

एतद् आकर्ण्य जनमेजयो अन्वयुङ्क्त

'कथञ्च त्यक्त देहानां पुनः तद् दर्शन'मिति।

तदानीं वैशम्पायन उवाच

'अविप्रणाशः सर्वेषां कर्मणाम् इति निश्चयः ।।५१ ।।

यह सुनकर जनमेजयने प्रश्न कियाः– 'जिन्होंने देहका त्याग किया है उनका पुनः दर्शन कैसे हो सकता है?' तब वैशम्पायनने उत्तर दिया कि 'सभी कर्मोंका कभी नाश नहीं होता है.' (५१)

कर्मजानि शरीराणि तथैवाकृतयो नृप! ।

महाभूतानि नित्यानि भूताधिपतिसंश्रयात्' ।।५२ ।।

शरीर कर्मोंसे निर्मित है उस प्रकार, है राजा! आकृतियां भी कर्मसे ही निर्मित है. भूतोंके स्वामी प्रभुका आश्रय लिए हुए महाभूत नित्य हैं. (५२)

इत्यादि एतद् अग्रे –

'अविनाशी तथा नित्यः क्षेत्रज्ञ इति निश्चयः ।

भूतानाम् आत्मभावो यो ध्रुवोऽसौ सम्प्रजानताम्'।।५३।।

क्षेत्रज्ञ जीव अविनाशी तथा नित्य है यह सत्य है. विशिष्ट ज्ञानवान् भूतोंका जो आत्मभाव है वह भी अचल है. (५३)

इत्यादि भारते प्रोक्तम् अन्यत्रापि स्फुटन्त्विदम् ।

संग्रहीतम् इदं विद्वन्मण्डने प्रभुभिः स्वयम् ।।५४ ।।

यह तथ्य महाभारतमें कहा गया है तथा अन्य स्थलोंमें भी स्पष्ट है. श्रीगुसांइजीने विद्वन्मंडनमें भी इन विषयोंका संग्रह किया है. (५४)

संयोगविगमौ तस्माद् देहादेः भाष्यकृत् ततः ।

व्यधात् क्वचित् च सदसत् प्रपञ्चे गणनाम् अपि ।।५५ ।।

इसीलिए भाष्यकार श्रीमहाप्रभुजीने देहादिका संयोग तथा वियोग कहा है; तथा कहीं सत् तथा असत् प्रपंचको लेकर निरूपण किया भी है. (५५)

क्रीडार्थम् आविर्भवति नानारूपैः निजेच्छया ।

सर्वधर्मान् तिरोधत्ते शक्तिमान् भगवान् स्वयम् ।।५६ ।।

''आविर्भाव–तिरोभावौ शक्ती वै मुरवैरिणः'' ।

इत्याचार्यैः सङ्गृहीताद् वचनात् शक्तिता तयोः ।।५७ ।।

शक्तिवाले भगवान क्रीडा करनेके लिए अपनी इच्छासे अनेक प्रकारके रूपोंसे आविर्भूत होते हैं तथा अपने धर्मोंका तिरोधान भी करते हैं. 'आविर्भाव तथा तिरोभाव मुरारिकी शक्ति हैं' ऐसा आचार्यश्री द्वारा संग्रहीत वचनोंसे भी स्पष्ट होता है. (५६-५७)

''पराऽस्य शक्तिः विविधैव श्रूयत'' इति श्रुतिः।

'यः सर्वज्ञः सर्वशक्ति'रिति सर्वास्विमास्वपि ।।५८ ।।

उपनिषदोंमें कहा है कि- प्रभुकी पराशक्ति अनेक प्रकारकी है. जो सर्वज्ञ है, सर्व शक्तिधारी है, ऐसा दूसरी श्रुतियोंमें भी कहा गया है. (५८)

आविर्भावयतीत्येका तिरोभावयतीतरा।

[१]तत् कार्यम् आविर्भवनं तिरोभवनमप्यथ ।।५९ ।।

१. तयोः आविर्भावतिरोभावयोः कार्यम्.

एक शक्तिसे आविर्भाव होता है, दूसरी शक्ति तिरोभाव करती है. इन दो शक्तियोंके ही कार्य आविर्भाव तथा तिरोभाव है. (५९)

[१]यद्रूपकर्मकमयम् आविर्भवनम् इच्छति।

तयाविर्भावयति तत् तिरोभावेऽप्ययं क्रमः ।।६० ।।

१. ननु तयोः नित्यत्वात् सर्वदा सत्वात् सर्वेषां पदार्थानां सर्वदा प्रत्यक्षम् अप्रत्यक्षं वा कुतो न? इति तर्कयन् परिहरति.

जिन प्रकारके रूप तथा कर्मवाली आविर्भाव क्रिया करनेकी प्रभु इच्छा प्रकट करते हैं, उससे उनका आविर्भाव होता है; तिरोभावमें भी यही क्रम है. (६०)

नित्ये ते भगवच्छक्ती न कार्यं युगपत् तयोः।

सर्वात्मा शक्तिमान् किन्तु यद्यत् कर्मकम् इच्छति ।।६१ ।।

गमनादानशक्ती तु वर्त्तेते चरणे करे।

देहीच्छया तयोः कार्यं तदभावे प्रसुप्तता ।।६२ ।।

यह दोनों ही शक्तियां नित्य हैं, परंतु दोनोंके कार्य एक ही समय नहीं होते हैं. सभीकी आत्मारूप भगवान सर्वशक्तिमान् हैं, तथापि वो कार्य करनेकी इच्छा करते है, तब चरण, हस्त आदिमें अनुक्रमसे गमन करनेकी तथा ग्रहण करनेकी शक्ति ही प्रकट होती है. देहीकी इच्छाके अनुसार इन शक्तियोंका

उपयोग किया जाता है. जब शक्तिका उपयोग नहीं है, तब वह ऐसे ही पडी रहती है, जो उसकी सुषुप्तिकी दशा है. (६१-६२)

ब्रह्मनिष्ठम् इदं सर्वं तस्याविर्भवतीच्छया।
जात उत्पन्न इत्याद्या तस्मिन् व्यवहृतिः तदा ।।६३ ।।

ब्रह्ममें निष्ठा-स्थितिवाला यह जगत उनकी इच्छा से ही आविर्भूत होता है, तब वह जन्मा, उत्पन्न हुआ आदि व्यवहार किये जाते हैं. (६३)

[१]आविर्भावो हि जननं प्रादुर्भावे जनिर्यतः।
उत्पूर्वो वा पद गतौ धातुरुत्पत्तिरुद्गमः ।।६४ ।।

१. शब्दशास्त्रेणापि जन्मोत्पत्ति-नाश-मृतिशब्दाः संयोगविगमवाचका एव सिद्ध्यन्ति इति वैनाशिकार्धवैनाशिकान् कटाक्षयन् आह.

आविर्भाव-प्रादुर्भाव अर्थात् जन्म. उत्पत्ति शब्दमें पद् धातु गतिवाचक है, उसे उद् उपसर्ग लगकर अर्थ उद्गम होता है. (६४)

न दृश्यते तिरोभूतं वस्तु ब्रह्मणि तन्मयम्।
यथा जवनिकाच्छन्नं पटादि न विलक्ष्यते ।।६५ ।।

जैसे पर्देके पीछे रहे हुए वस्त्रादि दिखाइ नहीं देते हैं, उसी प्रकार तिरोहित वस्तु ब्रह्ममें ब्रह्मरूपतासे स्थित होनेसे प्रतीतिगोचर नहीं बनती है. (६५)

नाशमाप्तो नाशमाप्त इति व्यवहृतिः तदा।
वस्तुतोऽदर्शनं नाशो नश्धातुरदर्शने ।।६६ ।।

उस समय पदार्थका नाश हुआ है ऐसा व्यवहार किया जाता है. वस्तुका दिखाइ न देना उसका नाश कहा जाता है. संस्कृतमें नश् धातुका अर्थ है दिखाइ न देना. (६६)

चेतने व्यवहारस्तु मृत इत्यपि जायते।
प्राणत्यागे हि मृङ् प्राणः सङ्घातस्थो वियुज्यते ।।६७ ।।

चेतन पदार्थके विषयमें यह मर गया, ऐसा व्यवहार किया जाता है. संस्कृतमें मृ धातुका अर्थ भी प्राणत्याग है, अर्थात् संघात (देहादिके साथ स्थिति) में रहे हुए प्राणका पृथक् हो जाना. (६७)

जीवोपाधिः स संघातो जीवेन सह गच्छति।

जीवदेहवियोगोऽतो मृतिः इत्यभिधीयते ।।६८ ।।

जीवकी उपाधिवाला संघात जीवके साथ ही चला जाता है, अतः जीव और देहका वियोग ही मरण कहलाता है. (६८)

तौ धात्वर्थविचारे तु व्यवहारेऽपि सिद्ध्यतः ।

नाशोत्पत्ति विकल्पस्तु अपरिनिष्ठधियाम् अयम् ।।६९ ।।

धातुओंके अर्थकी द्रष्टिसे यह स्थिति है, ऐसी ही स्थिति व्यवहारमें भी सिद्ध है, 'इसका नाश' 'इसकी उत्पत्ति' ऐसे विचार जिनकी बुद्धि स्थिर नहीं है, उन्हें आता है. (६९)

नाशोत्पत्तिविदां शोकोऽप्यनित्यत्वधिया भवेत् ।

नित्यत्वज्ञा ब्रह्मनिष्ठा न विमुह्यन्ति कर्हिचित् ।।७० ।।

नाश तथा उत्पत्तिका विचार रखनेवालोंको जो शोक होता है वह 'पदार्थ अनित्य है' ऐसे विचारके कारण होता है. पदर्थोंका नित्यत्व जाननेवाले ब्रह्मनिष्ठ पुरुषोंको कभी भी कहीं भी मोह नहीं होता है. (७०)

नित्यत्वं बोधितं स्पष्टं गीतासु हरिणा स्वयम् ।

अज्ञानस्य विनाशाय ततो नष्टाऽर्जुनस्य शुक् ।।७१ ।।

अज्ञानका विनाश करनेके लिए गीताजीमें प्रभुने स्वयं ही नित्यत्वका उपदेश किया है, जिसके कारण अर्जुनका मोह नष्ट हुआ. (७१)

''न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।

न चैव न भविष्यामः सर्वे वयमतः परम्'' ।।७२ ।।

न मैं था न तुं, और न ही ये सभी राजा थे. हम सब होंगे या नहीं, परंतु जो कुछ भी है वह इन सभीसे पर है, नित्य है. (७२)

दृश्यमान प्रपञ्चस्य मिथ्यात्वं सुप्रमाणतः ।

महतैव प्रपञ्चेन भाष्यकारो निरस्तवान् ।।७३ ।।

यह जो कुछ भी जगतमें देखनेमें आता है, उसके मिथ्यात्वका निराकरण भाष्यकार श्रीवल्लभाचार्यजीने विस्तारपूर्वक अनेक प्रमाणों द्वारा सिद्ध किया ही है. (७३)

विस्तृतं रूपम् अनयोः आचार्यचरणादिभिः ।

बालबोधोपयोग्येव सङ्क्षेपेणेह वर्णितम् ।।७४ ।।

श्रीमहाप्रभुजीने आविर्भाव और तिरोभावके स्वरूपका विस्तार किया है. यहां तो बालबुद्धिवालोंको बोध हो इसलिए संक्षिप्तमें वर्णन किया है. (७४)

तस्मात् क्रीडास्पदं विश्वं नित्यं भगवदात्मकम् ।
आविर्भावतिरोभावशालि वेदादिषूदितम् ।।७५ ।।

इसीलिए क्रीडाके स्थानरूप यह विश्व नित्य है तथा भगवत्स्वरूप है तथा आविर्भाव तिरोभाव धर्मवाला है ऐसा वेदादिमें कहा गया है. (७५)

तद्ध्यानमानसः स्या एकोप्यविकारएव यो भवति ।
रमणेच्छया बहुविधः कुर्वंश्चर्यां महाश्चर्याम् ।।७६ ।।

जो प्रभु एक तथा अविकारी होने पर भी रमण करनेकी इच्छासे अनेक प्रकारके बडे-बडे आश्चर्यकारी चरित्र करते हैं, उनके ध्यानमें चित्तको आरोपित कर दो. (७६)

इति श्रीमद्वल्लभाचार्यमतवर्त्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज गोवर्द्धनशीघ्रकवि विरचिते वेदान्तचिन्तामणौ आविर्भावतिरोभावनिरूपणं नाम पञ्चमं प्रकरणम् ।।५ ।।

d

अविकृतपरिणामनिरूपणं नाम
षष्ठं प्रकरणम्

य आविर्भावयत्यत्ति बाह्यान्तर रतीच्छया।

[१]समवाय्यप्यविकृतः तस्मै भगवते नमः ।।१ ।।

१. तेन अस्मिन् प्रकरणे प्राधान्येन अविकृतपरिणामवादः प्रतिपाद्य इति द्योत्यते. अर्थात् ब्रह्म जगतः समवायिकारणमपि अविकृतम् इति वादः – शास्त्रार्थः. न च यद् यत् कारणं तत् तद् विशेषतश्च समवायिकारणं विकृतमेव दृष्टं यथा मृद् इति कथं पुनः ब्रह्म समवायि न विकृतं च इति उच्यते इति शंक्यम्. युक्त्या तथा असिद्धेः. वेदेनैव तथासिद्धेश्च. तथाहि, स्वरूपान्तरापत्तिः तर्हि विकारः साच मृदो न दृष्टा सुवर्णस्य वा. सिद्धेऽपि घटे कृष्णवर्णगुरुत्वगंधादिमती सा तावत्येव लभ्यत इति. संस्थानविशेषस्तु तस्या धर्मः स च तद्रूपएव. पृथगस्थितेः. सुवर्णं च समवायि अपि अविकृतमेव. अन्यथा शुद्धसुवर्णग्राही शुद्धसुवर्णमुद्रां तन्मुद्रिकां वा न गृह्णीयात्. 'तुष्यतु'न्यायेन लभ्यते वा क्वचिद् लोके समवायि विकृतम्. न तद् दृष्टान्तेन ब्रह्मणि विकार आपादयितुं शक्यः. 'अपहतपाप्मत्वा'दिश्रुतिभिः तस्य तथात्वेऽपि विकार–रहितत्वप्रतिपादनात्. लोकविलक्षणत्वाच्च. न च लोकविरुद्धं वेदोऽपि कथं प्रतिपादयेद् इति आशङ्क्यम्. ब्रह्मणो व्यापकत्वमिव अविकृतमपि लोकविरुद्धं समानम् इति गृहाण. ननु व्यापकत्वम् आकाशादौ दृष्टम् इति न विरुद्धम्. तर्हि लोके सुवर्णादीनां समवायित्वेपि अविकृतत्वम् अपि दृष्टचरम् इति चिरञ्जीव.

बाहर तथा अंदर रमण करनेकी इच्छासे जो आविर्भूत करते हैं तथा जो तिरोहित करते हैं, जो समवायिकारण होते हुए भी अविकारी हैं, उन भगवानको नमस्कार. (१)

सर्वत्र वादत्रितयं तद् अत्र सविस्तरं शास्त्रगणैरवर्णि।

आरम्भवादोऽथ [१]विवर्तवादस्तथा तृतीयःपरिणामवादः।।२।।

१. विवर्तो भ्रमः. विरुद्धं वर्तनं, तदभाववति तत्प्रकारकं ज्ञानमिति यावत्.

इस जगतमें सर्वत्र शास्त्रोंके समूहोमें तीन वादोंका विस्तार किया गया हैः आरंभवाद, विवर्तवाद तथा परिणामवाद.

[१]तत्र नित्यं विभु नभो वाय्वादीनां विविच्यते।

चतुर्णां [२]यत्र परमाणुरूपाणां तु नित्यता ।।३ ।।

१. वादत्रयमध्ये. २. यत्र चतुर्णां परमाणुरूपाणां वाय्वादीनां नित्यता, कार्यरूपाणि अनित्यानि (वाय्वादीनि) तेषां (तत्तत्परमाणूनां) आरम्भतोऽभवन् इत्यादि, ''इत्यादिरूप आरम्भवादः तार्किकसम्मत'' इत्यन्तो अन्वयः.

कार्यरूपाण्यनित्यानि तेषाम् आरम्भतोऽभवन्।
ईश्वरस्तु निमित्तं वा ब्रह्माभिन्नम् इदं जगत्॥४॥
न तदंशो विभुर्जीवः कालो द्रव्यान्तरं च सः।
इत्यादिरूप [१]आरम्भवादः तार्किकसम्मतः॥५॥

१. पृथिव्यादि परमाणूनां संयोगारम्भातः सृष्टिः इति नैय्यायिका मन्यन्ते.

इन तीन वादोंमें आरंभवाद तार्किकोंको तथा नैयायिकोंको मान्य मत है. इस वादका स्वरूप–''आकाश नित्य है और विभु है. वायु, तेज, जल तथा पृथ्वी इन चारों भूतोंकी नित्यताका निरूपण किया गया है. उनके आरंभमें जो कार्यरूप हुन्नए थे वे अनित्य हैं. इश्वर कार्यरूपोंके निमित्तकारण हैं. यह जगत ब्रह्मसे भिन्न है. इश्वरका अंशरूप जीव विभु नहीं है. काल एक अन्य द्रव्य है.'' (३–४–५)

तद् अद्वैतश्रुतिशतैः खण्डितं मोहनात्मकम्।
आचार्यैः प्राक्तनैरत्र न विस्तरभियोच्यते॥६॥

मोह उत्पन्न करनेवाले इस वादका पूर्वाचार्योंने अद्वैत निरूपक अनेक श्रुति प्रमाणों द्वारा खंडन किया है. विस्तार हो जानेसे उस विषयमें यहां कुछ भी कहा नहीं जा रहा है. (६)

असत्यं कल्पितं विश्वं भ्रान्त्या रज्जुभुजङ्गवत्।
स शांकराणां विवर्तवादः प्राग् इह दूषितः॥७॥

असत्य है; भ्रमसे रज्जुको सर्प मान लिया जाए उसी प्रकार मिथ्या है' – शांकरोंके इस प्रकारके विवर्तवादका निवारण पूर्वमें ही कर दिया गया है. (७)

प्राचीनाचार्यचरण–वह्निवाग्वार्धिवर्द्धितं[१]।
खण्डितो बहुधा शुद्धाद्वैतचन्द्रोदये मया॥८॥

१. सन्दिग्धः अर्थः.

प्राचीन आचार्योंने तथा अग्नि अवतार महाप्रभुजीरूप वाणीसे, सागरकी लहरोंके समान वृद्धि प्राप्त शुद्ध चंद्रोदय नामक मेरे ग्रंथमें मेरी तरफसे अनेक

प्रकारसे इस वादका खंडन किया है. (८)

सर्वं कार्यात्मना यत्र कारणं मृद्घटादिवत् ।

नाना परिणमत्येष परिणामः प्रकीर्तितः ।।९।।

मिट्टीमेंसे जैसे घट आदिका निर्माण होता है, उसी प्रकार जहां समग्र कारण कार्यरूप अनेक स्वरूपोंमें परिणमित होता है उसे परिणामवाद कहा जाता है (९)

विकृताविकृतत्वाभ्यां परिणामो द्विधा मतः ।

विकृतं सत् परिणमेत् कारणं कार्यरूपतः ।।१०।।

न पुनः कारणात्मत्वं[१] विकृतः सोऽभिधीयते ।

दुग्धाद् दधि यथा जातं पुनः दुग्धं न जायते ।।११।।

१. प्राप्त इति शेषः.

परिणामके विकृत तथा अविकृत ऐसे दो प्रकार हैं. विकृत सत् कारण तथा कार्यरूपमें परिणमित होता है तथा पुनः कारणका रूप प्राप्त नहीं करता है, ऐसे परिणामको विकृत परिणाम कहा जाता है; जैसे दूधमेंसे दही बन जानेके बाद वह पुनः दूध नहीं बन सकता है. (१०-११)

कार्यात्मना परिणमेत् कारणं त्वविकारि सत् ।

पुनः कारणरूपत्वम् एषोऽविकृत[१] उच्यते ।।१२।।

नानाभूषादिरूपेण रजतं परिणामि हि ।

मध्ये तदेव चान्तेऽपि [२]तत्पुनः स्याद् विलापने ।।१३।।

१. प्राप्त इति शेषः. २. रजतम्.

अविकृत ऐसा सत्कारण जब कार्यके रूपमें परिणत होता है तथा पुनः कारणके रूपको प्राप्त कर सकता है, तब उसे अविकृतपरिणाम कहा जाता है. अनेक प्रकारके आभूषणोंके रूपमें रजत परिणमित होता है, स्थितिकालमें भी वह रजत ही रहता है, तथा अंतमें आभूषणोंका आकार नष्ट हो जानेके बाद भी वह रजत ही रहता है. (१२-१३)

असौ वेदान्तसिद्धान्तः शुद्धान्तःकरणप्रियः ।

परिणामो ह्यविकृतः साक्षात् श्रुत्यादिसम्मतः ।।१४।।

इस प्रकारका वेदांतका सिद्धांत शुद्धांतःकरणवालोंको इष्ट है. जगतरूपी

कार्य अविकृतपरिणाम है तथा वेदादि शास्त्रोंको सम्मत मत यही है. (१४)

''तद् आत्मानं स्वयम् अकुरुते''ति परिणामिता।

अतः सूत्रे'प्यात्मकृतेः 'परिणामाद्'इतीरणा।।१५।।

१. 'तदात्मानं स्वयम् अकुरुत' इत्यादौ स्वस्यैव कृतेः ब्रह्मैव जगत्कारणम्. आत्मनएव कृतिः कथं संभवति? इति आशंक्य आह 'परिणामात्' सर्वभवन-समर्थत्वाद् ब्रह्मणएव परिणामाद् हेतोः. (१।४।२३).

'उसने अपनी आत्माको स्वयं ही परिणमित किया.' इसीलिए व्याससूत्रमें 'आत्माकी कृतिरूप परिणाम होनेके कारण यह परिणाम ब्रह्मरूप ही है', ऐसा कहा गया है. (१५)

सुवर्णम् अविकार्येव नाना परिणमत्यदः।

शिष्यते स्वयमेवान्ते मध्ये व्यवहृतिः परा।।१६।।

स्वर्ण अविकृत ही है तथा वह अनेक रूपोंमें परिणत होता है; आभूषणोंके नष्ट होने पर भी स्वर्ण स्थित ही रहता है; मध्यकी अवस्थामें नाममात्रके लिए व्यवहारमें पार्थक्तय आता है. (१६)

सर्वाकारैर्ब्रह्म तथैवैकं परिणमत्यतः।

विकारो निर्विकारस्य कथञ्चित् नैव जायते।।१७।।

इसी प्रकार ब्रह्म अकेले ही सभी आकारोंके रूपमें परिणत होते हैं, तथा इसीलिए निर्विकारक ऐसे उन ब्रह्ममें किसी भी प्रकारका कोई विकार नहीं आता है. (१७)

''यथा सुवर्णं सुकृतं पुरस्तात् पश्चात् च सर्वस्य हिरण्मयस्य।

मध्ये तदेव व्यवहार्यमाणं नानापदेशैरहम् अस्य तद्वत्''।।१८।।

जिस प्रकार आरंभमें शुद्ध स्वर्ण है, अंतमें भी सभी कुछ स्वर्णमय है; मध्यावस्थामें भी अनेक आभूषणोंके आकारमें अनेक नाम प्राप्त करके व्यवहार सिद्ध करते हैं, (प्रभु आज्ञा करते हैं कि) मैं भी स्वर्णके ही समान अवस्थित हुं. (१८)

इत्थं भगवता स्वस्याविकारित्वं समन्वये।

उक्तं सदृष्टान्तम् इदम् अन्यत्रापि बहु स्फुटम्।।१९।।

इस प्रकार समन्वय साधते हुए भगवानने, स्वयं अविकारी हैं ऐसा

द्रष्टांतोंके साथ कहा है. अन्य स्थानोंमें भी स्पष्टतापूर्वक इस तथ्यका विवेचन किया है(१९)

''उभय व्यपदेशात्त्वहिकुण्डलवद्''इत्यतः।

व्यासोऽधिकरणं प्राहाविकाराय समन्वये ।।२०।।

१.तु पूर्वपक्षव्यावृत्त्यर्थकः. अर्थात् न हि ब्रह्मस्वरूपनिर्णयो युक्त्या कर्तुं शक्यः. शब्दैकगम्यस्य ब्रह्मणः स्वरूपनिर्णयः शब्देनैव भवति. वेदे च निर्गुणत्वेन अनन्तगुणत्वेन उभयरूपेण कथनाद् उभयरूपं ब्रह्म इति मन्तव्यम्. ननु एकः कथम् अनेकधा भवति, तत्र आह 'अहि कुण्डलवत्'. यथा हि एकएव सर्प ऋज्वाद्यनेकाकारः कुण्डलाकारश्च भवति तथा. (ब्रह्मसूत्र ३।२।२७).

स निर्गुणो अनन्तगुणः परिणाम्यविकारवान्।

विरुद्धम् इत्याद्युभयं वेदे यद् व्यपदिश्यते ।।२१।।

अतः व्यासजीने भी उपरोक्त वेदांतसूत्रका अधिकरण ब्रह्मकी निर्विकारता केलिए कहा है क्योंकि भगवान निर्गुण भी है तथा अनंतगुणरूप भी हैं. लौकिक-गुण रहित तथापि अनेक अलौकिक गुणोवाले ईश्वर परिणमित होते हुए भी अविकारी हैं; ऐसे विरुद्ध स्वभाववाले ईश्वरका निरूपण वेदमें प्राप्त होता है. (२०-२१)

तस्माद् ब्रह्माखिलाकारं सरलाकृतिरप्यहिः।

स्वेच्छया कुण्डलाकारो अविकार्य्येव प्रजायते ।।२२।।

इसीलिए ब्रह्म ही सभी आकार धारण करते हैं तथापि अविकारी है. सरल आकारवाला सर्प अपनी इच्छासे ही कुंडलाकार धारण करता है, तथापि उसमें किसी भी प्रकारका विकार नहीं आता है. (२२)

तैजसानां तु सर्वेषां भाष्ये भाष्यविकारिता।

दृष्टान्ता बहवः स्पष्टाः सुबोधिन्यादिषूदिताः ।।२३।।

सभी तैजस भावोंका अणुभाष्यमें अविकारीपना कहा गया है. श्रीमद्भागवत, सुबोधिनी आदिमें भी अनेक दृष्टांत दिए गए हैं. (२३)

चिन्तामणेः कल्पतरोः कामधेनोः समुत्थिताः।

पदार्थाः परिदृश्यन्ते विक्रियन्ते न ते क्वचित्।।२४।।

चिंतामणि, कल्पतरु तथा कामधेनु मेंसे अनेक पदार्थ उत्पन्न होते देखे

जातें हैं, तथापि इन तीनोंमें किसी भी प्रकारका विकार देखनेमें नहीं आता है(२४

विकृतः परिणामस्तु न स ब्रह्मणि युज्यते।

वेदाद्यनुपदोक्तस्याविकारित्वस्य[१] बाधनात् ।।२५।।

१.वेदादिभिः अनुपदं किञ्चित् पूर्वमेव उक्तस्य इति.

वेदके पद-पदमें निरूपित अविकृतपनेका बाध होता होनेसे विकृत परिणामकी बात यदि कोई करे तो योग्य नहीं लगता है. (२५)

'तथापि भूमन्[१] महिमाऽगुणस्य ते विबोद्धुम् अर्हत्यमलान्तरात्मभिः।

अविक्रियात् स्वानुभवाद् अरूपतो ह्यनन्यबोद्धात्मतया न चान्यथा' ।।२६।।

१. हे सर्वत्रविद्यमान दुर्बुद्विभिः अज्ञातगुणस्याऽपि!! ते महिमा (तत्वं) तपःप्रवचनानुग्रहादिभिः निर्गतवासनादोषैरेव अन्तःकरणवृत्तिभिः बोद्धुम् अर्हति (योग्य इत्यर्थः). कुत? इति चेद् अन्यैः इन्द्रियादिभिः न बोध्य आत्मा यस्य सः. तस्य भावः तत्ता तया. अन्यथा न. तत्र त्रयो हेतवः, जन्मादिविकाररहितत्वात्. स्वयं प्रकाशत्वात्. रूपरहितत्वात्. (श्रीभाग.१०।१४।६)

'हे सर्वत्र विद्यमान प्रभु! निर्मल अंतरात्मावाले साधुपुरुष निर्गुण एसे आपके गुणोंका ज्ञान प्राप्त करने योग्य हैं. क्यों? क्योंकि आपके स्वरूपका बोध इंद्रियों द्वारा हो पाना संभव नहीं है. कारण? क्योंकि आपमें जन्मादि कोई विकार नहीं है, स्वभावनुरूप हैं तथा आपका कोई रूप भी नहीं है. (२६)

'ब्रह्म ज्योतिर्निर्गुणं निर्विकारम्'इति चान्तिमे।

अनेकत्रापि गीतायाम् अविक्रियम् उदीर्यते ।।२७।।

तेजोमय ब्रह्म निर्गुण तथा निर्विकार है, ऐसा कहकर गीतामें भी निर्विकारताका निरूपण किया गया है. (२७)

प्रलयः किञ्च सर्वेषां न स्यात् तत्र तथा सति।

कार्याणां कारणात्मत्वा[१]सम्भवाद् विकृतौ पुनः ।।२८।।

१. कार्यं यदि विकारः स्यात्, तर्हि लये सर्वकार्याणां कारणात्मकत्वभवनम् असम्भावि स्याद् इति अर्थः.

'तज्जलान्' 'यत् प्रयन्ती'त्यादिश्रुतौ स तु रूपितः।

स्वस्मिन् विलापिते विश्वे ब्रह्मैकम् अवशिष्यते ।।२९।।

विकृत परिणाम है ऐसा यदि माना जाए तो कार्योकी कारणरूपता

असंभवित हो जानेसे उन सभीका प्रलय संभव ही नहीं रह जायेगा. परंतु 'उसमेंमें उत्पन्न हुआ है, उसीमें नष्ट होगा, तथा उसीमें स्थित रहेगा, तथा उसीमें लीन हो जाएगा', इन सभी उपनिषद्वाक्योंमें प्रलय कहा गया है, वह सत्य ही है. 'अपनेमें जब विश्वका लय करवा देते हैं तब मात्र ब्रह्म ही बच जाते हैं.' (२८-२९)

''[१]नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु।
व्यक्तेऽव्यक्तं कालवेगेन याते भवान् एकः शिष्यतेऽशेषसंज्ञः' ।।३०।।

१. कालवेगेन हिरण्यगर्भायुः अवसाने लोके जगति महाभूतादिषु लीने, महाभूतादिषु च तन्मात्रासु लीनेषु, व्यक्ते तन्मात्रादिजगति च अक्षरे भगवदंशे तद्धाम्नि वा लीने, भवान् अशेषसंज्ञाधिष्ठानभूतः अवशिष्टो भवति. (भाग.१०।३।२५)

'दो परार्ध कालके अंतमें लोकका नाश होनेपर महाभूतोंका आदि भूतमें लय हो जाता है तथा कालके वेगके कारण व्यक्त जगत अव्यक्तमें लीन हो जाता है. 'अशेष' जिनका नाम है ऐसे आप ही स्थित रह जाते हो.' (३०)

क्रीडार्थम् आविष्कृतवान् बहुत्वेच्छुः स्वरूपतः।
ऊर्णनाभिर्यथा तन्तून् तैर्गेहम् अविकारवान्।।३१।।

जिस प्रकार मकडी अपनी लारसे निर्मित तंतुओं द्वारा स्वयं अविकृत रहकर जाल बुनती है, उसी प्रकार अनेक होनेकी इच्छावाले प्रभुने क्रीडाके लिए अपने स्वरूपसे अनेकविध भावोंको प्रकट किया है. (३१)

आविर्भावे रतीच्छैव हेतुः श्रुत्यादिसम्मतः।
यथा काण्वश्रुतौ पूर्वं रमणाऽभाव उच्यते।।३२।।
'स वै नैव रेमे' 'तस्माद् एकाकी न रमते'
'स द्वितीयम् ऐच्छत्' 'स हैतावानास'।
एकाकिनो रत्यभावाद् द्वितीयेच्छा विभोरभूत्।
वस्तुतो न द्वितीयं तु शुद्धाद्वैतस्य वर्त्तते।।३३।।

जगतको आविर्भूत करनेमें रमण करनेकी इच्छा ही हेतुरूप है ऐसा वेदादि वाक्योंका अभिप्राय है. जैसे दृष्टांततया काण्वश्रुतिमें प्रथम रमणका अभाव कहा गया है; 'उन्होंन कभी रमण नहीं किया था, अतः वे अकेले ही होनेसे रमण नहीं कर पाते थे, उन्होंने दूसरेकी इच्छा की, और वे इस जगतके रूपमें हो गए.' एकाकी रहनेपर रमण संभव न होनेसे उन विभुने (ब्रह्मने) दूसरेकी

इच्छा प्रकट की. शुद्ध अद्वैत के साथ वस्तुस्थितिमें अन्य कोई विद्यमान है ही नहीं (३२-३३)

इति स स्वयम् एवास रूपनामविभेदतः ।

अनेकधाथ वैचित्र्यं तत्-तद् धर्म तिरोभवात्[१] ।।३४ ।।

१. तत्तद्धर्माणां तिरोभवनाद् इति अर्थः.

इस प्रकार प्रभु स्वयं ही नाम तथा रूपके भेदसे अनेक प्रकारसे हुए हैं. जगतमें जो चित्रविचित्रता है वह उन कार्योंमें (भगवद् इच्छासे) उन उन गुणधर्मोंका तिरोभाव हुआ होनेके कारण हुई है. (३४)

सर्वधर्मतिरोधानात् तद्धर्मस्यैव दर्शनम् ।

अन्यत्रान्यस्य धर्मस्य चेति भेदो [१]महान् इह।।३५।।

१. ब्रह्मरूपत्वाद् यद्यपि सर्वं सर्वमयं, तथापि घटादिषु जलानयनादिधर्मस्यैव दर्शनं तद् इतरेषां तु तदिच्छया तिरोधानम् इति महान् भेद इत्याद्यन्वयः.

अन्य सभी गुणधर्मोंका तिरोधान करके, आवश्यक धर्मोंका ही आविष्कार किया जाता है, तथा आवश्यकतानुसार अन्य पदार्थोंमें दूसरे धर्मोंका आविष्कार किया जाता है. इस प्रकार पदार्थोंके धर्मोंमें परस्पर महान भेद इस जगतमें दिखाई देता है. (३५)

एवंविधप्रपञ्चेन स्वात्मना क्रीडति प्रभुः।

'क्रीडार्थम् आत्मन इदं त्रिजगत्' ते कृतं यतः ।।३६ ।।

ऐसे जगत्स्वरूप अपनी आत्माके साथ ही प्रभु क्रीडा कर रहे हैं, क्योंकि 'हे प्रभु! आपकी क्रीडाके लिए इन तीनों लोकोंकी आपने रचना की है.' (३६)

'क्रीडाभाण्डम् इदं विश्व'मित्यादिष्विदम् उच्यते ।

ऊर्णनाभिर्हि रमते तन्तुभिः गेहतोऽथवा ।।३७ ।।

'यह विश्व प्रभुकी क्रीडाका पात्र है' आदि वाक्योंमें भी यही कहा गया है कि जैसे मकडी अपनी लारसे जाल बुनती है, उसी प्रकार यह जगत है. (३७)

सर्वशक्तेस्तथेच्छातो मूढैर्नानेव दृश्यते ।

ब्रह्मैवैकम् इदं सर्वं वस्तुतस्तु विचारणे ।।३८ ।।

सर्वशक्तिमान प्रभुकी इस प्रकारकी इच्छाके कारण मूढपुरुषोंको जगतमें अनेकरूपता दिखाइ दे रही है. यर्थाथरूपसे विचार किया जाए तो जो

कुछ भी है वह मात्र ब्रह्म ही है. (३८)

'यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा।

स्याद् इदं भगवान् साक्षात् प्रधानपुरूषेश्वरः'[१] ।।३९।।

'जहां, जिसके द्वारा, जिससे, जिसका, जिसके लिए, जो कुछ भी, जब-जब जहां-जहां होता है, वो सभी कुछ प्रधान पुरुषेश्वर ब्रह्म, आप ही हैं' (भाग.१०।८५।४) (३९)

इत्यादिना भागवतेऽखिलस्य ब्रह्मता मता।

'एवं चात्मा कात्स्न्र्यम्'इति सूत्रेऽप्येतन् निरूप्यते ।।४०।।

इस भागवतके वचनमें सभी कुछ ब्रह्मरूप है ऐसा कहा गया है. 'यह आत्मा ही सबकुछ है' ऐसा व्याससूत्रमें भी निरूपित है. (४०)

कटकं मुद्रिकां हेम्नः कुण्डलं खण्डकान् अपि।

हेमत्वेनैव गृह्णाति यथा बुद्धिस्तदर्थिनः ।।४१।।

तथा ब्रह्मविदो बुद्धिः यत्वियद् भेददर्शनम्।

एकस्योक्तं भागवते तथा जानन्ति तद् दृढम् ।।४२।।

जिस प्रकार आवश्यकता अनुसार मनुष्यकी बुद्धि हार, चूडी, अंगूठी, कुंडल आदि सभी आभूषणोंको स्वर्ण निर्मित होनेसे स्वर्ण के रूपमें ही स्वीकार लेती है, उसी प्रकार ब्रह्मवेत्ताकी भी बुद्धि होती है. जो भी भेद दिखाइ दे रहे हैं, उन सभीको श्रीमद्भागवतमें उन एक ब्रह्मके ही भेद बताए गए हैं, यह तथ्य दृढतापूर्वक विद्वान जानते ही हैं. (४१-४२)

यथा हिरण्यं बहुधा[१] समीयते

नृभिः क्रियाभिः व्यवहारवर्त्मसु।

एवं वचोभिर्भगवान् अधोक्षजो

व्याख्यायते लौकिकवैदिकैर्जनैः ।।४३।।

व्यवहारमें जैसे विविध क्रियाओं द्वारा मनुष्य स्वर्णको अनेक प्रकारसे प्राप्त करते हैं, उसी प्रकार अधोक्षज भगवानको भी विद्वान लौकिक-वैदिक ऐसे अनेक वाक्यों द्वारा निरूपित करते हैं(भाग.१२।४।३०). (४३)

एवं क्रीडन् प्रपञ्चात्मा यदान्ता रतिम् इच्छति।

तदात्मनि विलाप्येदं रमते कारणे वशी ।।४४।।

इस प्रकार प्रपंचरूप बने भगवान जब आंतररमण करनेकी इच्छा करते हैं तब इन सभीको अपने स्वरूपमें लीन करके स्वाधीन बनाकर प्रभु कारणरूपमें स्थित रहकर रमण करते हैं. (४४)

सुखार्थं सर्वजीवानां करोति लयम् आत्मनि ।
व्यधाद् यथेह क्षणदां सुख्यन्त्यात्मरतौ हि ते ।।४५ ।।

प्रभु सुखके लिए अपनी आत्मामें सभी जीवोंका लय करते हैं. प्रभुने इस प्रकार रात्रिका आविष्कार किया है तथा जीव इस प्रकार ब्रह्मकी आत्मरतिमें सुख प्राप्त करते हैं. (४५)

आहुः वेदा हि 'यत्रैतत् पुरुषः स्वपिती'त्यतः ।
चिति लीनास्तदा जीवा न विदन्ति तु किञ्चन ।।४६ ।।
दुःखात्ययो यथा पुंसा सुषुप्तावनुभूयते ।
नानन्दानुभवस्तत्र स तु मोक्षे[१] प्रवक्ष्यते ।।४७ ।।

१. स्वमतप्रसिद्धे मोक्ष इत्यर्थः. सर्वे हि मोक्षं दुःखाभावमात्रं मन्यन्ते. दुःखाभावश्च चिद्रूप आत्मनि ज्ञाते भवति. न तु सुखानुभवः स तु भगवत्साक्षात्कारेण भवति सएव च वस्तुतो मोक्षः. न च दुःखात्ययएव सुखानुभवो अस्तुः, द्वयोः भेदेनैव लोके प्रतीतेः.

सुषुप्तजीवकी आत्मरतिको वेद बतलाते हैं, 'यत्रैतत्पुरुषः' इत्यादि बृहदारण्यकमें 'स्वमपीतो भवति' इत्यादि संदर्भसे स्पष्ट होता है कि सुषुप्ति दशामें जीव चिद्रूप ब्रह्ममें लीन हो जाते हैं तथा उस अवस्थामें वे कुछ भी जानते नहीं हैं. सुषुप्तिमें पुरुष दुःखाभावका अनुभव करता है, आनंदका नहीं. आनंदका अनुभव मोक्षकी अवस्थामें होता है. इस तथ्यका यथावत् निरूपण आगे किया जाएगा. (४६-४७)

'अन्ने प्रलीयते मर्त्य' इत्याद्युक्तप्रकारतः ।
जडानां प्रलयस्तत्र सर्वेषां सर्वकारणे ।।४८।।

'जीवका अन्नमें प्रवेश होता है', आदि वाक्योंमें निरूपित विषय अनुसार सभी जड पदार्थोंका सर्वकारणरूप प्रभुमें लय होता है. (४८)

आनन्दांशान्तरात्मान आनन्दे चिति चेतनाः ।
जडाः सदंशे वर्त्तन्ते विलीनाः सुप्तशक्तयः ।।४९ ।।

जिनकी अंतरात्मा आनंदके अंशरूप है उनका आनंदमें, चेतन पदार्थोंका चित्में तथा जड पदार्थोंका सदंशमें लय होता है, जहां उसकी सभी शक्ति सुषुप्त अवस्थामें स्थित हो जाती है. (४९)

उद्गच्छन्ति तदिच्छातः पुनस्ते तत्–तद् अंशतः ।
तत्–तद् अंशेषु लीयन्त उर्णनाभ्यास्यतन्तुवत् ।।५० ।।

वे सभी अंश पुनः उनकी इच्छासे प्रकट होते हैं तथा मकडीके लारके तंतुओंके समान पुनः वे सभी अंश लीन भी हो जाते हैं. (५०)

'यथोर्णनाभिः सृजते गृह्णते च यथा
पृथिव्याम् ओषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि
तथाऽक्षरात् सम्भवतीह विश्वम्' ।।५१।।

जैसे मकडी जालेको बुनती है तथा पुनः उसे निगल जाती है, उसी प्रकार पृथ्वीमें वनस्पति उत्पन्न होती है. जिस प्रकार सत्पुरुषमेंसे बाल तथा रोमावलियां उत्पन्न होती हैं, उसी प्रकार अक्षरब्रह्मसे यह संपूर्ण विश्व उत्पन्न हुआ है. (५१)

मुण्डकोपनिषद्येतद् बृहदारण्यकादिषु ।
श्रुतं भागवते चेदं स्कन्ध एकादशे स्फुटम् ।।५२ ।।

मुंडकोपनिषद्में, बृहदारण्यकादि उपनिषदोंमें तथा श्रीमद्भागवतके ११ स्कंधमें यह स्पष्टरूपसे निरूपित हुआ है. (५२)

'यथोर्णनाभिर्हृदयाद् ऊर्णां सन्तत्य वक्त्रतः ।
तया विहृत्य भूयस्तां ग्रसत्येवम् अधीश्वरः' ।।५३ ।।

जिस प्रकार मकडी जालेमेंसे तंतुओंको अपने मूंहमें निगल जाती है, उस जालेमें स्थित होकर क्रीडा करके उसे निगल जाती है, उसी प्रकार भगवान विश्वको अपनी आत्मामेंसे उत्पन्न करके, उसका पालन करके पुनः उसे लीन कर लेते हैं. (५३)

तस्मात् सर्वलयस्थानं सर्वाविर्भावकारणम् ।
चित्ते स्थिरं परंब्रह्मास्त्वचिन्त्यानन्तशक्तिमत् ।।५४ ।।

इसीलिए सभी लयोंके स्थानरूप, सभी प्रकारके आविर्भावोंके

कारणरूप; अचिंत्य तथा अनंतशक्ति वाले परब्रह्म चित्तमें स्थिर हों. (५४)

यस्मात् जीवाः स्वांशा अणवोऽन्तर्यामिणो जडाश्च आसन्।
साकारं श्रुतिसारं वारं वारं स्मराखिलाधारम्॥५५॥

जिनमेंसे अंशरूप जीवात्माएं, अणु, अंतर्यामी तथा जड पदार्थ उत्पन्न हुए है, उन सभीके आधाररूप तथा श्रुतिके साररूप साकारब्रह्मका में पुनः पुनः स्मरण करता हुं. (५५)

इति श्रीमद्वल्लभाचार्यमतवर्त्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज गोवर्द्धनशीघ्रकवि विरचिते वेदान्तचिन्तामणौ अविकृतपरिणामनिरूपणं नाम षष्ठं प्रकरणम्॥६॥

d

जीवोद्गमसंसारनिरूपणं नाम
सप्तमप्रकरणम्

[१]अंशा जीवा यतो वह्नेः विस्फुलिंगवद् उद्गताः ।
संसरन्ति च मुच्यन्ते नमोऽस्मै सर्वशक्तये ।।१ ।।

१. स्वांशाः करपदादिवत्. नतु विभिन्नांशाः पुत्रादिवत्. विभिन्नांशत्वे एकविज्ञानेन सर्वविज्ञानं श्रुत्युक्तं न स्यात्. ननु निरवयवस्य ब्रह्मणो अंशा जीवा इति तु विरुद्धमिव उच्यते. स्याद् विरुद्धमिव यदि श्रुत्या न उच्येत. उच्यतेतु तया ब्रह्मणो निरवयवत्वं विस्फुलिंगवद् उद्गमनं च जीवानाम्. तत् श्रुतिप्रामाण्यवादिना तथैव मन्तव्यम्. अतएव उक्तं सूत्रकर्त्रा 'श्रुतेस्तु शब्दमूलत्वात्'. येतु अत्र पूर्वं वेदानुरोधाद् विरुद्धधर्माश्रयं ब्रह्म इति स्वीकृत्यापि पश्चाद् लोकानुरोधेन 'ननु शब्देना'पीत्यादिना स्वकौशलं दर्शयन्ति तेषां मते युक्तनुरोधेन स्पष्टं वेदाप्रामाण्यं स्वीकृतं भवति. ननु 'ग्रावाणः प्लवन्ते' इत्यादीनाम् असम्बद्धानां वेदोक्तानामपि अर्थानां कथमिव प्रामाण्यं स्वीकृतं स्यात्? न एष दोषः. प्रामाण्यं नाम लोकानधिगतार्थावगाहित्वे सति स्वबुद्धिकार्श्यहेतुककादाचित्कायोग्यताज्ञानान् अपनोद्यो भाव इति.

जिनमेंसे विस्फुल्लिंगकी तरह अंशरूप जीवात्माएं उत्पन्न हुई हैं, जिनमें संचार कर रही है तथा जिनमें मोक्ष प्राप्त करेंगी, वे सर्वशक्तिमान ब्रह्मको नमस्कार. (१)

व्योमेव व्यापकं ब्रह्म सर्वत्रैकरसं सदा ।
सच्चिदानन्दरूपञ्च पूर्णं निर्बाधम् अक्षयम् ।।२ ।।

आकाशकी तरह सर्वत्र व्यापक ब्रह्म हमेंशा एकरस, सत्-चित्-आनंदरूप, पूर्ण, व्यवधानरहित तथा क्षयरहित है. (२)

'यच्च किंचित् जगत् सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' ।।३ ।।

जितना भी जगत अंदर तथा बाहर दिखाइ देता है तथा सुनाइ देता है, उतने सबको व्याप्त करके नारायण अवस्थित है. (३)

'सत्यं विज्ञानम् आनन्दं ब्रह्म' 'पूर्णमदः' श्रुते ।
सर्वक्रियाभिः सर्वत्र नित्यैर्धर्मैस्तथाखिलैः ।।४ ।।
'सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।

सर्वतःश्रुतिमल्लोके सर्वम् आवृत्य तिष्ठति' ।।५।।
मायया सर्वतः सांशं स्वशक्त्याचिन्त्यरूपधृत् ।
तस्याप्रतिहतेच्छस्य बहुत्वेच्छोदिताभवत् ।।६ ।।

'सत्य, विज्ञानरूप तथा आनंदात्मक ब्रह्म', 'वह पूर्ण है' इन श्रुति-वाक्योंके अनुसार सर्वत्र, सभी क्रियाओंसे तथा सभी नित्य धर्मोंसे 'सर्वत्र हस्त तथा चरणवाले, सर्वत्र नेत्र, मस्तक तथा मुखवाले, सर्वत्र कानोंवाले, लोकमें सर्वत्र सभीको व्याप्त करके अवस्थित हैं'(भग.गीता.१३।१३); माया नामक स्वशक्ति द्वारा सर्वत्र अंशोंके साथ स्थित है तथा अपनी शक्तिसे अचिंत्य रूपोंको धारण किये हुए हैं. जिनकी इच्छामें कोई व्यवधानरूप नहीं बन सकता है ऐसे ब्रह्मको अनेक होनेकी इच्छा हुइ. (४-५-६)

सा 'बहुस्यां प्रजायेये'त्यादि श्रुत्यादिसम्मता ।
तदेच्छया प्रदेशे तद् उद्गमार्थं तिरोदधे ।।७ ।।

'में अनेक हो जाउं, प्रजनन करुं', इन श्रुतिवाक्योंका इस इच्छाको समर्थन है, तब स्वेच्छया जगतका उद्गम करनेके लिए अपने स्वरूपका तिरोधान किया. (७)

सृष्टिकाले त एवान्ताः परिच्छेदा निरूपिताः ।
तथा 'हन्त तिरोसानी'त्यादिवाक्यैर्निरूपितम् ।।८।।

सृष्टि को उत्पन्न करते समय इन अंतिम परिच्छेदोंका वर्णन किया गया है 'में तिरोहित हो जाउं', आदि वाक्यों द्वारा कहा गया है. (८)

काण्वाद्युपनिषत्स्वेतत् तथा स्मृतिपुराणयोः ।
'विभक्तिरप्रतर्क्यस्याविभक्तस्यापि युज्यते' ।।९।।
'अविभक्तं' विभक्तेषु विभक्तम् इव च स्थितम्' ।
चित्प्रधाना परिच्छिन्ना अंशा व्युदचरंस्ततः ।।१०।।
जीवाः क्षुद्रा विस्फुलिंगाः सुदीप्तात् पावकाद् यथा ।
मुण्डकोपनिषत्स्वेष दृष्टान्तोऽन्यत्र चोदितः ।।११।।

काण्वके बृहदारण्यक उपनिषदमें तथा स्मृति पुराणोंमें भी यह बात कही गइ है. 'जिनके विषयमें तर्क भी न हो पाता हो ऐसे उन अविभक्तने अपनेमें ही विभाग प्रकट किये. 'अविभक्त ऐसे वे ब्रह्म विभक्त पदार्थोंमें मानों विभक्त

होकर स्थित हैं' (भग.गीता.१८।२०) तब चित् जिनमें मुख्य है ऐसे परिच्छेदवाले अंशरूप जीव सम्यक् प्रकारसे प्रज्वलित अग्निमेंसे छोटे-छोटे तिनकोंकी तरह बाहर आ गए. मुंडकोपनिषदमें तथा अन्य शास्त्रोंमें भी यही दृष्टांत प्राप्त होता है. (९-१०-११)

तद् एतत् [१]सत्यं यथा सुदीप्तात् पावकाद्
विस्फुल्लिंगाः सहस्त्रशः प्रभवन्ते सरूपाः।
तथाऽक्षराद् विविधाः सोम्य भावाः
प्रजायन्ते तत्र चैवापि यन्ति ।।१२।।

'यह बात सत्य है कि जैसे सम्यक् प्रकारसे प्रज्वलित अग्निमेंसे एकसमान रूपवाले तिनखे हजारोंकी संख्यामें निकलते हैं, उसी प्रकार हे सौम्य! अक्षरब्रह्ममेंसे अनेक प्रकारके भावोंका जन्म होता है तथा उन्हीमें उन सभीका लय भी हो जाता है' (द्वि.मुण्डके १ खण्डः.)(१२)

'यथा[१] सुदीप्तात् पावकात् क्षुद्रा
विस्फुलिंगा व्युच्चरन्त्येवं तस्माद् आत्मनः सर्वे
प्राणाः सर्वे लोकाः सर्वएव आत्मनो व्युच्चरन्ति
[२]रमणीयचरणाः [३]कुपूयचरणा इति' ।।१३।।

१. मुण्डके.२।१।१. २. पुण्यचरित्राः. ३. पापचरित्राः.

जिस प्रकार सम्यक् प्रकासे प्रज्वलित अग्निमेंसे छोट-छोटे तिनखे निकलते हैं, उसी प्रकार उस आत्मामेंसे सभी प्राण, सभी लोक तथा उत्तम आचरणवाली और दुष्ट आचरणवाली आत्माएं प्रकट हुइ. (१३)

सर्वेऽन्तर्यामिणो जाता आनन्दांशस्वरूपतः।
सदंशेन जडा[१] येभ्यः कृता देहा अनेकधा ।।१४।।

१. पञ्चतन्मात्राभूतप्रभृतयः.

आनंदांशमेंसे सभी अंतर्यामिओंका तथा सत् अंशमेंसे सभी जड पदार्थोंका जन्म हुआ है जिनमेंसे अनेक प्रकारके देह प्रकट किये गए है. (१४)

तिरोभावयद् आनन्दं जीवे तं च चितं[१] जडे[२]।
आनन्दांशतिरोधानात् निराकारावुभावपि[३]।।१५।।

१. आनन्दांशम्. नानात्वाय इति सर्वत्र शेषः. २. चिदंशम्. ३. जडजीवौ

भगवदाकाररहितौ इति अर्थः. आनन्दएव आकारसमर्पकः तस्य च तिरोभावात्.

जीवमें आनंदांशका तथा जडमें चिदंश और आनंदांशको तिरोहित किया है. दोनोंमेंसे आनंदांशका तिरोभाव होनेके कारण जीव तथा जड दोनों निराकार (आनंदाकार रहित) हुए. (१५)

चतुर्भुजादिर्न तयोस्तादृग्भगवदाकृतिः।
आनन्दरूपमेवाऽस्य हस्तपादादिकं यतः ।।१६ ।।

ये दोंनों चार भुजा आदिवाले भगवानकी जैसी आकृतिवाले नहीं है. प्रभुके हस्त–चरणादि तो आनदंरूप ही हैं. (१६)

'प्रजायेय' प्रकृष्टोऽहं जायेयेतीष्टवांस्तु यत्।
ऐश्वर्यादेः सविषयत्वाय धर्मांस्तथाऽकरोत्[१] ।।१७ ।।

१. तिरोऽभावयत्.

'में प्रकृष्ट हुं, जन्म प्राप्त करुं', इस प्रकार प्रभुने इच्छा प्रकट की और ऐश्वर्यादि धर्म सविषय होनेके कारण सृष्टिको उत्पन्न करनेके हेतुसे उन धर्मोंका तिरोधान किया. (१७)

षट्धर्मा 'भग'शब्देन ऐश्वर्यं वीर्यं यशस्तथा।
श्रीर्ज्ञानञ्च विरागश्च नित्या भगवतोऽखिलाः ।।१८।।

'भग' शब्दसे ऐश्वर्य, वीर्य, यश, श्री, ज्ञान, वैराग्य – ये ६ धर्म भगवानके नित्य धर्म हैं. (१८)

'ऐश्वर्यस्य समग्रस्य[१] वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां 'भग' इतीरणा' ।।१९ ।।

१. अपरिच्छिन्नस्य. ऐश्वर्यादौ इदम् अन्वेति. विष्णुपुराणस्थं पद्यम्.

ऐश्वर्य, वीर्य, यश, श्री, ज्ञान, वैराग्य – इन ६ गुणोंको 'भग' कहा जाता है. (१९)

ऐश्वर्यादि तिरोभावाद् जीवानां दीनतादिकम्।
तिरोहितं[१] ततो ह्यस्य सूत्रे बन्ध–विपर्ययौ[२] ।।२० ।।

१. ऐश्वर्याद् इति शेषः. २. उक्तौ इति शेषः.

ऐश्वर्यादि गुणधर्मोंका तिरोधान हो जानेके कारण जीवोमें दैन्य आदि गुण आते हैं, जीवका ऐश्वर्य तिरोहित हो जानेके कारण व्याससूत्रमें जीवको बंध

तथा विपरीत ज्ञान होता है, ऐसा कहा गया है. (२०)

[१]बन्धश्चतुष्टयाभावाद् द्वयाभावाद् विपर्ययः[२]।
'पराभिध्यानात्[३] तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'।
अत्रत्ये श्रीमदाचार्यैः भाष्ये तत् सुप्रपञ्चितम्॥२१॥

१. ऐश्वर्यादिचतुष्टयम्. २. ज्ञानवैराग्यद्वयतिरोभावात् 'स्थूलो अहम्' इत्यादि देहाध्यासादि विपर्ययः. ३. कथम् अस्य दुःखित्वम् इति आशंक्य परिहरति, तु शब्दः. अस्य जीवस्य ऐश्वर्यादि तिरोहितम्. तत्र हेतुः पराभिध्यानात्. परस्य भगवतो अभिध्यानं तस्मात्. ततः बन्धविपर्ययौ भवतः.(३।२।५)

प्रथमके चार गुणोंके तिरोधानके कारण बंध तथा अंतिम दो गुणोंके तिरोधानके कारण विपरीतज्ञान होता है. 'सृष्टि उत्पन्न करनेके लिए परब्रह्मने ध्यान किया, परिणामस्वरूप ऐश्वर्य तिरोहित हुआ तथा परिणामस्वरूप जीवको बंध तथा विपरीत ज्ञान हुआ' – इस विषयका श्रीमहाप्रभुजीने विस्तृत विवेचन किया है. (२१)

मायया निर्मिते विद्याविद्ये शक्ती प्रभोः स्वयम्।
जीवस्यैव ततो बन्धो मोक्षो नांशान्तरस्य सः॥२२॥

प्रभुकी विद्या तथा अविद्या दोनों ही शक्तियां प्रभु द्वारा स्वेच्छया निर्मित है. उन्हींके कारण जीवको बंध होता है; तथा वह प्रभुके अंश होनेपर भी उसे मोक्ष प्राप्त नहीं होता है. (२२)

'विद्याविद्ये[१] मम तनू विद्युद्धव! शरीरिणाम्।
मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते'॥२३॥

हे उद्धव! विद्या और अविद्या मेरे देह हैं. मनुष्योंको ये दोनों ही मोक्ष तथा बंध करवानेवाली है जिन्हें मेरी मायाने बनाया है(भाग.११।११।३४). (२३)

''[१]एकस्यैव ममांशस्य जीवस्यैव महामते।
बन्धोस्याविद्यया नादिर्विद्यया च तथेतरः'॥२४॥

हे महाबुद्धिमान्! मेरे अंशरूप इस एक जीवको अविद्यासे बंध होता है, विद्यासे नहीं. विद्यासे तो मोक्ष होता है(भाग. ११।११।४). (२४)

सुखदुःखाद्यनुभवोऽपि जीवस्यैव केवलम्।

चिद् अभावाद् जडेऽन्तर्यामिण्यानन्दातिरोभवात् ।।२५ ।।

चित्के अभावके कारण जडमें तथा आनंदके तिरोधानके कारण अंतर्यामिको छोडकर मात्र जीवको ही सुख-दुःखका अनुभव होता है. (२५)

स्वरूपाज्ञानम् एकं हि पर्व देहेन्द्रियासवः ।
अन्तःकरणम् एषां हि चतुर्द्धाऽध्यास उच्यते ।।२६ ।।
पञ्चपर्वा त्वविद्येयं यद् बद्धो याति संसृतिम् ।
इत्यस्याः पञ्चपर्वाण्याचार्यपादा न्यरूपयन् ।।२७ ।।

स्वरूपका अज्ञान, देहाध्यास, इंद्रियाध्यास, प्राणाध्यास तथा अंतःकरणाध्यास - ऐसे अविद्याके पांच पर्व हैं, जिनके कारण जीवको जन्म-मृत्यु होते हैं. अविद्याके इन पांच पर्वोंका निरूपण आचार्यचरणने (शास्त्रार्थप्रकरण) किया है. (२६-२७)

अहन्तामम्तारूपः संसारो यो मृषोदितः ।
अविद्योपाधितो मिथ्या मृगतृष्णेव दृश्यते ।।२८ ।।

अहंता-ममतारूप जिस संसारको मिथ्या कहा गया है. वह अविद्यारूप उपाधिके कारण मृगजलके जैसा दिखता है. (२८)

विपरीत क्रमेणोक्तम् अध्यासानां[१] चतुष्टयम् ।
एवं पर्वसु सिद्धेषु देहेऽहंभाव इष्यते ।।२९ ।।

१. अन्तःकरणाध्यासः प्रथमः. सर्वतो बलवान् इति दर्शनायैव तु चतुर्थ उक्तः. एवं विपरीत क्रमेण उक्तम्.

उपरोक्त चारों अध्यास विपरीत क्रममें निरूपित हुए हैं, उनका योग्य क्रम अंतःकरणाध्यास, प्राणाध्यास, इंद्रियाध्यास तथा देहाध्यास है. इन पांच पर्वोंके सिद्ध होनेपर देहमें अहंभाव होता है. (२९)

तत् सम्बन्धिनि गेहादौ ममतापि ततो मता ।
स संसारो भ्रमः स्वप्नो मायेत्यादीह[१] कथ्यते ।।३० ।।

१. वेदपुराणादौ.

देहके संबंधमें आते ही गृहादिमें ममता भी हो जाती है. इसी ममत्वको संसार, भ्रम, स्वप्न, माया आदि नामोंसे जगतमें कहा जाता है. (३०)

अविद्योपाधितो ह्येषोऽज्ञानात्मेह प्रतीयते ।

[१]कामलोपहिताक्षस्य शंखे पीतत्ववन् मृषा ।।३१।।

१. रोगविशेषो वैद्यके प्रसिद्धः.

अविद्याकी उपाधिके कारण यह जीव अज्ञानात्मक प्रतीत होता है. पीलियेके रोगसे ग्रस्त मनुष्यको जैसे शंखमें भी पीला रंग दिखाइ देता है, जो भ्रान्तिमात्र है. (३१)

उपाधेः साधनैर्नाशे यथावस्थितम् ईक्ष्यते ।
ब्रह्मत्वं क्रीडनार्थत्वं तथाविद्यानिवर्त्तने ।।३२ ।।

साधनों द्वारा जब इन उपाधियोंका नाश होता है, तब यथार्थ ज्ञान प्राप्त होता है. अविद्याके नष्ट हो जानेपर सभी पदार्थोंकी ब्रह्मात्मकता तथा प्रभुने क्रीडाके लिए जगतकी रचना की है, ऐसी प्रतीति स्पष्ट हो जाती है. (३२)

'यथाम्भसा[१] प्रचलता तरवोऽपि चला इव ।
चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः' ।।३३ ।।

'प्रवाहित जलके साथ मानों प्रतिबिंबित होते वृक्ष भी प्रवाहित होते हों तथा घूमती आंखोंके साथ पृथ्वी भी मानों घूम रही हो, ऐसा दिखाइ देता है' (श्रीभाग.७।२।२३). (३३)

देहादीनां विरागार्थं[१] सदृष्टान्तम् असत्यता ।
संसारम् एव तन्निष्ठम् अभिप्रेत्य कृता क्वचित् ।।३४ ।।

१. ननु प्रपञ्चमिथ्यात्वप्रतिपादकानां पुराणादिवाक्यानां कथं सङ्गतिः ? तत्र आह 'विरागार्थम्' इत्यादि. वस्तुतस्तु देहादिप्रपञ्चो ब्रह्मकार्यत्वात् सत्यएव, तथापि जनः तथा जानीयान् न विरक्तः स्यात् तदर्थं तथाविधमपि वैराग्यार्थम् असत्यम् इति उक्तं क्वचित्. ननु सर्वस्य ब्रह्मात्मकत्वे देहादौ अपि रक्तिः एव अपेक्ष्यतां न पुनः विरक्तिः. न एतत् सारम्. ''एकविज्ञानेन सर्वविज्ञानं'' प्रतिज्ञातम् इति देहादौ ब्रह्मत्वेन यदि रक्तिः स्यात् को वारयति. नतु तथा. लोके हि सर्वेषां भौतिकः अयं मम देह इति एव असक्तिः भवति न तु ब्रह्मत्वेन इति तत्र विरागता अपेक्षिता एव.

देहादिमें विराग होनेके उद्देश्यसे, देह आदिमें रही हुइ सांसारिकताको लक्ष्यमें रखके, कहीं दृष्टांतपूर्वक देहादिकी असत्यताका निरूपण किया गया है. (३४)

विप्रोऽपि मायया स्वप्ने राजाऽहम् इति मन्यते ।
तत्तद् देहगतो नैवं ब्रह्मांशत्वं स्मरत्यसौ ।।३५ ।।

ब्राह्मण होनेपर भी यदि वह अपनेआपको स्वप्नमें जैसे 'मैं राजा हुं', ऐसा मानता है; उसी प्रकार तद्-तद् देहमें रहा हुआ जीव स्वयं ब्रह्मका अंश है, ऐसी स्मृति नहीं रख पाता है. (३५)

''[१]स्वप्ने यथा पश्यति देहम् ईदृशं मनोरथेनाभिनिविष्टचेतनः।
दृष्टश्रुताभ्यां मनसाऽनुचिन्तयन् प्रपद्यते तत् किमपि ह्यपस्मृतिः' ।।३६।।

चित्तमें मनोरथ भरे हुए हों, ऐसी स्थितिमें जो कुछ भी देखा-सुना हो उसका विचार करते हुए मनुष्य विस्मरण हो जानेसे स्वप्नमें उन उन प्रकारके देहोंको देखता है(भाग.११।१।४१). (३६)

इत्यहंभावम् आपन्नो देहे मिथ्यावियोगिनि।
अवशः कार्यते सर्वम् ईश्वरेण विमूढधीः ।।३७।।

इस प्रकार मिथ्या वियोगवाले देहमें अहंभाव प्राप्त किया हुआ जीव, प्रभुने उसकी बुद्धिको मोहित किया हुआ होनेसे, परवश होकर सभी कार्योंको करता है. (३७)

देहात्मभावो देहेनेशेच्छया कृतकर्मसु।
'अहंकारविमूढात्मा कर्त्ताहम् इति मन्यते' ।।३८।।

किये हुए कर्मोके बारेमें भगवानकी इच्छासे देहात्मभाव होनेपर देहकी सहायतासे,'अहंकारसे विशेषरूपसे मूढ हुआ आत्मावाला (देह) में कर्ता हुं, ऐसा मान लेता है.' (३८)

वस्तुतस्त्वीश्वरेणेह तत् तद् द्वारेच्छयाखिलम्।
कार्यते क्रीडया तत्राहंकर्त्तेति मतिर्मृषा ।।३९।।

यथार्थतया तो इस जगतमें प्रभु उन उन जीवों द्वारा रमणार्थ ही सबकुछ करवाते हैं. अतः 'में कर्ता हुं', ऐसी जीवकी बुद्धि है वह मिथ्या है. (३९)

फलसाधनयोः प्रोक्तः 'कर्त्ता कारयिता हरिः'।
'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते' ।।४०।।
'यथा[१] दारुमयी योषा यथा यन्त्रमयो मृगः।
एवं भूतानि मघवन् ईशतन्त्राणि विद्धि भोः' ।।४१।।
यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते।
चिते कर्त्तरि तत्रात्मा कर्त्तेवाहंधिया स्मृतः ।।४२।।

फल तथा साधनके विषयमें, ''करनेवाले तथा करवानेवाले भगवान' ऐसा कहा जाता है. 'मैं सभीका उत्पत्तिस्थान हुं, मुझसे ही सभी कुछ प्रवर्तित हो रहा है.' ''जैसे कठपुतली, जैसे यन्त्रमय मृग, उसी प्रकार हे इंद्र! इन सभी भूत-प्राणियोंको प्रभुके तंत्रमें रहे हुए जानना''(भाग.पुरा.६।१२।१०). जिस प्रकार भ्रमरीकी दृष्टिसे पृथ्वी मानो घूमती हो ऐसा दिखाइ देता है, उसी प्रकार चित्त कर्ता हो, ऐसे कार्योंमें भी जीवात्मा,'मैं कर रहा हुं', ऐसा अहंभाव रखता है. (४०-४२)

उदिद्श्य संसृतिपदम् अहन्तामते अपि।
सर्वत्र तन् निवृत्त्यैव मुक्तिर्नैवान्यथोच्यते ।।४३ ।।

यहां संसारको तथा अहंता-ममताको लक्ष्यमें रखकर सर्वत्र इन तीनोंके निवृत्त होनेपर ही मुक्ति कही गइ है, अन्य किसी प्रकारसे नहीं. (४३)

''[१]एतद् द्वारो हि संसारो गुणकर्मनिबन्धनः।
अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेयते' ।।४४ ।।

इस अविद्याके कारण गुणकर्मके बंधनवाला, अज्ञानमूलक तथा अर्थहीन संसार होने पर भी मनुष्यको स्वप्नकी तरह प्राप्त होता है. (भाग.पुरा. ७।७।१७). (४४)

[१]त एतद् अधिगच्छन्ति विष्णोर्यत् परमं पदम्।
अहंममेति दौरात्म्यं न येषां देहगेहयोः ।।४५।।

जिन्हें देहमें 'मैं' और घरमें 'मेरा', ऐसी दुष्ट बुद्धि नहीं है, वे जीव ही विष्णुके परमपदको प्राप्त करते हैं(भाग.पु.१२।६।३२). (४५)

इत्यादि वचनैः तादृङ् मुधाप्रत्यय एव सः[१]।
तन्निवृत्या मता मुक्तिः देहादिस्तु न संसृतिः ।।४६ ।।

१. देहात्मभावो अध्यासः इति यावत्.

ऐसे अनेक वचनोंमें देहमें अध्यासमूलक आत्मभाव को मिथ्या बताया गया है. ऐसी बुद्धिके निवृत्त होने पर ही मोक्ष होता है. देहादि मिथ्या-संसारूप नहीं है. (सत्य है). (४६)

नैवात्मनो न देहस्य संसृतिः [१]सुविविक्तयोः।
अविवेकस्तयोः योसावथ तस्यैव संसृतिः ।।४७ ।।

१. अहन्तामममतयोः संसृतित्वात् तस्याश्च चित्युपलभ्यमानत्वात् तस्य चेतनस्य तु ब्रह्मरूपत्वातत् सा न संभवति. न च देहस्यैव सा वाच्या इति वाच्यं, जडत्वात्. अतः पृथक्-पृथक् विद्यमानयोः देहात्मनोः अविवेकवतो अर्थाद् देहात्मभाववतः आत्मनि च देहभाववतएव संसारः इत्यर्थः.

अत्यंत भिन्न ऐसे आत्माको प्राप्त हुआ देह संसाररूप नहीं है. परंतु इनके संयोगमें रही हुइ अविवेक बुद्धि (पृथक् होनेके बोध बिनाकी) है, उसे संसार कहते है. (४७)

एकादशस्य अष्टाविंश इति भेदेन रूपणात्।
देहादेः संसृतित्वे तु जीवन्मुक्तिर्न युज्यते ।।४८।।

श्रीमद्भागवतके दशमस्कंधके २८वें अध्यायमें स्पष्ट भेदका निरूपण किया गया है. क्योंकि यदि देहादिक मिथ्या (भ्रांतिरूप) संसारमूलक हों, तो जीवन्मुक्ति ही संभव नहीं रहेगी. (४८)

प्रत्यक्ष एव देहादिः मुक्तस्यापि तु जीवतः।
सति संसरणे मुक्तिः कुतः शास्त्रविरोधिनी ।।४९।।

मुक्त हो ऐसे जीवको भी देहादि प्रत्यक्ष हैं हीं, यदि वे संसाररूप होते तो मुक्ति की अवस्थामें भी कैसे स्थित होते? ऐसी मुक्ति तो शास्त्रोंमें कहीं भी कही नहीं गइ है. (४९)

तस्माद् अहंता देहादौ अध्यासाभावतो न[१] हि।
ममताहन्त्वमूला तु तन्निवृत्त्या निवर्त्तते ।।५०।।

१. नश्यति इति अर्थः.

अतः देहादिमेंसे अध्यासका अभाव होनेपर अहंताका नाश हो जाता है, तथा अहंताका नाश हो जानेपर अहंतामूलक ममताका भी नाश हो जाता है. (५०)

'आत्मलाभे तु विद्यातो मुक्तो जीवन् भविष्यति'।
देहसंसारभेदोऽतः सिद्धान्तः श्रुतिसम्मतः ।।५१।।

'विद्या द्वारा आत्माकी प्राप्ति होनेपर जीव जीवन्मुक्त हो जायेगा'. इस प्रकार देह तथा संसारका भेद प्रतिपादित करनेवाला सिद्धांत वेदसम्मत है. (५१)

सम्यक् प्रकारं सरणं स्वरूपात् च्यवनं दृढम्।

ब्रह्मांशस्यान्यथाभावः तत् संसरणम् उच्यते ।।५२ ।।

सम्यक् प्रकारसे संसारमें चलते रहना, अपने स्वरूपसे भ्रष्ट हो जाना, स्वयं ब्रह्मका अंश है उससे विपरीत ज्ञान प्राप्त करना, इन्हें संसार कहा जाता है. (५२)

असत्या संसृतिः सत्यः प्रपंच इति निर्णयः ।
ऐंद्रजालिकवत् स्पष्टं साऽसत्याऽपि प्रतीयते ।।५३ ।।

संसार असत्य है, प्रपंच सत्य है यह निष्कर्ष है. इंद्रजालकी तरह असत्य होनेपर भी संसारकी प्रतीति होती है. (५३)

जीवा यस्य स्वांशा न प्रतिबिम्बा न चाभासाः।
यत्कृतसंसरणास्तत् चरणं शरणं व्रजामि भवतरणम् ।।५४ ।।

जिन प्रभुके जीव अंश हैं, प्रतिबिंब अथवा आभास नहीं हैं तथा प्रभुकी इच्छासे ही जीव संसार प्राप्त करते हैं, ऐसे प्रभुके भवतारक चरणोंकी शरणमें मैं जाता हुं. (५४)

इति श्रीमद्वल्लभाचार्यमतवर्त्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज गोवर्द्धनशीघ्रकवि विरचिते वेदान्तचिन्तामणौ जीवोद्गमसंसारनिरूपणं नाम सप्तमं प्रकरणम् ।।७ ।।

d

जीवान्तर्यामिशुद्धाद्वैतार्थनिरूपणं नाम
अष्टमं प्रकरणम्

जीवान्तर्यामिणौ स्वांशौ अणुकौ भोक्तृसाक्षिणौ ।
येनान्तःस्थापितौ ज्ञाज्ञौ नमस्तस्मै कृपालवे।।१।।

अपने अंशरूप, अणुरूप, भोक्ता तथा साक्षीरूपमें स्थित 'ज्ञ' और 'अज्ञ' रूप जीव तथा अंतर्यामीको जिन्होनें अपनेमें स्थापित किया है, उन परम कृपालु प्रभुको नमस्कार. (१)

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
एकस्ततयोः पिप्पलं स्वाद्वत्ति अनश्नन् अन्यो अभिचाकशीति'।।२।।

दो जुडवा पक्षी एक ही वृक्षके उपर बैठे हुए थे. उन दोनोंमेंसे एक स्वादिष्ट फल खा रहा है, तथा दूसरा बिना खाए उसे देख रहा है(मुण्डकोप ३।१।१). (२)

'सुपर्णावेतौ सहजौ सखायौ यदृच्छया कृतनीडौ च वृक्षे ।
एकस्तयोः खादति पिप्पलान्नम् अन्यो निरन्नोऽपि बलेन भूयान्।' ।।३।।

एकसाथ जन्मे हुए ये दोनों ही पक्षी किसी अचिंत्यको प्राप्त करनेकी इच्छासे एक ही वृक्षके ऊपर अपना घोंसला बना रहे हैं. उनमेंसे एक फल खा रहा है, तथा दूसरा बिना खाए भी बलवान है(भाग. ११।११।६). (३)

'हंसावहं च त्वं च आर्य सखायौ मानसायनौ ।
गुहां प्रविष्टावात्मानौ सूत्रेऽप्येतद् गुहा तु हृत्'।।५।।

'हे आर्य! मानसमें रहे हुए तू और मैं, दोनों मित्र हैं. 'गुहामें प्रविष्ट दो आत्मा', इस व्याससूत्रमें प्रयुक्त गुहापदका अर्थ हृदय है(भाग.४।२८।५४). (५)

'यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाक–
तण्डुलो वा एवम् अयम् अन्तरात्मन् पुरुषो हिरण्मयः'।।६।।

जैसे चावल, जौ, सांव आदिके दाने बाहरी आवरणके अंदर रहे हुए हैं, उसी प्रकार वह हिरण्मय पुरुष अंतरात्मामें रहा हुआ है(वाजसनेयिशाखायाम्). (६)

इत्यादिश्रुतिभी(?) रूपं तस्योक्तं स्मृतिभिस्तथा ।

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन! तिष्ठति'।।७।।

हृदि हृदि धिष्ठितम् आत्मकल्पितानाम्'।

स विद्यमानानन्दत्वाद् ऐश्वर्याद् ज्ञानतस्तथा।

न दुःखसुखभोक्तृषां साक्षी द्रष्टैव किं तु सः।।८।।

इन उपनिषद्वाक्योंमें तथा स्मृतिवाक्योंमें भी इसी रूपका वर्णन किया गया है. गीतामें जैसे – हे अर्जुन! ईश्वर सभी भूतोंके हृदयमें बिराजमान हैं'. 'प्रभु द्वारा प्रकट किये गए सभी जीवोंके हृदयमें प्रभु बिराजमान हैं'(भाग.पु.१।९।४२). उस अंतर्यामीमें आनंद गुणधर्म होनेसे, ऐश्वर्य तथा ज्ञानके कारण उसे सुख-दुःखका भोग नहीं करना पडता है; वह मात्र जीवकी क्रियाओंका साक्षीवत् दर्शक है. (७-८)

तद् वेदवाक्ये 'द्वावीशानीशौ ज्ञाज्ञा'विति स्फुटम्।

'सम्भोगप्राप्तिरिति' चेद् न वैशेष्यात् च सूत्रतः।।९।।

१.ननु जीववद् यदि भगवानपि हृदि तिष्ठेत् तर्हि तस्यैव अस्यापि सुख-दुःखादिभोगः प्राप्तिः इति चेद् न इदम् उचितम्. ईश्वर आनन्दादिधर्मस्य विशेष इति तस्य न भोगः (ब्रह्मसूत्र १।२।८).

श्रुतिवाक्योंमें 'एक ईशज्ञ तथा दूसरा अनीशज्ञ' तथा 'उसे भी सुख-दुःखका अनुभव होता है', ऐसा यदि कहते हो तो नहीं; उस अंतर्यामीमें स्थित विशेषके कारण वह सुख-दुःखका भोग नहीं करता है.' ऐसा व्याससूत्रमें स्पष्ट कहा गया है. (९)

वैशेष्यं जीवतस्तत्रानन्दधर्माविलोपनात्[१]।

द्वैतं सृष्टौ तयोरेव न जीवब्रह्मणोः क्वचित्।।१०।।

१.आनन्दश्च ऐश्वर्यादिधर्माश्च तेषाम् अविलोपनम् अतिरोभाव इति यावत्. तस्मात्.

जीवसे अधिक प्रभुमें विशेषता यह है कि आनंद गुणधर्मके तिरोभाव-अभावके कारण सृष्टिमें जो द्वैत है, वह जीव तथा अंतर्यामीका है. जीव तथा ब्रह्मका नहीं. (१०)

अन्तर्यामिब्राह्मणेऽन्तर्यामिपादे च विस्तृतम्।

रूपं तस्य ततः स्पष्टं भाष्यादेरवधार्यताम्।।११।।

अंतर्यामीब्राह्मणके अंतर्यामीपादमें उसके स्वरूपका विवेचन विस्तारसे किया गया है. अणुभाष्य आदिमें भी इस विषयकी स्पष्टता है, अतः विशेष निरूपण वहां दृष्टव्य है. (११)

सच्चिन्मात्रश्चित्प्रधानो ब्रह्मस्वांशो हृदि स्थितः।
विसर्पिचैतन्यगुणोऽणुर्जीवो विद्यया सितः[१]।।१२।।

१.बद्धः।

सदंश तथा चिदंशमें, चित् जिसमें मुख्य है ऐसा, हृदयमें स्थित ब्रह्मके अंशरूप, जिसमें चैतन्य गुणका प्रवाह चलता रहता है, ऐसा अणु जीव अविद्यासे बंधा हुआ है. (१२)

''[१]एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पंचधा संविवेश'।
इत्यादिश्रुतिभिः तस्याणुमात्रत्वं निरूप्यते।।१३।।

'इस अणुस्वरूप आत्माको चित्त द्वारा जान लेना चाहिए, कि जिसमें प्राण पांच प्रकारसे प्रवेश करके रहा हुआ है'(मुण्डकोप.३।१।९) इन श्रुतिवाक्योंसे जीवका अणुत्व द्योतित होता है. (१३)

''[१]नाऽणुरतच्छ्रुतेरिति चे[२]तराधिकारात्' ।
इत्यादिसूत्रतो व्यासचरणैर्निरणायि तत् ।
'स एष आत्मा हृदिहीत्यादिभिः श्रुतिभिरीरितम्।।१४।।

१. ननु जीवो अणुः न अणुत्वविरुद्धा 'एष महान् अज आत्मा' इति व्यापकत्वश्रुतिः मिलतीति चेद्, न, सा व्यापकत्वश्रुतिः ब्रह्मप्रकरणे पठितेति न जीवाणुत्वबाधिका.

श्रुतिमें अणु परिमाण कहीं कहा नहीं गया है, अतः जीव अणु नहीं है, ऐसा यदि कहते हो, तो ऐसा नहीं है. जहां 'महान अज' आदि कहा गया है, वहां तो परब्रह्मकी बात है. इन व्याससूत्रोमें भी बादरायण व्यासजीने निर्णय किया है. 'यह आत्मा हृदयमें' आदि श्रुतिवचनोंसे भी यह सिद्धांत सूचित होता है. (१४)

''[१]अवस्थिति वैशेष्याद् इति चेन्नाभ्युपगमाद् हृदि हि'।
व्यासोऽप्यसूत्रयदिति तस्माद्धृद्येव संस्थितिः।।१५।।

१.ननु चन्दनादेः अवस्थितिः एकत्र निश्चिता न पुनः जीवस्य इति द्रष्टान्त वैषम्यात् न अणुः स इति चेद्, न, वेदे जीवस्य स्थितिरपि हृदि स्वीकृता इति.

‘जीवकी स्थिति साथ ही होनेसे, वह विशेष होनेसे अणु नहीं है ऐसा यदि कहते हो, तो नहीं ऐसा नहीं है. वेदमें जीवकी स्थिति भी हृदयमें स्वीकारी गइ है, ऐसा व्यासजीने सूत्रमें कहा है. अतः जीवकी हृदयमें सहस्थिति है. (१५)

हृत्स्थो गुणात् [1]स चैतन्यां सम्पूर्णां तनुते तनुम् ।
कोणस्थितो यथा दीपोऽखिले गेहे प्रकाशते ।।१६।।

१.चेतनवतीम् इति अर्थः. विधेयविशेषणम् एतत्.

जैसे एक स्थानमें रखा हुआ दीपक, पूरे आलयमें प्रकाश फैलाता है, उसी प्रकार हृदयमें स्थित जीवात्मा अपने चैतन्यगुणसे संपूर्ण देहको चैतन्यवान् बनाता है. (१६)

कस्तूरिका स्थितैकत्राभिव्याप्नोति स्वगन्धतः ।
देशं महान्तं, देहं स चैतन्येन तथाखिलम्।।१७।।

एक ही स्थानविशेष में रही हुइ कस्तुरी अपनी गंधसे जैसे बडे विस्तारको व्याप्त करती है, उसी प्रकार चैतन्यगुणसे आत्मा संपूर्ण देहमें व्याप्त है. (१७)

व्यासो विसर्पिगुणतां ‘गुणाद् वालोकवत्’[1] तथा ।
‘व्यतिरेको[2] गन्धवच्चे’त्यादि द्रष्टान्ततोऽवदत्।।१८।।

१.दीपप्रभादिवत् स्वगुणेन जीवः सर्वदेहे चैतन्यं करिष्यति इत्यर्थः (ब्रह्म-सूत्र२।३।२५). २.विशेषण अतिरेको अधिकदेशविसर्पित्वम् इति यावत्. यथा पुष्प-लशुनादिसगन्धपदार्थानां गुणो अधिकदेशवर्ती तथा जीवस्यापि इति न दोषः. (ब्रह्मसूत्र २।३।२६)

‘गुण दीपककी तरह’, तथा ‘गंध जैसे व्यतिरेक स्वरूप’, इन दृष्टांतोंमें व्यासजीने भी जीवके गुणका देहव्यापी होना निरूपित किया है. (१८)

शांकरास्तार्किका जीवम् एकं व्यापकम् आलपन् ।
जीवैकत्वे सर्वमुक्तिरेकम् उक्त्या भविष्यति।।१९।।

श्रीशंकराचार्यजी तथा नैयायिक, एक ही जीवको व्यापक कह रहे हैं. परंतु एक ही जीवकी व्यापकता स्वीकारने से एक जीवकी मुक्तिसे सभीकी मुक्ति हो जानेकी आपत्ती खडी होगी. (१९)

सति बन्धे नैव मोक्षो यात्येकः पुण्यतो दिवम् ।

अन्यः पापेन नरकम् इति श्रौतं न युज्यते।।२०।।

(अविद्यासे) बंधे हुए होनेके कारण मुक्ति हो नहीं सकती है. 'पुण्यसे एक स्वर्गमें जाता है तथा दूसरा पापसे नर्कमें जाता है' – यह वेदसिद्ध व्यवस्था भी व्यर्थ हो जायेगी. (२०)

'सर्वे जीवा'[१] बहवचः श्रुत्युक्तं च विरुध्यते ।

व्यापकस्योद्गमो नैव, नोपाधेर्जीवकल्पनात्[२]।।२१।।

१.सर्वे जीवा व्युच्चरन्ति इत्यादि बहुवचनम् इति यावत्. २.प्राणाद्युपाधेरेव उद्गमः इति तु न वक्तुं शक्यम्. त्वन्मते तस्य जीवभ्रान्तिकल्पितत्वाद् इति अर्थः.

'सर्वे जीवाः' आदि श्रुतिके शब्दोंमें बहुवचन कहा है, उसका भी विरोध होगा. जो व्यापक हो उसकी उत्पत्ति नहीं होती है. आप कहोगे कि 'उपाधि व्यापक है', तो ऐसा भी संभव नहीं है, क्योंकि जीवके उद्गमकी बात तो स्पष्ट ही है. (२१)

'यत् प्रयन्ति' इति जीवानां प्रलयो नेह सम्भवेत् ।

ज्ञानात् तत्र प्रवेशोऽपि विशते तदनन्तरम्।।२२।।

'जिनमें प्रविष्ट हो जाता है', – इस वचनमें जो जीवका प्रलय कहा है, वह भी संभव नहीं रह जाएगा. ज्ञानसे प्रभुमें प्रवेश होता है, ज्ञान होनेके बाद प्रवेश होता है. (२२)

किञ्च जीवः स्वतन्त्रो वा ब्रह्मैवोपहितं तथा ।

आद्ये द्वैतं बन्धमोक्षौ नापि[१] ब्रह्मात्मता भवेत्।।२३।।

१.देहली दीपकन्यायेन पूर्वोत्तरपदयोः इदम् उभयोः अन्वेति।

जीव स्वतंत्र है या ब्रह्मका उपधान है? यदि स्वतंत्र है ऐसा कहेंगे तो द्वैत हो जाएगा और ऐसा होनेसे बंध, मोक्ष तथा ब्रह्मात्मकताका सिद्धांत भी व्यर्थ हो जाएगा. (२३)

न स्यात् कस्यापि मरणं व्याप्तेर्जीवस्य [१]तादृशः।

द्वितीये[२] तु न [३]तद्व्याप्तिः किन्तु स्याद् ब्रह्मणो हि सा।।२४।।

१.षष्ठ्यन्तम्. २.उपहितं ब्रह्मैव जीवः इति पक्षे. ३.तस्य जीवस्य व्याप्तिः इति भावः।

व्यापक कहनेसे किसी भी जीवकी मृत्यु भी नहीं होगी. ब्रह्मके

उपधानवाला जीव है ऐसे पक्षमें जीवकी व्यापकता ही संभव नहीं रह जाएगी क्योंकि वह व्यापकता तो ब्रह्मकी मानी जाएगी. (२४)

आकाशं व्यापकं व्याप्तिः घटाकाशस्य न क्वचित् ।

उपाधिनाशो मोक्षश्चेत् जीवनाशः[१] स कथ्यताम्।।२५।।

१.उपाधियुक्तस्यैव जीवत्वात्.

आकाश व्यापक है, परंतु घट व्यापक है, ऐसा तो कभी सुना नहीं है. 'जैसे ही उपाधिका नाश होगा, त्वरित ही मोक्ष होगा' ऐसा स्वीकारनेपर, जीव उपाधियुक्त होनेसे जीवका नाश ही मानना होगा. (२५)

सर्वज्ञं निर्गुणं पूर्णं ब्रह्म बद्धम् उपाधिना ।

तदेवोपाधितो मुक्तं साधनैर्विप्लवो महान्।।२६।।

'सर्वज्ञ, निर्गुण, पूर्ण ब्रह्म उपाधिसे बंधा हुआ था तथा वही साधनबलसे मुक्त हुआ, ऐसा कहने से तो बहुत विप्लव हो जाएगा. (२६)

उत्क्रान्तिगत्यागतयो वेदसूत्रादिसम्मताः ।

व्यापकस्य न युज्येरन् चेद् उपाधेः प्रवक्षि[१] ताः।।२७।।

'तं प्राणोऽनूत्क्रामती'तिश्रुतिस्तर्हि विरुद्ध्यते ।

श्रुतेः स्मृतेश्च सूत्राणां न व्याप्तिः तस्य[२] सम्मता।।२८।।

१.वदसि. २.जीवस्य.

वेद, व्याससूत्र आदिमें जीवका उत्क्रमण, गति तथा अगति कहे गए हैं. ये सभी क्रिया व्यापक जीवमें तो हो नहीं सकती है. यदि कहें कि उपाधियुक्त जीवमें ये सभी क्रियाएं हैं तो 'उसका अतिक्रमण प्राण नहीं करता है', इस उपनिषद्वाक्यमें विरोध आयेगा. श्रुति, स्मृति तथा सूत्रोंमें जीवकी व्यापकता मान्य नहीं है. (२७-२८)

'नित्यः सर्वगतस्थाणु'र्ब्रह्म सर्वत्र यद् गतम् ।

सह तिष्ठति तेनाणुरचलैकार्थतान्यथा[१]।।२९।।

१.'नित्यः सर्वगतस्थाणुः' इति गीताश्लोके तु सर्वगतं ब्रह्म तेन सह हृदये तिष्ठति इति अर्थः ज्ञेयः. अन्यथा (स्थाणुरिति भिन्ने पदे स्वीकृते तु) अचल इति पदेन एकार्थता तेन पौनरुक्त्यं स्याद् इति अर्थः.

'नित्यस्वरूप, सभीमें स्थित, अणुस्वरूप ब्रह्म सभीमें अवस्थित होनेसे

वह जीवके साथ रहा हुआ है.' इस गीतावाक्यमें 'अणु' शब्दका स्वीकार न किया जाए तो स्वतंत्र 'स्थाणु' शब्द लेनेसे तो 'अचल' अर्थ होता है, परंतु ऐसा करनेसे 'सर्वगत' पदसे विरोध आयेगा. (२९)

शरीरे गुणतो व्याप्तेः क्वचिद् व्यापकतोदिता ।
ब्रह्मवद् व्यापकत्वे तूक्तान्यश्रुत्यादिबाधनम्।।३०।।

हां! जीव देहमें उसके उन गुणोंके साथ व्यापक है, ऐसी व्यापकता कहीं भी कही नहीं गइ है. यदि ब्रह्मकी तरह जीव व्यापक है, ऐसा कहा जाए तो दूसरी अनेक श्रुतियोंके साथ विरोध होगा तथा श्रुतिवचनोंसे बाध प्रकट होगा. (३०)

शाङ्करानां मते कर्तृ न प्रपञ्चस्य भोक्तृ च ।
धर्माकारक्रियात्यन्ता भाववद् ब्रह्म कथ्यते।।३१।।
मायायां प्रतिबिम्बोऽस्य तत्कर्ता शबलाभिधः ।
प्रतिबिम्बस्त्वविद्यायां तस्य जीवोऽभिधीयते।।३२।।

श्रीशंकराचार्यजीके मतानुसार ब्रह्म जगतके कर्ता तथा भोक्ता नहीं है. उनका कोइ आकार, धर्म, क्रिया आदि भी नहीं है. ब्रह्मका जिस मायामें प्रतिबिंब पडता है, ऐसे 'मायाशबलित ब्रह्म' के अविद्यामें पडते प्रतिबिंबको जीव कहा जाता है. (३१-३२)

[१]तद्रूपोपाध्यवच्छिन्ने चैतन्ये ब्रह्मरूपिणि ।
अथवा तौ घटमठोपहिताकाशवत् कृतौ।।३३।।
सत्वे तु शुद्धमलिने मायाविद्ये अनादिमे ।
तत्रावच्छिन्नपक्षस्तु संक्षेपेण निराकृतः।।३४।।

१.मायाविद्यारूपोपाधियुक्तं यद् ब्रह्मरूपं चैतन्यं तस्मिन्नेव जीवेशौ इति कृतौ. यथा आकाश एकस्मिन्नेव घटमठोपाधियुक्ते घटाकाशमठाकाशौ इति व्यवहारः इति वा पक्षः इत्यर्थः.

माया तथा अविद्याकी उपाधिसे युक्त चैतन्य ब्रह्मरूपी है तथा घटाकाश और मठाकाशके साथ जैसे व्यवहार होता है, उसी प्रकार इस ब्रह्ममें यह जीव है तथा यह ईश है ऐसी मान्यता है. ऐसी परिस्थितिमें शुद्ध और मलीन ऐसी माया और अविद्याको अनादि माना गया है. इसमें उपाधियुक्त होनेका जो पक्ष है, उसका पूर्वमें संक्षेपमें निराकरण कर दिया गया है. (३३-३४)

दृश्यते प्रतिबिम्बस्तु न [1]वाय्वादेर्निराकृतेः ।
न द्रष्टो मलिनेऽप्येष मृदादावन्यथा भवेत्।।३५।।

१.रूपाकारप्रयोजकएव प्रतिबिम्बो द्रष्टः इति.

प्रतिबिंब भी निराकार वायु जैसे पदार्थोंका दिखाइ नहीं देता है. मिट्टी आदि मलीन पदार्थ हैं, उनमें भी प्रतिबिंब नहीं दिखता है, क्योंकि मलीन पदार्थमें प्रतिबिंब पडता है, यह मत स्वीकारनेसे मिट्टी जैसे पदार्थमें भी प्रतिबिंब पडना चाहिए, तभी यह पक्ष सिद्ध हो पाएगा. (३५)

चेत् तादृग् ब्रह्मणस्तत्र किं न स्याद् वायुदारूणोः ।
अलीकं प्रतिबिम्बं न जीवस्यालीकता क्वचित्।।३६।।
श्रौतो [1]गुहायां नैकस्यां प्रवेशो युज्यते द्वयोः।
इत्यादि तत्त्वदीपे चोक्तं विद्वन्मण्डने बहु।।३७।।

१.'द्वासुपर्णे'त्यादिश्रुत्युक्तः।

यदि कहोगे कि ऐसे ब्रह्मका वहां प्रतिबिंब पडता है, तो वायु तथा लकडीका अलीकप्रतिबिंब क्यों नहीं पडता है? यह तो स्पष्ट ही है कि जीवका मिथ्यात्व कहीं भी कहा नहीं गया है, क्योंकि एक गुहामें दोनोंका प्रवेश उपनिषदमें कहा गया है, यह भी असिद्ध हो जाएगा. इन्हीं तर्कोंको तत्त्वार्थदीप-निबंधमें और विद्वन्मंडनमें निरूपित किया गया है. (३६-३७)

अविद्योपाधिरहितं जीवत्वम् इति ते जगुः।
पारतन्त्र्यं भगवतो द्वैतापत्तिश्च तन्मते।।३८।।

उन लोगोंने जीवत्व अविद्यारूप उपाधिसे होना मान्य किया है. ऐसे मतमें भगवानकी परतंत्रता तथा द्वैत सिद्ध होता है. (३८)

अंशानां जीवभावस्त्वीशेच्छयोक्तप्रकारया ।
शक्त्याऽविद्योपाधिना तु संसार इति वैदिकम्।।३९।।

वैदिक सिद्धांत तो यह है कि बृहदारण्यकादिमें कहे गए सिद्धांतानुसार भगवानकी इच्छासे अंशरूपी जीवोंमें जीवत्व होता है; अविद्यारूप उपाधिवाली शक्तिसे होती भ्रांतिसे तो जीवको संसार होता है. (३९)

तस्माद् एवोद्गमस्तस्मिन् लयो मध्ये च दृश्यते ।
कार्यात्मनेच्छया भेदो जडजीवान्तरात्मनाम्।।४०।।

उन्हीं ब्रह्ममें उद्गम होता है तथा लय भी तथा मध्यावस्थामें स्थितिकालमें कार्यरूपमें स्वेच्छया प्रकट जड-जीव तथा अंतर्यामीका भेद देखने मिलता है. (४०)

शुद्धाद्वैतमतः[१] सिद्धं श्रुतिस्मृत्यादिसम्मतम् ।
द्वीतं तयोरितं[२] (?) ज्ञानं[३] तद्द्वैतं द्वीतमेव यत्।।४१।।

१.शुद्धस्य मायासम्बन्धरहितस्य कार्यस्य कारणेन ब्रह्मणा सह अद्वैतं ऐक्यम् इति अर्थः. २.अयनं इतं भावे क्तः। ३.'ये गत्यर्थकाः ते ज्ञानार्थका' इति स्वीकारात् ज्ञानम् इत्यर्थः।

इस प्रकार सिद्ध किया गया शुद्धाद्वैतमत श्रुति-स्मृति संमत है. द्वीत अर्थात् दो का ज्ञान. जो द्वीत है वही द्वैत है. (४१)

कार्यकारणरूपं तद् ईशजीवात्मकं तथा ।
नामरूपात्मकं चेति त्रिविधं समुदाहृतम्।।४२।।

यह द्वैत कार्यकारण के रूपमें, जीव-ईशके रूपमें तथा नाम-रूपके रूपमें, ऐसे तीनों प्रकारसे कह गया है. (४२)

द्विविधं दूषितं तत्राप्यग्रे तद् दूषयिष्यते ।
नामरूपात्मकं द्वैतं शाङ्कराणां यथोदितम्।।४३।।

इनमेंसे प्रथम दो के दोष तो पूर्वमें बता दिए गए हैं. शांकरों द्वारा कथित तीसरे नाम-रूपके द्वैतमें दोष अब दिखा रहे हैं. (४३)

अस्ति भाति प्रियं रूपं नाम चेत्यर्थपञ्चकम्[१]।
आद्यं त्रयं ब्रह्मरूपं मायारूपं ततः परम्।।४४।।
अस्तिभातिप्रियत्वं तु जातं कार्यात्मनेच्छया ।
सच्चिदानन्दरूपस्य व्याकृतिर्नामरूपयोः।।४५।।

१.सिद्धान्ते तु पञ्चापि कार्यकारणयोः अंशपञ्चकम्.

अस्ति अर्थात् है, भाति अर्थात् दिखाइ देता है, प्रिय, रूप तथा नाम - ऐसे अर्थके पांच प्रकार हैं. इनमेंसे प्रथम तीन ब्रह्मरूप है, अंतिम दोनों मायारूप हैं. सच्चिदानंदरूपमेंसे स्वेच्छया कार्यके रूपमें अस्ति, भाति तथा प्रिय प्रकट हुए तथा नाम और रूपके आकार हुए. (४४-४५)

'स सर्वनामा स च सर्वरूप' इति कीर्त्यते ।

'नामरूपे व्याकरवाणी'तीच्छाऽस्याभवत् पुरा ।।४६।।

'वह सर्वनाम तथा सर्वरूप है', ऐसा कहा गया है. 'मैं नाम तथा रूपोंको व्याकृत करुं', ऐसी पूर्वमें प्रभुको इच्छा हुई. (४६)

विभिद्य रूपम् एकैकं शब्दजालात् स्ववाचकात् ।
तत् तद् वाचीनि नामानि व्यवहाराय निर्ममे ।।४७।।

अपने अपने वाचक शब्दसमूहोंमेंसे उन-उन रूपोंके भेद पृथक् करके व्यवहारार्थ तत्तद् नाम उनके वाचक बने. (४७)

'सर्वाणि रूपाणि विचित्य धीर' इति पौरूषम् ।
सूक्तं श्रुत्यन्तराण्येवं तत्कौर्मे चोपबृंहितम्।।४८।।

'धीरपुरुष सभी रूपोंको एकत्र करके.....' ऐसा पुरुषसूक्तका वाक्य तथा अन्य उपनिषद् के वाक्य भी यही विधान करते है, जिसका समर्थन कूर्मपुराणम किया गया है. (४८)

सर्वेषां तदधीनत्वात् तत्तच्छब्दाभिधेयता[१]।
अन्येषां व्यवहारार्थम् इष्यते व्यवहर्तृभिः।।४९।।

१.प्रथमतः सर्वेषां (पदार्थानां तद्व्यवहाराणां वा) भगवत्कृतव्याकरणा-धीनत्वात् घटपटादि शब्दवाच्यता जाता. तद् अर्वाचीनेतु काले यथाबुद्धिव्यवहर्तृभिरेव तत्तन्नामनियमनं कृतम् इति अर्थः. यथा 'रेल' इति।

सभी प्रभुके अधीन होनेके कारण दूसरोंके साथ व्यवहार करनेवाले अपने व्यवहारार्थ तत्तद् शब्दोंसे तत्तद् नामोंको चाहते हैं. (४९)

[१]अनामरूपता तस्यालौकिकत्वाय वर्णिता ।
माहात्म्यबोधनायैव, लौकिकोऽस्ति घटो यथा ।।५०।।
रूपं नियतम् एवास्य तत् तिरोभावशालि च ।
द्वित्राण्येव च नामानि न [२]तथास्येति निश्चयः।।५१।।

१.ननु ब्रह्मतु अरूपनामि श्रूयते कथमिव उच्यते तस्यैव सर्वाणि नामानि? इति तत्र आह अनामरूपता इति. २.ब्रह्मणः।

जहां कहीं भी ब्रह्मको अनाम तथा निरूप कहा है, वहां सर्वत्र उनकी अलौकिकता वर्णित हुइ है. उद्देश्य भगवानके महात्म्यका वर्णन करना है. उदाहरणतया जैसे घट लौकिक होनेसे उसका रूप निश्चित है. उस आकारका

तिरोभाव हो; ऐसा घटका स्वभाव भी है अतः उसके दो-तीन नाम हैं. ब्रह्ममें ऐसा कुछ भी नहीं है, यह निश्चय है. (५०-५१)

व्याकृतिः सृष्टिकालेऽतः पूर्वम् अव्याकृतिस्तयोः।
द्वयोर्ब्रह्मैकनिष्ठत्वं बृहदारण्यके स्फुटम्।।५२।।

सृष्टि उत्पन्न करते समय आकार उत्पन्न हुए, संज्ञा उत्पन्न हुई. उससे पूर्व तो नाम-रूप स्पष्टतया व्याकृत नहीं थे. 'नाम तथा रूप ब्रह्ममें ही स्थित हैं', यह तो बृहदारण्यक उपनिषदमें स्फुट ही है. (५२)

'तद् वेदं तर्ह्यव्याकृतम् आसीत् तन् नामरूपाभ्याम् ।
व्याक्रियते असौ नामायम् इदंरूपोऽयम् इति ।
[1]एतन्मते सु निष्पन्नं सांकर्यं कार्यकारणे ।
तन्निवृत्त्यर्थम् आचार्यैः पदं शुद्धं विशेषितम्।।५३।।

१.शांकरमते।

जिस समय सब कुछ अव्याकृत था तब, 'इसका यह नाम है, यह रूप है', ऐसी ब्रह्मकी इच्छासे नाम तथा रूपकी आकृति प्रकट हुई. श्रीशंकराचार्यजीके मतमें कार्य तथा कारणके विषयमें जो सांकर्य आ गया है उसे दूर करनेके लिए श्रीमहाप्रभुजीने शुद्ध पद अद्वैतके विशेषण के रूपमें दिया है.(५३)

'शुद्धाद्वैत'पदे ज्ञेयः समासः कर्मधारयः ।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः।।५४।।
मायासम्बन्धरहितं शुद्धम् इत्युच्यते बुधैः ।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम् ।।५५।।
इति श्लोक त्रयेणात्राद्वैते शुद्धविशेषणम् ।
गोस्वामिर्गिरिधरैर्मार्तण्डे[1] विवृतं स्वके।।५६।।

१.शुद्धाद्वैतमार्तण्ड इति ग्रन्थे।

शुद्धाद्वैत पदमें कर्मधारय समास है. बुद्धिमान पुरुषोंने यहां षष्ठी तत्पुरुष समास भी कहा है. शुद्ध कार्य तथा कारणका अद्वैत ही शुद्धाद्वैत है. मनीषी पुरुष कहते हैं कि मायाके संबंधरहित जो है वह शुद्ध है. यह अर्थ तीन श्लोकों द्वारा काशीवाले श्रीगिरिधरजीने अपने 'शुद्धाद्वैतमार्तण्ड' नामके ग्रंथमें शुद्ध विशेषण

के विवरणमें दिये है. (५४-५५-५६)

अद्वैते शुद्धता श्रीमद् वल्लभाचार्यरूपिते ।

मतान्तरेषु सर्वत्र दृश्यते द्वैतमेव यत्।।५७।।

श्रीवल्लभाचार्यजी द्वारा कथित अद्वैतमें शुद्धता है, अन्य मतोंमें द्वैत ही देखने मिलता है. (५७)

दुर्मतनिरासकृतिनाम् आचार्य्याणां हुताशनाख्यानाम् ।

अन्तःकरणविभूषणसुरपतिरत्नं[१] तमः[२] स[३] मे हन्तु ।।५८।।

१.नीलमणिः. २.अज्ञानान्धकारम्. ३.श्रीकृष्णः.

दोषदुष्ट मतोंका निराकण करनेवाले, 'अग्नि' नामक आचार्य श्रीवल्लभाचार्यजीके अंतःकरणके भूषणरूप नीलमणि श्रीकृष्ण मेरे अज्ञानरूपी अंधकारको नष्ट करो. (५८)

इति श्रीमद्वल्लभाचार्यमतानुवर्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज श्रीगोवर्धनशीघ्रकवि विरचिते वेदान्तचिन्तामणौ जीवान्तर्यामिस्वरूपविवेकपूर्वकशुद्धाद्वैतार्थनिरूपणं नाम अष्टमं प्रकरणम्।।८।।

d

ब्रह्मसाकारत्वविवेको नाम

नवमं[१] प्रकरणम्

१.अस्मिन् प्रकरणे परब्रह्मणः साकारत्वनिरूपणम्. निराकारत्वोक्तिस्तु तन्माहात्म्यबोधायएव इति कथ्यते. आनन्दएव ब्रह्मणि रूपस्थानीयः. अतएव उक्तं सूत्रकर्त्रा 'अरूपवदेव हि तत्प्रधानत्वाद्' इति. रूपवद्भिन्नं तद् ब्रह्मेति तत्र अर्थः. अरूपि ब्रह्म इति विवक्षितं चेद् 'अरूपमेव हि' इत्यादि सूत्रं कुर्यात्. न तु तथा. तस्मात् साकारमेव परंब्रह्म सूत्रकर्तुः अभिमतम्. गीतायां तु सर्वत्रैव प्रायो ब्रह्मणः साकार-व्यापकत्वम् अभिहितम्. इदं सर्वं हृदिकृत्वा आह भगवती श्रुतिः 'आनन्दं ब्रह्मणो विद्वान्' 'आनन्दं ब्रह्मणोरूपम्' इत्यादि.

स्वाभिन्नाऽप्राकृतैर्धर्मैः श्रितं सर्वैर्विरोधिभिः ।

शक्तीभिस्ताद्रूप्यशीभिस्तं वन्दे निर्दोषम् अद्वयम्।।१।।

१.स्वाभिन्नाभिरप्राकृतीभिः।

स्वयंसे अभिन्न तथा परस्पर विरुद्ध ऐसे अनेक अप्राकृत धर्मों और शक्तियों के आश्रय, निर्दोष तथा अद्वितीय प्रभुको में वंदन करता हुं. (१)

अप्राकृताखिलाकारः श्रुतिभिः प्रतिपाद्यते ।

माहात्म्याय[१] स्फुटं भक्त्यै प्राकृतं तु निषिध्यते।।२।।

१.माहात्म्यज्ञानपूर्वकसुदृढस्नेहस्यैव भक्तित्वात्.

महात्म्यज्ञानके लिए तथा भक्तिके लिए श्रुति अप्राकृत आकाररूप प्रभुका प्रतिपादन करती है, तथा उनकी प्राकृततताका निषेध करती है. (२)

यत् पाञ्चभौतिकं तस्येच्छया षड्भावदर्शनम्[१] ।

मितं[२] नियतकार्यं च तत् प्राकृतम् उदाहृतम् ।।३।।

१.जायते अस्ति वर्धते अपक्षीयते विपरिणमते नश्यति इत्येवम्. २.परिच्छिन्नम्.

जो पंचमहाभूतोंसे उत्पन्न हैं, जन्म, अस्ति, वृद्धि, क्षय, विपरिणाम और नाश –ऐसे ६ भावविकारोंसे ग्रस्त हैं, जो परिच्छिन्न हैं तथा जिसकी क्रिया भी परिच्छिन्न है, उसे प्राकृत कहा जाता है. (३)

यथा देहोऽस्मदादीनां पञ्चभूतेभ्य उत्थितः ।

अस्मिन् जायत इत्याद्या द्रष्टा विकृतयोऽपि षट्।।४।।

जैसे हम सभीका देह पंचमहाभूतोंसे बना है, तथा उस देहमें 'यह उत्पन्न हुआ' आदि षड्भावविकार भी दिखाई देते हैं. (४)

मलिनोऽम्यनियम्यश्च मितः सप्तवितस्तिभिः।

श्रवसा श्रूयते मात्रं द्रश्यते मात्रमीक्षया ।।५।।

वह मलीन है, अन्योंसे उसका नियमन होता है, नापा जा सकता है, कर्ण द्वारा सुना जा सकता है, आंखोंसे देखा भी जा सकता है. (५)

नित्या धर्मा निजाऽभिन्नाः सर्वे सर्वत्र तस्य तु ।

'सर्वकामः सर्वरस' इति छान्दोग्यरूपणात्।।६।।

'वह समस्त इच्छाओंवाला, समस्त रसवाला है.' – ऐसे वाक्यानुसार छांदोग्य उपनिषदमें कहा गया है कि प्रभुके धर्म नित्य और अभिन्न है. (६)

'विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्'।

[१]सम्बाहभ्यां धमति सम्पतत्रैः द्यावाभूमी जनयन् देव एकः।।७।।

१.आब्रह्मतृणस्तम्बान्तानां चक्षूंषि अस्य इति विश्वतः चक्षुः. अन्यदपि उन्नेयम्. उत अपि. सर्वेन्द्रियोपलक्षणम् एतत्. एवं विघोषः द्यावाभूमी जनयन्. पतनसाधनैः पादैर्वा. संधमति संयोजयतीत्यर्थः।

उनकी आंखें सर्वत्र हैं, सर्वत्र मुख, सर्वत्र बाहु, सर्वत्र चरण हैं. वे एक ही देव आकाश तथा पृथ्वीको उत्पन्न करते हुए दोनों बाहुओं द्वारा तथा चरणों द्वारा सुंदर शब्द करते हैं. (७)

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

सर्वतः पाणिपादान्तम् इति श्रुत्यादयोऽवदन्।।८।।

उस पुरुषको हजारो मस्तक, हजारो आंखें, हजारों चरण हैं.' 'उस पुरुषके सर्वत्र हस्त तथा चरण हैं', ऐसा श्रुति तथा स्मृतिमें कहा गया है. (८)

सर्वत्र सर्वेन्द्रियाणां तस्य [१]तत्कार्यम् ईर्यते ।

सर्वज्ञस्याखिलं ज्ञानं[२] सर्वकर्तुः[३] क्रियाखिलाः।।९।।

१.दर्शनादिकम्। २.चाक्षुषादि। ३.गमनादानादिका।

उनकी सर्वत्र सभी इन्द्रियोंमें दर्शनादि कार्य रहे हुए हैं. सर्वज्ञ ऐसे उनमें संपूर्ण ज्ञान, सर्वकर्तृत्व तथा सभी क्रिया आदि रही हुइ हैं. (९)

न पांचभौतिकं[१] तानि सर्गार्थं स [२]स्वतो व्यधात् ।

अजत्वाद् अमृतत्वाच्चाविकारित्वाद् न विक्रियाः।।१०।।

१.इन्द्रियादि इति शेषः। २.स्वरूपस्तानि इन्द्रियादीनि व्यधादित्यर्थः।

वे सभी इंद्रिय पंचमहाभूतात्मक नहीं है; सृष्टि उत्पन्न करनेके लिए ऐसी इंद्रियोंको भगवानने अपनेमें बनाया है. प्रभु अजन्मा, अमृत, तथा अविकारी होनेसे उनमें कहीं भी कोइ विकार नहीं है. (१०)

त्वं ब्रह्म पूर्णममृतं विगुणं विशोकम् आनन्दमात्रमविकारमनन्यदन्यत् ।
विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयानपेक्षः ।।११।।

आप पूर्ण, अमृत, निर्गुण, शोकरहित, आनंदमात्र, अविकारी, अनन्य होते हुए भी पृथक् ऐसे ब्रह्म हो. आप विश्वके कारणस्वरूप, उदय, स्थिति तथा लयरूप क्रियाओंकी आत्मा, ईश्वर तथा विश्वके सृजनकी आपकी इच्छा होते हुए भी आप अपेक्षारहित हो. (११)

अत एव न मालिन्यम् ऐश्वर्याद् न नियम्यता ।
व्याप्तेः [१]परिमितिः नैवम् एतद् अप्राकृताकृति।।१२।।

१.लोकवत् परिच्छेदः।

इसीलिए आपमें मालिन्य नहीं है, आप ऐश्वर्यवाले होनेके कारण आपके ऊपर किसीका नियमन नहीं है. आपकी व्यापकताकी कोइ सीमा नहीं है. इन्हीं गुणोंके के कारण आपका अप्राकृत आकार है. (१२)

सर्वाकाराश्रयत्वं च श्रुतयोऽवर्णयन् [१]'समः।
मशकेन समो नागेने'त्याद्यास्तद्विभुत्वतः।।१३।।

१.'समो मशकेन समो नागेन'बृहदारण्यकश्रुतिः. साम्यं च तत्तन्निष्ठाकारवत्त्वेन।

'आप मच्छरके जितने हो, हाथीके जितने हो', इस उपनिषद्वाक्यमें आपके विभुत्वपनेके कारण ही सभी आकारोंका आश्रय लिए हुए आप हैं ऐसा वर्णन किया गया है. (१३)

प्राकृतं परिमाणादि पांचभौतिकतादिकम् ।
तस्या'ऽस्थूलमनण्वा'दिश्रुतिभिः प्रतिषिध्यते।।१४।।

''स्थूलतारहित, अणुत्वरहित'' आदि श्रुतिवचन पंचमहाभूतोंके संबंधी प्राकृतपरिमाणादिका आपमें निषेध करते हैं. (१४)

क्रियासु फलसन्देहो देहेऽभिमतिरज्ञता ।

[१]ऊर्मयो लोकनिष्ठानां दोषा इत्यादयो मताः।।१५।।

१.कामक्रोधादयः।

क्रियाओंमें फलका संदेह, देहमें अभिमान, अज्ञता, लोकमें आविष्टोंको काम, क्रोध आदिके आवेगरूप दोष बताए गए हैं. (१५)

'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' ।

इत्यादिश्रुतयः सर्वं न्यषेधंस्तत्[१] सदूषणम्।।१६।।

१.ब्रह्मणि क्रियादिकम्।

कलारहित, क्रियारहित, शांत, अकथनीय और निरंजन – ये श्रुतिवचन ऐसी दोषयुक्त क्रियाओंका प्रभुमें निषेध करते हैं. (१६)

तस्य प्राकृतशून्यत्वं तथा भागवतादिषु ।

[१]'गृह्यमाणैस्त्वम् अग्राह्यो विकारैः प्राकृतैर्गुणैः'।।१७।।

१.अन्यत्र त्वयि वा दृश्यमानैः विकारैः प्राकृतैः गुणैश्च त्वम् अग्राह्यो असि इति अर्थः. स्वबुद्ध्या दृश्यन्ते तथापि लौकिका देहेन्द्रियादयो गुणाः त्वयि न सन्तीति भावः. किंवा लोके ये दृश्यन्ते अतएव प्राकृताः तैः गुणैः त्वं गृहीतुं न शक्यसे. तेन श्रुत्युक्तैः अप्राकृतैः त्वद्गुणैः तु त्वं ग्राह्यएव इत्यर्थः. (श्रीभाग.१०।१०।३२)

'गृहीत विकार तथा प्राकृत गुणोंवाले आपको ग्रहण नहीं कर पाते हैं', – इस श्रीमद्भागवतके वाक्यमें प्रभुमें प्राकृतता नहीं है, ऐसा कहा गया है. (१७)

'अपाणिपादो [१]जवनो ग्रहीता पश्यत्यचक्षुः स श्रुणोत्यकर्णः ।

'स वेत्ति वेद्यं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्'।।१८।।

१.गन्ता. (श्वेताश्वतरादौ।)

'हाथ–पैर न होने पर भी गति करता है, नेत्र न होने पर भी देखता है, कर्ण न होने पर भी सुनता है. जानने योग्य पदार्थको वह जानता है, परंतु उन्हें जाननेवाला कोइ नहीं है. ऐसे आदि पुरुषको महापुरुष कहते हैं.' (१८)

पाणिपादनिषेधेऽपि गमनग्रहणोक्तितः।

अस्मदादिसमं न्यूनं प्राकृतं प्रतिषिध्य [१]तत्।।१९।।

विधीयन्ते श्रुतौ सर्वाः सर्वशक्तेः क्रिया ध्रुवाः।

सर्वत्राबाधितं ज्ञानं चैवं सर्वविदोऽखिलम्।।२०।।

१.पाण्यादिकम्।

इस वाक्यमें हस्त-चरणका निषेध होने पर भी गति तथा गृहण कहे गए होनेसे हमारे जैसे अपूर्ण प्राकृतपनेका निषेध करके श्रुतिओंमें सर्वशक्तिमानकी सभी क्रियाओंको ध्रुवस्वरूप बताइ गइ है. ऐसे सर्ववेत्ता उन प्रभुका ज्ञान सर्वत्र बाधरहित है. (१९-२०)

निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः।

आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च [१]त्रिविधभेदविवर्जितात्मा।।२१।।

नियताकारकार्यत्वान्योन्यबाधक्षयादयः[२]।

दोषा गुणेषु देहेषु प्राकृतेषु [३]तदिच्छया ।।२२।।

१.पञ्चरात्रस्थं वचनम्. सजातीयविजातीयस्वगतभेदरहित आत्मा स्वरूपं यस्य. २.नियते आकारकार्ये यस्य तद्भावः स च अन्योन्यबाधश्च क्षयश्च ते. ते आदिर्येषां ते तदादयः. ३.'बहुस्याम्' इति भगवदिच्छया.

दोषरहित, पूर्णगुण देहवाले, स्वाधीन तंत्रवाले, चेतनारहित शरीरके गुण बिनाके, जिनके हस्त, चरण-मुख-उदर सभी कुछ आनंदमात्र है, तथा सजातीय-विजातीय और स्वगत, ऐसे तीन भेदोंसे रहित सर्वत्र जिनका आत्मा है ऐसे निश्चित आकार तथा कार्य, परस्पर बाध, क्षय करना आदि दोष प्रभुकी इच्छासे प्राकृत गुणोंमें तथा देहोंमें रहे हुए हैं. (२१-२२)

आनन्दमात्राकारः स निर्दूषणगुणाश्रयः ।

निर्दोषविग्रहः स्याद् निश्चेतना प्रकृतिर्जडा।।२३।।

उन प्रभुका आकार आनंदमात्र है. निर्दोष गुण उनका आश्रय करके रहे हुए हैं, अतः उनका देह भी निर्दोष है. चेतना हीन प्रकृति जड है. (२३)

न प्राकृता गुणाः तस्य न शरीरेन्द्रियादिकम्[१]।

इत्युक्तं भगवच्छास्त्रे[२] याज्ञवल्क्यस्मृतावपि।।२४।।

१.एतद् अपि न प्राकृतम् इत्यर्थः। २.'निर्दोषपूर्णे'ति पञ्चरात्रवचने।

प्रभुके गुण प्राकृत नहीं हैं, देहेन्द्रियादि भी प्राकृत नहीं हैं. ऐसा निर्णय भगवत्शास्त्र, नारदपंचरात्र और याज्ञवल्क्यस्मृतिमें किया गया है. (२४)

'अथवा परमात्मानं परमानन्दविग्रहम्।

इत्यानन्दमयाकारः सर्वत्राप्राकृताखिलः ।।२५।।

'परमात्मा परम आनंदमय देहवाले हैं' इस प्रकार उनका आकार आनंदमय है तथा अप्राकृत है. (२५)

निषिध्य प्राकृतं तत्र[१] विधत्तेऽप्राकृतं श्रुतिः ।

सार्वत्रिकत्वकथनात् तास्याप्राकृतता[२] स्फुटा ।।२६।।

१.'अपाणिपादो'इत्यादिश्रुतौ। २.भगवतश्चक्षुरादेः।

वेद प्राकृतताका निषेध करके अप्राकृत हस्त-चरणादिका विधान करते हैं. ऐसे सर्वत्र होनेके निरूपण द्वारा प्रभुकी इंद्रियोंकी अप्राकृतता स्पष्ट की गइ है. (२६)

सामान्योक्ते[१]र्निषेधेषु लोकसिद्धांशसेधनम् ।

निषिध्य धर्मान्[२] सर्वत्र प्रायो धर्मान् हि वक्ति सा[३]।।२७।।

१.लोकतुल्यावयवकरणादिनिषेधः. युक्तं च एतत्, प्रतीतमेव निषेद्धुं शक्यते, न अप्रतीतम्. नहि 'शशविषाणो नास्ति' इति केनापि उच्यमानं प्रामाणिकं भवति. तस्य अवस्तुत्वात्. न च श्रुत्युक्तं निषेद्धुं शक्यते प्रमाणान्तरेण श्रुत्यैव वा, सर्वप्रमाण-बलिष्ठत्वात्. तद्भागस्य अप्रामाणिकत्वापातात्. तस्माद् भगवति प्राकृतधर्माणामेव निषेधः. २.उपनिषत्सु. ३.श्रुतिः.

सामान्य वचनोंसे जहां निषेध किया गया है वहां लोकसमान इंद्रियोंका निषेध किया गया है. उपनिषदोंमें (प्राकृत) धर्मोंका निषेध करके वेद अलौकिक धर्मोंकी बात करता है. (२७)

नन्वानन्दमयं ब्रह्माप्राकृतं प्राकृतं जगत् ।

निरानन्दं कथं ब्रह्मकार्यं तद्रूपम् अद्वयम्।।२८।।

आनंदमय ब्रह्म अप्राकृत हैं तथा जगत प्राकृत है. तो ब्रह्मरूप तथा ब्रह्मसे अभिन्न, ब्रह्मके कार्यरूप यह जगत आनंदरहित कैसे हो सकता है? (२८)

इति चेद् उक्तम् एवैतद् बहुत्वायाखिलं कृतम् ।

आनन्दांशोऽखिला धर्माः ते तिरोभाविता इह।।२९।।

यदि ऐसा पूछते हो तो उत्तर यह है कि, 'मैं एक अनेक हो जाउं' ऐसी अनेक होनेकी इच्छा के कारण ही सृष्टिकी रचना की गइ है, यह कहा ही गया है.

आनंदांशयुक्त सभी धर्मोंका जगतमें तिरोधान किया गया है. (२९)

ब्रह्मधर्मतिरोभावाद् अन्योन्याभावदर्शनात् ।

आविर्भावतिरोभावाभ्याम् इदं [१]दृश्यदूषणम्।।३०।।

१.एतद् हेतुभ्यो द्रश्ये जगति दूषणं भेद एव।

ब्रह्मके धर्मोंका तिरोधान हो जानेके कारण एकदूसरेमें अभाव दिखानेके लिए और आविर्भाव तिरोभावकी प्रक्रियाओंके कारण जगतमें दोष देखने मिलते हैं. (३०)

रागमात्रं घटे मृत्स्ना सर्ववर्णा विलक्षणा ।

द्रश्यो न वास्तवो भेदस्तथात्राप्यवधार्यताम्।।३१।।

'घट' शब्दमें प्रयोग करनेवालेकी आकांक्षा है. जो मिट्टी है उसके अनेक प्रकारके रंग हैं तथा ऐसे वह विलक्षण भी है. घट तथा मिट्टीमें फिरभी ऐसा कोई वास्तविक भेद नहीं है. उसी प्रकार जगतके विषयमें भी समझना चाहिए. (३१)

जगत् तु ब्रह्मणो भिन्नं न ब्रह्म जगतः पृथक्।

सृष्टिकालेऽपि हि घटो मृदो भिन्नो न मृद् घटात्।।३२।।

जगत ब्रह्मसे भिन्न है, परंतु ब्रह्म जगतसे भिन्न नहीं है. जब सृजन किया जाता है तब घट मिट्टीसे पृथक् होकर बनता है, तथापि मिट्टी घटसे भिन्न नहीं होती है. (३२)

करस्त्ववयवत्वेन शरीराद् भिद्यतेंऽशकः[१]।

शरीरं न करात् भिन्नं तस्यावयवितांऽशिता।।३३।।

१.हेतुगर्भं विशेषणम्. अंशक इति हेतोः।

हाथ शरीरका एक अंग होनेके कारण अंशके रूपमें वह शरीरसे पृथक् होता है, परंतु शरीर हाथसे भिन्न नहीं है; क्योंकि हाथका अंगत्व अंशात्मक है. (३३)

कार्याणि भिन्नाभिन्नानि तथात्वात् तस्य[१] वीक्षया[२]।

प्राकृतानि विबुद्ध्यन्तां यथासामान्यदर्शनम्[३]।।३४।।

१.तिरोहितचिदानन्दत्वात्. २.'बहुस्याम्' इति इच्छया. ३.सामान्यानां दर्शनम् अनतिक्रम्य. सामान्यजनाएव जगत्प्राकृतं पश्यन्ति विशेषदर्शिनस्तु ब्रह्मवेत्तारः

तदिदं ब्रह्मात्मकम् इत्यर्थः।

चित् तथा आनंदका तिरोधान हुआ होनेसे और प्रभुकी एकसे अनेक होनेकी इच्छाके कारण प्रभुके भिन्न-भिन्न कार्योंको सामान्य लोगोंके दर्शनके समान प्राकृत जानने. (३४)

सर्वात्मकम् अनुस्यूतं सर्वत्र ब्रह्म कारणम्।

सर्वधर्माश्रयत्वेनातथात्वात् तद् अलौकिकम्[१]।।३५।।

१.प्राकृतभिन्नत्वात्.

कारणरूप सर्वात्मक ब्रह्म सभी स्थानोंमें ओतप्रोत है. ब्रह्ममें सभी धर्म आश्रय करके स्थित होनेसे तथा स्वयं अप्राकृत होनेसे ब्रह्म अलौकिक तथा अप्राकृत है. (३५)

[१]उक्तवाक्येऽप्यतो रूपं निरूप्याऽशंक्य भिन्नताम्।

सर्वत्र च स्वगतभेद विवर्जिततोच्यते।।३६।।

१.'निर्दोषे'ति पञ्चरात्रवाक्ये.

'निर्दोषत्व...'- इस उपरोक्त पंचरात्रके वाक्यमें रूपका निरूपण करके भिन्नत्वकी शंका करके, तदुपरांत व्यापकताके कारण स्वगत भेद नहीं है, ऐसा कहा गया है. (३६)

[१]व्याप्तेर्दशम [२]वाक्येऽपि गुणानां [३]गृह्यमाणता।

निरूपयन्ति श्रुतयः तस्माद् उक्तव्यवस्थया[४]।।३७।।

१.इदं पदं पूर्वस्मिन् श्लोके अन्वेति. २.'गृह्यमाणैस्त्वमग्राह्य' इत्यस्मिन्. ३.गुणानामेव गृह्यमाणता उच्यते न तु गुणैः हेतुभिः ब्रह्मणो गृह्यमाणता. किंवा गुणैः कर्तृभिरपि ब्रह्मणो गृह्यमाणता नोच्यते. गुणाएव ब्रह्म गृहीतुं न शक्नुवन्ति कथं पुनः एवंविधैः तैर्जनो ब्रह्म गृहीतुं शक्नुयाद् इत्यर्थः. ४.तस्मात् प्राकृताप्राकृतगुणव्यवस्थया सविशेषनिर्विशेषोभयवादिन्यः श्रुतयो ब्रह्म निरूपयन्ति इति अर्थः।

'गृह्यमाणैः...' इस भागवतदशमस्कंधके वाक्यमें भी 'श्रुतियोंमें प्राकृत तथा अप्राकृत गुणोंकी व्यवस्थासे गुणोंका ग्रहण किया गया है', ऐसा ब्रह्मके विषयमें कहा गया है. (३७)

अत्राहुः शंकराचार्य्या निराकारं परं भवेत्।

गुणक्रियाविशेषाणाम् अत्यन्ताभाववद् मतम्।।३८।।

श्रीशंकाचार्यजी यहां कहते हैं कि – परब्रह्म निराकार है, क्योंकि उनमें विशिष्टगुण और क्रियाओंका अत्यंत अभाव है. (३८)

तन्मायोपहितं सत् स्याद् ईश्वरः शबलाभिधः ।
मायासम्बन्धतः कर्त्ता भोक्ताऽस्य श्रुतिभिः कृतः।।३९।।

सत् जगत मायाकी उपाधिवाला है. इस जगतके कर्ता ईश्वर माया शबलित हैं. इस जगतके कर्ता–भोक्ता ईश्वर हैं, ऐसा जो श्रुतियोंमें कहा गया है, वह भी मायाके संबंधवाले होनेके कारण ही कहा गया है. (३९)

तदुपाधिगतं धर्माद् यत्राध्यारोपयन्ति ताः।
वस्तुतोऽपवदन्त्येता निर्विशेषे निषेधकाः।।४०।।

माया शबलित ब्रह्म मायाकी उपाधिवाले हैं. श्रुतियां उन धर्मोंका ब्रह्ममें अध्यारोप करती है. यथार्थ तो यह है कि श्रुतियां निर्विशेष ब्रह्ममें उन धर्मोंका निषेध करती है. (४०)

[१]अध्यारोपापवादाभ्यां श्रुत्योः स्यात् संगतिर्द्वयोः ।
लोकप्रदर्शनायेन्दोर्यथा शाखाऽपि दर्श्यते ।।४१।।

१.उपासनासिद्ध्यर्थम् अन्यत्र द्रष्टानां धर्माणां ब्रह्मणि आरोपो अधिकत्वाय (माहात्म्याय). वस्तुतस्तु उपासनया चित्तशुद्ध्यनन्तरं, ब्रह्मणो निर्धर्मकत्वात् तान् धर्मान् निषेधन्त्येव इति अर्थः.

(उपासनाकी सिद्धिके लिए अन्य धर्मोंका महात्म्यज्ञानके लिए ब्रह्ममें आरोप किया जाता है. उपासना द्वारा चित्तकी शुद्धि हो जानेके बाद ब्रह्म निर्धर्मक होनेसे पूर्वक्त धर्मोंका श्रुति निषेध करती है.) अध्यारोप और अपवादसे धर्मसमर्थक तथा धर्मनिषेधक श्रुतिओंका समन्वय सिद्ध हो जाता है. उदाहरणतया, उस डाली पर चंद्रमा देखा? ऐसा दिखाकर शाखा द्वारा चंद्रमा दिखाया जाता है. वस्तुस्थितिमें तो शाखाके उपर चंद्र नहीं है. (४१)

[१]ज्ञानार्थ–चित्तशुद्ध्यर्थोपास्तये प्रथमं तथा ।
निरूप्यते सधर्मत्वं जाते ज्ञाने निषिध्यते।।४२।।

१.निर्धर्मकात्मज्ञानार्थं या चित्तशुद्धिः तस्यै च या उपासना तस्यै इत्यर्थः।

निर्धर्मक ज्ञान होनेके लिए चित्तकी शुद्धि तथा उपासनाके लिए प्रथम ब्रह्मको सधर्मक कहा गया है. ज्ञान हो जानेके बाद उसका निषेध कर दिया जाता

है. (४२)

इति चेत् श्रूयतां माया सादिः सानादिरेव वा ।

आद्ये[1] कर्ता तु को ब्रह्मातिरिक्ताभावतः परम्[2] ।।४३।।

कर्तृत्वं निर्विशेषस्य पुनः प्राप्तं द्वितीयते[3] ।

द्वैतापत्तिः[4] सदेवेति प्रभृतिं श्रुतिबाधनम्[5] ।।४४।।

१.सादित्वे पक्षे. २.परं मुख्यमेव ब्रह्म कर्तृ स्याद् इति अर्थः. ३.अनादिः माया इति पक्षः इति अर्थः. ४.माया अनादिः इति पक्षे तु सा च तच्चेति द्वैतम् इति अर्थः. ५.'सदेव सौम्य इदम् अग्र आसीद्' इत्यादिश्रुतिविरोध इत्यर्थः.

यदि ऐसा कहते हो तो सुनो : माया सादि है या अनादि? सादि पक्षमें ब्रह्मसे अतिरिक्त कोइ नहीं होनेके कारण ऐसी मायाका कर्ता कौन? कर्ता मुख्य ब्रह्म ही होनेसे निर्विशेष ब्रह्मकी कर्तृता हो गइ. अनादि पक्षमें माया और ब्रह्म दोनोंका द्वैत माना जाएगा, जिसके कारण, 'हे सौम्य! आरंभमें एकमात्र सत् ही था' आदि अनेक श्रुतिवचनोंका बाध हो जाएगा. (४३-४४)

ब्रह्माप्यनाद्यनादिः सोपहितस्याप्यनादिता ।

सर्गोऽविरतमेव स्याद् न जातु प्रलयो भवेत्।।४५।।

नित्यबद्धं भवेद् ब्रह्म मुक्तिस्तन्नाशने यदि ।

श्रूयेत क्वापि तस्यापि जीववद् मुक्तिसाधनम् ।।४६।।

ब्रह्म भी अनादि, सृष्टि भी अविरत होती ही रहती है, प्रलय कभी भी होता ही नहीं है, ब्रह्म नित्यबद्ध हो जायेगा और ब्रह्मके नष्ट होने पर ही मुक्ति होगी; तथा जीवके समान ब्रह्मको भी कहीं मुक्तिका साधन बताया गया है. (४५-४६)

व्यासाचार्यैः प्रतिज्ञाय निर्गुणस्य विचारणम् ।

'अथातो ब्रह्मजिज्ञासे'त्यत्रैतस्यैव लक्षणम्।।४७।।

'जन्माद्यस्य यतः शास्त्रयोनित्वाद्'इति कथ्यते ।

प्रतिज्ञोपक्रमौ[1] भग्नौ स्फुटं व्यासस्य ते मते ।।४८।।

१.प्रथमसूत्रे निर्गुणस्य प्रतिज्ञा अपरस्मिन्नेव च सगुणस्य अप्रतिज्ञातस्य लक्षणम् उक्तम् इति प्रतिज्ञाभङ्गः. अतएव उपक्रमस्य पूर्वप्रक्रान्तस्य निर्गुणसम्बन्धिनो भङ्गश्च.

व्यासजीने 'अथातो ब्रह्मजिज्ञासा' इस सूत्रमें निर्गुणके विचारकी जो प्रतिज्ञा करके ब्रह्मका ही लक्षण 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इस दूसरे सूत्रमें बताया है. श्रीशंकराचार्यजीके मतानुसार यहां व्यासजीकी प्रतिज्ञा तथा उपक्रममें संगति नहीं है, क्योंकि पहले सूत्रमें निर्गुण ब्रह्मकी जिज्ञासा की गइ है तथा दूसरे सूत्रमें सगुण ब्रह्मके निरूपणका उपक्रम किया गया है. (४७-४८)

निषेधत्येव[१] कर्तृत्वं प्रकृत्युपहितस्य तु ।
गौणश्चेद् आत्मशब्दाद् इत्यादिनां सूत्रकृत् स्वयम्।।४९।।

१.ननु मायोपहितं गौणमेव ब्रह्म जगत्कर्तृः भवतु तत्र आह निषेधत्येव इति.

सूत्रकार 'यह तो गौण है' ऐसा यदि कहें तो वह गौण नहीं है. क्योंकि 'आत्मन्' शब्दका प्रयोग किया गया है- इन सूत्रोंसे प्रकृति-मायाकी उपाधिवाले इश्वरके कर्तृत्वका निषेध किया गया है. (४९)

न 'सोऽकामयते'त्यादिरूपिताः कामनादयः ।
सम्भवन्ति[१] जडाया निर्द्धर्मत्वाद् ब्रह्मणो न ते।।५०।।

१.उपाधिभूताया मायाया न सम्भवन्ति इति अन्वयः।

श्रीशंकराचार्यजीके मतानुसार 'सोऽकामयत-उन्होंने कामना की' आदि वाक्योंमें निरूपित कामना ब्रह्म निर्धर्मक होनेसे उनमें संभव न होनेसे जड मायामें ही होनी चाहिए. (५०)

तस्योपाधिवशात् तत्त्वे[१] निर्विशेषविकल्पताम् ।
ब्रह्मणो बाधते या सा नश्येत् तज्ज्ञानतः कथम्।।५१।।

१.कामादिमत्त्वे. ब्रह्म स्वतो न कर्तृ किन्तु मायावशतः इति उक्ते तु निर्विशेषत्वहब्री(?) सा निर्विशेषज्ञानतः कथं नश्येद् इति उच्यताम् इति अर्थः.

ब्रह्म स्वयं कर्ता नहीं है, किंतु मायाके कारण कर्ता है, ऐसा यदि मानें तो उन्हें मायाके कारण उत्पन्न होती कामना यदि हो तो उसी मायाका नाश ब्रह्मज्ञान द्वारा कैसे हो सकता है? (५१)

न्यायात् 'प्रक्षालनाद्धी'ति ह्यध्यारोपापवादतः ।
धर्माणां लोकसिद्धानाम् अपवादोऽस्तु केवलम्।।५२।।

'लगे हुए कीचडको धोनेसे अच्छा है कि कीचडका स्पर्श न करें' - इस न्यायके अनुसार अध्यारोप और अपवाद करनेसे अच्छा है कि लौकिक धर्मोंका

ही अपवाद किया जाए. (५२)

मायागुणोपासनात् चेद् मुक्तिः स्याद् हेयता कुतः ।
ज्ञानोद्भवेऽपराद्धं वा किं मायारूपया स्त्रिया ।।५३।।

मायाके गुणोंकी उपासनासे यदि मुक्ति प्राप्त होती हो तो फिर मायाका त्याग करनेकी ही क्या आवश्यकता है? ज्ञानका उद्भव हो जाता हो तो मायारूपी स्त्रीका उसमें क्या दोष? (५३)

इत्यादि दूषणगणैः तन्मतं श्रुत्यसम्मतम् ।
आचार्यैः प्रभुभिश्चान्यैः विस्तरेण निराकृतम्।।५४।।

ऐसे अनेक दोषोंके कारण शंकराचार्यजीके मतमें उपनिषदोंकी असंमति है तथा श्रीवल्लभाचार्यजी, श्रीविठ्ठलनाथजी तथा अन्य विद्वानोंने भी उनके मतका विस्तारपूर्वक निराकरण किया है. (५४)

तस्माद् रतीच्छया सर्वशक्तिरीश्वर आत्मनः ।
सर्वम् आविश्चकारेदम् इत्येव श्रुतयोऽवदन् ।।५५।।
श्रुत्योरुभयवादिन्योर्निर्णये प्राह सूत्रकृत् ।
तद्व्यवस्थाम् इमाम् एव श्रुतिभिः सैव सिद्ध्यति।।५६।।

श्रुतियोंमें कहा है कि रमण करनेकी इच्छासे सर्वशक्तिमान इश्वरने अपनेमेंसे सभीका आविष्कार किया है. निर्धर्मकता तथा सधर्मकताका प्रतिपादन करनेवाली श्रुतियोंका निर्णय करते हुए सूत्रकार बादरायणव्यासने उन श्रुतियोंकी ऐसी व्यवस्था की है तथा सभी उपनिषद्वाक्योंकी उस पक्षमें संमति भी है. जैसे– (५५–५६)

[1]'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' ।
कर्ता भर्ता च भोक्ता च निहन्तापि स एव हि ।
'अहं सर्वस्य' 'स इमांल्लोकान् असृजत' इति।।५७।।

१.लोके दृश्यमानं गुणवत्त्वं तत्कृतपरिच्छेदं वा श्रुतिः निषेधति तदनन्तरं बहुशो गुणवत्त्वं वदति च. तस्माद् अप्राकृतगुणवत्त्वं ब्रह्मणः श्रुतिसंमतम् इति ज्ञायते इत्यर्थः (ब्र.सू.३।२।३३).

'सर्वकर्ता' 'सर्वभोक्ता' 'भर्ता भोक्ता महेश्वरः'।
'भर्त्ता सन् म्रियमाणो बिभर्ती'त्यादिवचोभरैः।।५८।।

लोकमें प्रतीत होती सधर्मकताका श्रुति एक बार निषेध करती है तथा पुनः उसी सधर्मकताका समर्थन भी करती है. 'वही कर्ता हैं, भर्ता हैं तथा नाश करनेवाले हैं.' 'मैं सभीका उत्पत्तिस्थान हुं', 'उन्होंने इस लोकका सृजन किया', 'महेश्वर, सभीके कर्ता, सभीके भोक्ता, भरणपोषण करनेवाले तथा भोग करनेवाले हैं', 'भरणपोषण करते हुए स्वयं भी पोषित होते हैं तथा सभीका पोषण करते भी हैं.' (५७-५८)

स्वातन्त्र्यं युज्यते कर्त्तुः सृष्टौ स्वातन्त्र्यम् ईशितुः ।
मायायास्तस्य शक्तित्वात् करणत्वं पुराणतः।।५९।।
धर्माविर्भावतः स्वस्याप्राकृतात्मत्वसिद्धये ।
पूर्वं स सेव्यते जाते तादृक्त्वे निश्चिलं पुनः।।६०।।

कर्ताको स्वतंत्रता होना चाहिए. सृष्टिकी रचना करनेमें ईश्वर स्वतंत्र है. माया तो ब्रह्मकी शक्ति होनेसे पुराणोंमें उसे धर्मोंके आविर्भाव द्वारा अपनी अप्राकृतता सिद्ध करनेके हेतुके रूपमें बताई गइ है. सर्वप्रथम वह प्रभुकी सेवा करती है. ऐसा करते हुए तादृशता प्राप्त होती है तब निश्चलता प्राप्त होती है. (५९-६०)

अजानंस्तस्य माहात्म्यं नैव सेवेत कश्चन ।
इति माहात्म्यबोधाय प्रवृत्ताः श्रुतयोऽखिलाः।।६१।।

यदि उन प्रभुके महात्म्यको कोइ जानता न हो तो उनकी सेवा वह करेगा ही नहीं. इसीलिए महात्म्यका बोध करवानेके लिए सभी श्रुतियां प्रवृत्त हुइ हैं. (६१)

'दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्र' इति दिव्यस्त्वलौकिकः।।६२।।

वह मूर्तिरहित दिव्य अज, बाहर तथा अंदर स्थित, प्राणरहित, मनरहित तथा उज्ज्वल है.' इस श्रुतिमें जो दिव्यता कही गई है वह अलौकिक के अर्थमें है. (६२)

[१]अजन्माऽप्राकृततनुः शुद्धः प्राणीतरोऽमनाः।
प्राणिभिः प्राकृतैः सेव्योऽशुद्धैर्न्यूनैर्मनोवशैः।।६३।।

१. 'दिव्य' इत्यादिश्रुतेः अर्थं विवृणुते.

अजन्मा, अप्राकृत देहवाला, शुद्ध प्राणधारियोंसे सर्वथा भिन्न ही, मनरहित ऐसे प्रभुकी अशुद्ध, हीन तथा मनके वशमें रहनेवाले प्राकृत प्राणियों द्वारा सेवा की जाती है. (६३)

यस्याप्राकृतधर्मा आत्माभिन्नाश्च शक्तयः सर्वाः।
सर्वांशभेदहीनं लक्ष्मीनं भज मनो भवद् दीनम्।।६४।।

जिनकी सभी शक्तियां अप्राकृत धर्मोंवाली और आत्मासे अभिन्न है, ऐसे सभी अंशभेद बिनाके वे लक्ष्मीके पतिका, हे मन! दीन होकर आश्रय कर. (६४)

इति श्रीमद्वल्लभाचार्यमतवर्ति श्रीव्रजवल्लभचरणानुचर पंचनदीघनश्यामभट्टात्मज श्रीगोवर्धन शीघ्रकविविरचिते वेदान्तचिन्तामणौ ब्रह्मसाकारत्वविवेको नाम नवमं प्रकरणम्।।९।।

d

शक्तिधर्माभेदनिरूपणपूर्वकद्वैतमतनिराकरणं नाम दशमं प्रकरणम्

१. अस्मिन् प्रकरणे शक्तिधर्माभेदनिरूपणपूर्वकं वास्तवं द्वैतं निराक्रियते.

शुद्धाद्वैतं वस्तुतस्तु नानाभेदं निजेच्छया ।
स्वाभिन्नशक्तिधर्माणां नुमो नानामतस्तुतम् ।।१।।

वस्तुस्थितिमें शुद्ध अद्वैतरूप, अपनी इच्छासे अनेक प्रकारके भिन्न-भिन्न रूप तथा अभिन्न ऐसे धर्मोंवाले, अनेक वादों द्वारा स्तुत्य ब्रह्मका मैं स्तवन करता हुं. (१)

ब्रह्मैवैकं प्रपञ्चस्य निमित्तं समवायि च ।
पुराणे करणं माया तच्छक्तिर्दंडवन्मता।।२।।

ब्रह्मको ही जगतके निमित्त तथा समवायिकारण कहे गए हैं. पुराणोंमें जहां मायाको साधनरूप कही गई है वहां मायाको दंडकी तरह भगवानकी शक्ति के समान कहा गया है. (ब्रह्मसे भिन्न स्वतंत्र पदार्थतया नहीं) (२)

अचिन्त्या विविधा नित्याः स्वाभाविक्योऽस्य शक्तयः।
ज्ञानक्रियादिभेदेन स्वाभिन्नाः स्ववशा विभोः।।३।।

उन प्रभुकी शक्तियां अचिंत्य, विविध, नित्य और स्वाभाविक हैं. वे शक्तियां ज्ञानशक्ति और क्रियाशक्ति ऐसी दो प्रभुसे अभिन्न तथा स्वाधीन हैं. (३)

'न [१]तस्य कार्यं करणं च विद्यते न तत् समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'।।४।।

उनका नाहिं कोइ कार्य है, नाहिं कोइ साधन है. उनके समान तथा उनसे अधिक भी कोइ नहीं है. ऐसे प्रभुकी ज्ञानशक्ति, बलशक्ति और क्रियाशक्ति आदि विभिन्न प्रकारकी स्वाभाविक शक्तियां हैं(श्वेता.उप. २।१२). (४)

'यः सर्वज्ञः सर्वशक्ति'रित्यादिश्रुतिभिः श्रुताः।
तासु मायाप्यघटित-घटनायां पटीयसी।।५।।

'जो सर्वज्ञ हैं, सर्वशक्तिवाले हैं'- इन श्रुतिवाक्योंसे उन शक्तियोंका बोध होता है. इन शक्तियोंमेंसे एक शक्ति माया अघटित घटना करनेमें कुशल

है. (५)

'श्रिया[१] पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया ।
विद्ययाऽविद्यया शक्त्या मायया च निषेवितम्'।।६।।
इति भागवतोक्तासु मुख्यासु द्वादशस्वियम् ।
गणिता करणत्वेन पुराणे परिवर्णिता।।७।।

'श्री, पुष्टि, गिरा, कांति, कीर्ति, तुष्टि, इला, उर्जा, विद्या, अविद्या तथा माया द्वारा प्रभु सेवित हैं.' इस प्रकार (श्रीभाग.पु.१०।३९।५५) श्रीमद्-भागवतमें भगवानकी शक्तियोंके वर्णनमें माया शक्तिको गिनाया गया है तथा पुराणोंमें उसका वर्णन साधनतया प्राप्त होता है. (६-७)

'स एवेदं[१] ससर्जाग्रे भगवान् आत्ममायया ।
सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः।।८।।

उन गुणरहित समर्थ भगवानने ही सत्-असत् रूप गुणमय आत्ममाया द्वारा इस जगतका सृजन किया(भाग.पु.१।२।३०). (८)

सामर्थ्यं सर्वभवने तस्य मायेति कथ्यते।
शक्तित्वात् तदभिन्ना सा विचित्रपरिणामकृत्।।९।।

अनेक होनेके प्रभुके सामर्थ्यको ही माया कहा जाता है. विचित्र परिणामोंको उत्पन्न करनेवाली वह प्रभुकी शक्ति प्रभुसे अभिन्न है. (९)

क्वचित् संमोहिका माया अविद्यैव व्यपदिश्यते।
बहवोऽर्था हि मायाया गीताभाष्ये[१] प्रदर्शिताः।।१०।।

१.तत्त्वदीपिकाख्ये. 'अजोऽपि सन् अव्ययात्मा'इत्यस्य व्याख्याने.

कहीं सम्मोहनकारी मायाको अविद्या भी कहा है. गीताजीकी 'तत्त्वदीपिका' टीकामें (वल्लभजीकृत) मायाके अनेक अर्थ (अजोऽपि सन् अव्ययात्मा..श्लोकके निरूपणमें) किये गए हैं. (१०)

'माया'शब्दः क्वचित् शास्त्रे हरिसामर्थ्यवाचकः।
क्वाप्यविद्या मृषावाची कृपाकपटवित्तवाक्।।११।।

शास्त्रमें कहीं माया शब्दका अर्थ प्रभुका सामर्थ्य दिया गया है, कहीं उसका अर्थ अविद्या है, कहीं मिथ्या, कहीं कृपा, कहीं कपट, कहीं संपत्ति-ऐसे विविध अर्थ किये गए हैं. (११)

शक्तिशक्तिमतोर्भेदो वस्तुबोधाय केवलम् ।
अभेदो वस्तुतो नाक्ष्णो द्रष्टिशक्तिः पृथग्भवेत्।।१२।।

शक्ति तथा शक्तिमानका भेद उन-उन पदार्थोंके भेदको जानने मात्रके लिए है. वास्तविकरूपमें तो उन दोनोंमें अभेद है. नेत्रमें तथा उसके देखनेके सामर्थ्यमें कोइ भेद नहीं है. (१२)

न धर्मधर्मिणोर्द्वैतम् अप्यस्याप्राकृतस्य तु ।
'प्रकाशाश्रयवद् वा[१] तेजस्त्वाद्'इति हि सूत्रितम्।।१३।।

१. प्रकाशः तदाश्रयश्च सूर्यः तदुभयं यथा तेजःपदार्थत्वाद् एकः पदार्थः तथा धर्मधर्मिणोः अभेदः इत्यर्थः.

इन अप्राकृत ब्रह्ममें धर्म तथा धर्मीका द्वैत भी नहीं है. इसीलिए 'प्रकाश्रयवद्वा...' प्रकाश तथा उसके आश्रयरूप सूर्य, ये दोनों तेजरूप पदार्थको लेकर एक ही पदार्थ है. उसी प्रकार धर्म तथा धर्मीमें अभेद है - ऐसा सूत्रकारने कहा है. (१३)

तेजःप्रकाशयोर्भेदो न तेजस्त्वाद् यथा तथा ।
ब्रह्मणः शक्तिधर्माणां ब्रह्मत्वेन भिदा न हि।।१४।।

तेजरूप पदार्थको लेकर जैसे तेज और प्रकाशके बीच भेद नहीं हैं, उसी प्रकार ब्रह्मकी शक्ति तथा धर्मोंके ब्रह्मत्वमें कोइ भेद नहीं है. (१४)

न भूमिर्गन्धतो भिन्ना न गन्धो भूमितः पृथक्।
तद् वस्तु तादृग् एवेति न द्वैतं धर्मधर्मिणोः।।१५।।

भूमि तथा गंधगुणमें भेद नहीं है, तथा गंध भी भूमिसे भिन्न नहीं है. वह वस्तु वैसी ही है, इसीलिए धर्म तथा धर्मीका द्वैत नहीं है. (१५)

अस्मिंस्त्वलौकिकेऽचिन्त्येऽद्वये भेदो न सर्वथा ।
सुविस्तृतम् इदं भाष्ये श्रीविद्वन्मण्डने तथा।।१६।।

इन अलौकिक, अचिंत्य, अद्वय ब्रह्ममें किसी भी प्रकारका कोइ भेद नहीं है. अणुभाष्य और विद्वन्मंडनमें इस विषयका निरूपण विस्तारसे किया गया है. (१६)

माध्वाचार्या इह प्राहुः जगत्कर्ता कुलालवत्।
भिन्नो निमित्तम् एवेशो विकारात् समवायिनः।।१७।।

(पूर्वपक्षी) श्रीमध्वाचार्यने जगतके कर्ताको कुम्हारकी तरह भिन्न कहा है. 'समवायी कारणमें विकार आजाता होनेसे ब्रह्म मात्र निमित्त कारण ही है.' (१७)

प्रकृतिः स्याद् उपादानं तत् तन्त्रास्य[१] जडस्य[२] तु ।
'प्रकृतिर्ह्यस्योपादानम् इति'[३] भागवतोक्तितः।।१८।।

१. भगवत्परतन्त्रा. २. कारणसाधर्म्याद् जडत्वम्. ३. जगतः.

(पूर्वपक्षी) 'इस जगतकी उपादानकारण प्रकृति है' – इस भागवतके वचनानुसार प्रकृति जगतके प्रति उपादान कारण है तथा यह जड जगत भगवानके प्रति परतंत्र है. (१८)

ब्रह्मणो जडजीवानां द्वैतमेवाऽस्ति वास्तवम् ।
जीवब्रह्मभिदां वक्ति 'द्वा सुपर्णा'[१] श्रुतिर्यतः।।१९।।

१. मुण्डके पैङ्गिरहस्यब्राह्मणे.

(पूर्वपक्षी) 'द्वा सुपर्णा....' यह श्रुति जीव तथा ब्रह्मके भेदका प्रतिपादन करती है; इसलिए ब्रह्म जड तथा जीवोंका द्वैत वास्तविक है. (१९)

इति चेत् श्रूयताम् उक्त्वा सूत्रकृद् ब्रह्म कारणम् ।
'जन्माद्यस्येति'सूत्रेण केवलं न निमित्तता।।२०।।
समवायित्वम् अप्यस्येत्याह 'तत्तु समन्वयात्' ।
रत्यभावो न युज्येत नैव रेमे श्रुतीरितः।।२१।।

यदि ऐसा कहते हो तो सुनोः– (सिद्धांत) सूत्रकारने 'जन्माद्यस्य यतः।' इस सूत्र द्वारा ब्रह्मको कारण कहकर मात्र निमित्तकारणता का प्रतिपादन न करते हुए 'तत्तु समन्वयात्।' सूत्र द्वारा वह ब्रह्म ही हैं, क्योंकि उपादान कारणके रूपमें ओतप्रोत है.' – इस सूत्रमें समवायी कारण भी ब्रह्म है ऐसा कहा है. 'नैव रेमे – उसने कभी रमण नहीं किया'– इस श्रुतिमें निरूपित प्रकार अनुसार ब्रह्मको समवायीकारण न माननेपर रमणका अभाव होना भी संभव नहीं रह जानेसे, उपरोक्त श्रुतिवचन व्यर्थ हो जाएगा. (२०–२१)

अस्यैवाग्रे 'सहैतावानासे'ति समवायिता ।
पठ्यते समवायित्वं तैत्तिरीयादिषु स्फुटम्।।२२।।

'भगवान इस जगतके रूपमें हुए' – इस वचनमें भी समवायीकारण

होना कहा गया है. तैत्तिरीय उपनिषद आदिमें भी ब्रह्मके समवायीकारण होनेका स्पष्ट निरूपण किया गया है. (२२)

'असद् वा इदम् अग्र आसीत् । ततो वै सद् अजायत'।
तदात्मानं स्वयम् अकुरुत, तस्मात् तत् सुकृतम् इति'।
[1]आत्मानम् इत्युपादानं निमित्तम् अकरोद् इति ।
अभावोऽन्यनिमित्तस्य स्वयम् इत्यभिधीयते।।२३।।

१. 'तदात्मान' इत्यादिश्रुतेरर्थः.

'पहले वह अव्यक्त था, उनमेंसे सत् (व्यक्त) उत्पन्न हुआ. उसने स्वयं ही अपनेआपको उत्पन्न किया, इसीलिए वह सुकृत है.' आत्मानम् शब्दसे उपादान तथा निमित्त, इन दोनों ही प्रकारकी कारणता निरूपित हुई है तथा स्वयम् शब्दसे अन्य कोइ भी निमित्तकारण नहीं है, ऐसा भी कहा गया है. (२३)

[1]'ऐतदात्म्यमिदं सर्वं' 'आत्मैवेदं सर्वम्'
'सर्वं खल्विदं ब्रह्म'
[2]'पुरुष एवेदं सर्वं. यद्भूतं यच्च भाव्यम्'
श्रुतिभिः स्मृतिभिः प्रोक्ता जगतो ब्रह्मरूपता ।
बाध्यते, प्रकृतिस्त्वाविरासास्यांशः सदात्मकः।।२४।।

१. छान्दोग्य.उप ६।८।७। २. पुरुषसूक्ते.

'यह सबकुछ आत्मरूप है', 'यह सभी कुछ आत्मा ही है', 'सभी कुछ ब्रह्म है', 'जो हो चुका है वह तथा जो होनेवाला है वह सभी कुछ ब्रह्म ही है'.– इन श्रुतिवाक्योंमें तथा अन्य स्मृतिवाक्यों द्वारा जगतको ब्रह्मात्मक कहा गया होनेसे उपरोक्त मतका (मध्वाचार्य) भी बाध होता है. प्रकृति तो ब्रह्मके सदंशसे जन्य है. (२४)

अतस्त्वदक्तवाक्येऽपि[1] 'ब्रह्म तत् त्रितयं[2] त्वहम्' ।
प्रकृतेः पुरुषस्यापि कालस्य हरिरूपता।।२५।।

१.'प्रकृतिर्ह्यस्योपादानम्' इतिवाक्ये। २.तदुत्तरार्द्धे प्रकृतिपुरुषकालाः.

इसीलिए 'प्रकृति इस जगतकी उपादानकारण है', इस मध्वाचार्यको मान्य वाक्यमें भी उत्तरवाक्यतया दिये गए वचन–'प्रकृति, पुरुष तथा काल, ये तीनों मैं ब्रह्म ही हुं'– में इन तीनोंको हरिरूप ही बताया गया है. (२५)

'यत्र[१] येने'ति पद्योक्ताग्रेप्येतद् दर्शयिष्यते ।

सर्गान्तरे[२] तथात्वेऽपि निदानं तु तदेव हि ।।२६।।

१.'यत्र येन यतो यस्य' इति श्रीभागवतवचनव्याख्याने निबन्धे. २.'कदाचित् पुरुषद्वारा' इतिनिबन्धोक्तेः प्रकृतेः कारणत्वेऽपि सर्वकारणकारणं तु ब्रह्मैव इति पद्याधार्थः.

'यत्र येन....' इस श्लोकमें बताए गए विषयका निरूपण अब आगे भी जाएगा. इस प्रक्रियासे अतिरिक्त अन्य प्रकारकी सृष्टि प्रक्रियाओंके विषयमें प्रकृतिकी कारणरूपता बताई गई है. वहां भी सभी कारणोंके कारण ब्रह्म ही है, ऐसा ही निरूपण है. (२६)

अत्रोर्णनाभिद्रष्टान्तोऽप्यनेकत्र[१] निदर्श्यते ।

समवायेऽप्यविकृतिः पूर्वमेव प्रदर्शिता।।२७।।

१. अभिन्ननिमित्तोपादाने.

इस विषयमें मकडीका द्रष्टांत भी अनेक स्थलोंमें दिया गया है. समवायरूपतामें भी अविकृति रहती है यह पहले ही निरूपित कर दिया है.(२७)

सर्वत्राद्वैतमेवोच्चैः वदन्ति श्रुतयोऽखिलाः।

पुमान् कथञ्चिद् अपि हि द्वैतज्ञानेऽपि दुष्यति।।२८।।

सभी श्रुतियां अद्वैतका ही निरूपण करती है. द्वैतका स्वीकार करनेसे किसी न किसी प्रकारसे दूषण अवश्य प्राप्त होता ही है. (२८)

'द्वा सुपर्णा'[१] श्रुतौ सृष्टौ जीवान्तर्यामिणोर्भिदा ।

वृक्षाश्रयत्वसहजत्वादि नैव परस्य यत्।।२९।।

१. ननु 'द्वा सुपर्णे'ति श्रुतौ द्वैतं श्रूयते कथं पुनः अद्वैतं साध्यत इति आशंक्य श्लोकैकेन उत्तरयति. अस्यां श्रुतौ सृष्टौ एव, किंच जीवात्मनोः एव, द्वैतम् उच्यते न तु परस्य भेदः कथ्यते. यत् (हेतोः) वृक्षाश्रयत्वं (देहे स्थित्वं) सहजत्वादि च विशेषणं दीयते. तत्तु सृष्टौ जीवान्तर्यामिणोः एव युज्यते न परस्य इति अर्थः।

'द्वा सुपर्णा...' श्रुतिमें सृष्टिदशामें ही जीव तथा अन्तर्यामियोंका भेद कहा गया है, किंतु जीव ब्रह्मका भेद नहीं कहा गया है. क्योंकि देहात्मक वृक्षका आश्रित होना तथा सहजात होना आदि धर्म उक्त श्रुतिमें कहे गए हैं, जिन्हें परब्रह्ममें माने नहीं जा सकते. (२९)

'तत्त्वमस्या'दिवाक्यानि तदभेदं वदन्ति च ।

अभेदोंऽशांशिभावेन ब्रह्मस्वांशः स[१] यन्मतः।।३०।।

१. जीवः।

'तत्त्वमसि' आदि वाक्य उसी अभेदका प्रतिपादन करते हैं. अंश तथा अंशीके भावसे अभेद है क्योंकि जीव ब्रह्मका अंश है. (३०)

स्वांशत्वम् 'अंशो[१] नानाव्यपदेशाद्[२] इत्युपक्रमात् ।

व्यासेन बोधितं सूत्रे, तथा स्मृतिपुराणयोः।।३१।।

१. जीवो ब्रह्मणों अशएव, नानात्वेन (क्वचिद् ईशितव्येन क्वचिद् चेतनत्वेन क्वचिद् अणुत्वेन व्यापकत्वेन इति) व्यपदेशात्. श्रुतौ श्रवणात्. नहि ब्रह्मतदंशा-तिरिक्त्यान्यस्य विरुद्धधर्माश्रयत्वं युक्तम् इति (२।३।४३) २. उपक्रमं विधायेति ल्यब्लोपे पंचमी.

जीवकी ब्रह्मस्वांशताका निरूपण व्यासने ब्रह्मसूत्रके 'अंशो नाना-व्यपदेशात्' सूत्रमें किया है तथा स्मृतियोंमें और पुराणोंमें भी जीवको अंश कहा है. (३१)

'ममैवांशो[१] जीवलोके जीवभूतः सनातनः।

मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति'।।३२।।

'ममैवांशो...' इस गीतावचनमें भगवानने जीवलोकमें मेरा ही सनातन अंश जीव भावापन्न हुआ है, जो प्रकृति स्थित मन सहित ज्ञानेन्द्रियोंको खींचता है''(भग.गीता.१५।७) ऐसा कहा है. (३२)

[१]'स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं

तव पुरुषं वदन्त्यखिलशक्तिधृतोंऽशकृतम्।

इति नृगतिं विविच्य कवयो निगमावपनं

भवत उपासतेंऽघ्रिमभवं भुवि विश्वसिताः।।३३।।

१. देहादिरूपेषु अमीषु (स्थितम् इति यावत्) बाह्याभ्यन्तरं स्वरूपेण निर्दोषं पुरुषं जीवं अखिलशक्तिधृतः तव अंशकृतं वदन्ति. निरवयवत्व बाधकपरिहाराय कृतम् इति उक्तम्. इत्येवं प्रकारेण जीवस्य मूलस्थानं विचार्य कवयो विश्वसिताः सन्तो निगमावपनं कर्मसमर्पणस्थानम् अतएव अभयं भवतः चरणारविन्दं भुव्युपासत इत्यर्थः.

भागवतमें वेदस्तुतिके प्रसंगमें 'स्वकृतपरेषु' इत्यादि वचनोंमें कहा गया है कि आपके स्वयं रचे हुए इन देहरूप पुरोंमें स्थित तथा स्वरूपतः बाह्याभ्यन्तर व्याधि, आधि प्रभृति दोषोंको स्वीकृत न करनेवाला जो पुरुष (जीव) है उसको अखिल शक्तिधारी आपके सच्चिदंशसे उत्पन्न हुआ कहा जाता है. ऐसी तिरोहित आनंदांशवाली नरकी दशाका विवेचन कर विद्वान् लोग भूतलपर विश्वासपूर्वक आनंदके आविर्भावके हेतु, ऐसे आपके निगमोक्त कर्मादि समर्पण स्थान तथा भव निवर्तक चरणोंकी उपासना करते हैं. (३३)

भेदाभेदं ब्रुवाते आचार्यौ निम्बार्कभास्करौ।
निम्बार्काणां मते भेदो वास्तवो माध्ववद् मतः ।।३४।।
पुत्रादयो विभिन्नांशाः स्वांशाः करपदादयः।
विभिन्नांशा इमे जीवा इति भेदो विनिश्चितः ।।३५।।

निंबार्काचार्य और भास्कराचार्यने भेदाभेद कहा है. निंबार्काचार्यके मतमें मध्वाचार्यकी तरह भेद वास्तविक है. 'पुत्र आदि विभिन्न अंश हैं, हाथ, पैर आदि हमारे ही अंश हैं. जीव है वह विभिन्न अंश है.' ऐसा भेद उनके मतमें माना गया है. (३४-३५)

एषां चित्त्वेन साधर्म्याद् अभेदोऽपि निरूप्यते।
मुखस्याह्लादकत्वेन सादृश्यात् चन्द्रता यथा ।।३६।।

जीव चिद्रूप होनेसे ब्रह्मके साथ उसका समान धर्मत्व होनेसे अभेद भी कहा जाता है. उदाहरणतया मुख प्रसन्न होनेपर समान गुणोंके कारण चंद्रमाकी उपमा दी जाती है, उसी प्रकार. (३६)

अंशत्वं माध्ववत् तेषां भेदाभेदौ व्यवस्थया।
सिद्धान्तवद् अणुत्वादि तत्रप्यवहितः शृणु ।।३७।।

मध्वाचार्यजीके अनुसार जीवका अंशत्व है. इस व्यवस्थानुसार भेदाभेद स्वीकारा गया है. जीवका अंशत्व शुद्धाद्वैत सिद्धांतमें है उसी प्रकार माना है. इस विषयमें जो उत्तर है वह सुनो. (३७)

स्वांशत्वम् एव जीवानां 'ममैवे'त्येवकारतः।
हेतुः सङ्गच्छते नाना व्यपदेशो न ते मते ।।३८।।

'ममैवांशो..' इस गीतावाक्यमें 'एव' शब्द स्पष्टरूपसे जीव प्रभुके अंश

ही हैं, ऐसा निरूपित करता है. निंबार्कके मतमें हेतुकी संगति है, परंतु अनेकत्वका व्यवहार नहीं है. (३८)

'पादोऽस्य विश्वाभूतानी'ति पादत्वेन चांशताम्।

'मन्त्रवर्णाद्'[१] इति व्यासः स्वांशतैव तथा सति ।।३९ ।।

१. 'पादो अस्य विश्वा भूतानि' इति मन्त्रवर्णे जीवस्य भगवदंशत्वं वर्णितम् इति हेतोः.

'पादो अस्य विश्वा भूतानि' सभी महाभूत इस पुरुषके चरण है' इस वाक्यके अनुसार चरण पदसे अंशत्वकी संगति होती है. इस वाक्यमें तदनुसार ही विस्तार है. ऐसा होनेसे सभी जीव प्रभुके अपने ही अंश हैं यह स्पष्ट हो जाता है. (३९)

वह्निस्वांशो विस्फुलिङ्गोऽतो दृष्टान्तीकृतः श्रुतौ।

अस्यावयवभूतैस्तु व्याप्तं कृत्स्नम् इदं जगत् ।।४० ।।

इसीलिए उपनिषद्में अग्निके अंशरूप विस्फुलिंगोंका उदाहरण दिया गया है. उन प्रभुके अवयवरूप जीवोंसे ही यह समग्र जगत व्याप्त है. (४०)

इत्यादिश्रुतिभिर्जीवाः स्वांशाऽवयवोक्तितः।

क्वाप्यश्रुतं विभिन्नांशत्वं सर्वत्राभिदाऽनयोः[१] ।।४१ ।।

१. जीवब्रह्मणोः.

उपरोक्त अनेक उपनिषद्वाक्योंसे, अवयवरूप कहे गए होनेसे जीव प्रभुके अपने अंश हैं. जीव विभिन्न प्रकारके अंश हैं, ऐसा कहीं भी वैदिक साहित्यमें देखा नहीं जाता है. जीव तथा ब्रह्मके बीच अभेद ही कहा गया है. (४१)

[१]यत्त्वाह माध्वो वनमालिदासो राश्येकदेशोंऽश इहास्तु चन्द्रात्।

यथा शतांशो गुरुमण्डलं स्याद् इत्थं मयाऽन्यत्र तदप्यदूषि ।।४२ ।।

१. यत्तु माध्वो वनमालिदास, 'इह (श्रुतिसूत्रादौ) राशेः (समूहस्य) एकदेशः अंशः भवतु यथा चन्द्रात् शतांशः गुरुमण्डलम् इति उच्यते तथा' इत्याह, तदपि मया अन्यत्र (शुद्धाद्वैतचन्द्रोदयादौ) इत्थं अदूषि.

यहां श्रुतिसूत्रोंमें जैसे चंद्रके शतभागका एक मंडल कहा जाता है, ऐसे ही समूहका एक खंड अंश कहा जाता है. ऐसा मध्वानुयायी वनमालिदास कहते

है. इस मतका 'शुद्धाद्वैतचंद्रोदय' आदि ग्रंथोंमें मैनें निराकरण किया है. (४२)

'यथा सौम्ये'ति मृत्पिण्डदृष्टान्तोऽत्र[1] पराहतः ।
प्रतिज्ञैकविज्ञानात्[2] सर्वविज्ञानम् इत्यपि ।।४३ ।।

१. भेदे भेदाऽभेदे च. २. 'अपि वा तमादेशम् अप्राक्षो येन अश्रुतं श्रुतं भवति अमतं मतम् अविज्ञातं विज्ञातम् इति छान्दोग्ये.

'हे सौम्य! जैसे मिट्टीके एक पिंडको जान लेनेसे मृदारूपी पदार्थका ज्ञान हो जाता है.' यहां मिट्टीके दृष्टांतसे भेद तथा भेदाभेदका निराकरण कर दिया गया है. (४३)

अभेद एव श्रुतिषु तत्त्वमस्यादिषूदितः ।
बन्धे द्वैतभ्रमो, मोक्षे तन्निवृत्तिर्निगद्यते।।४४ ।।

छांदोग्योपनिषदमें निरूपित एकके विज्ञानसे सर्व विज्ञानकी प्रतिज्ञासे सर्वविज्ञान हो जाता है, यह वचन भी लक्ष्यमें लेना चाहिए. 'तत्त्वमसि' आदि उपनिषद्वाक्योंमें जीव-ब्रह्मका अभेद ही बताया गया है. जीवको बंध होता है ऐसी स्थितिमें द्वैतका भ्रम है; मोक्ष होनेपर द्वैतकी निवृत्ति हो जाती है. (४४)

'यद्वा ह्येवैष एतस्मिन् उदरम् अन्तरं[1] कुरुते। अथ तस्य भयं भवति। यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्याद्युक्त्वा 'यत्र त्वस्य सर्वम् आत्मैव अभूत् तत् केन कं पश्येद्' इत्यादि। तथा 'यो अन्यां देवताम् उपास्ते अन्यो असावन्यो अहम् अस्मि न स वेद यथा पशुः'' ।।४५ ।।

१. उत् अप्यर्थः. अरं - अल्पम् अपि अन्तरं भेदम्. तैतिरीये.

अथवा 'एष एतस्मिन्...' अर्थात् यह उसके साथ थोडे भी भेदकी कल्पना करता है तो उसे भय होता है. जहां द्वैतका बोध होता हो वहां दूसरा दूसरेको देखता है.' इस वचनानुसार तथा 'जहां सभी कुछ आत्मारूप ही हुआ है, वहां कौन किसे देखे?' तथा 'जो अन्य देवकी उपासना करता है, वह यह अन्य है, यह अन्य है, ऐसा सोचनेवाले पशु की तरह कुछ भी जानता नहीं है.' (४५)

निन्दन्ति श्रुतयो द्वैतं, दोषो ज्ञाने तथा महान् ।
श्रौतं ब्रह्मप्रपञ्चैक्यं घटते न मते च ते ।।४६ ।।

वैदिक संपूर्ण साहित्य द्वैतकी निंदा करता है. ऐसे द्वैतका ज्ञान होने पर भी दोष होता है. वैदिक साहित्यमें निरूपित ब्रह्म तथा जगतका अभेद निंबार्कके मतमें मान्य नहीं हो पाता है. (४६)

यस्मिन् यतो[1] यर्हि च येन यस्य
यस्माद् यथा यदुत यस्त्वपरः परो वा।
भावः करोति विकरोति पृथक् स्वभावः
सञ्चोदितः तदखिलं भवतः स्वरूपम्।।४७।।

१. यस्तु अपरो अपकृष्टः पित्रादिः यश्च पर उत्कृष्टो ब्रह्मादिर्भावः कर्तेति यावत्. यद्यत्करोति, विकरोति रूपान्तरं नयति वा तत् सर्वं भवतः स्वरूपमेव न पृथक्. कारकादीनां तत्स्वरूपत्वम् आह यस्मिन् अधिकरणे, यतो निमित्तात्, यर्हि यस्मिन् काले, येन करणेन हेतुकर्त्रा, च सञ्चोदितः प्रेरितः. यस्य सम्बन्धि, यस्माद् अपादानात्, यस्मै सम्प्रदानाय, यद् ईप्सिततमं कर्म, यथा येन प्रकारेण इति सर्वोऽपि वाच्यवाचकरूपः पदार्थो भगवत्स्वरूपमेव इति अर्थः. (श्रीभाग.७।९।२०)

प्रह्लाद भगवानसे कहते हैं– हे भगवन्! विभिन्न स्वभाववाला जो कोई छोटा या बडा भाव(कर्ता) जिस किसीसे प्रेरित हुआ जो कुछ करता है या रूपान्तरको प्राप्त करता है, तथा जिस आधारमें एवं जिस कालमें जिस हेतु या साधनसे जिसके संबंध या उद्देश्यसे जिस किसी प्रकासे जो कुछ भी करता है, वह सब कर्ता, करण, अधिरकण, अपादान, संबंध, सम्प्रदान, कर्म तथा प्रकारादि आपके ही स्वरूप हैं, आपसे भिन्न नहीं हैं. (४७)

भास्कराणां मते भेद औपाधिक उदीरितः।
अभेदस्त्वन्ततो[1] जीवो व्यापको लिङ्गतोऽणुता[2]।।४८।।

१. उपाधिनाशे. २. अणुत्वश्रुतिः लिङ्गदेहाभिप्रायेण न जीवाणुत्वबोधक इति अर्थः.

भास्कराचार्यजीके मतमें भेद उपाधिसे जन्य माना गया है. अंतमें तो अभेद ही है; जीव व्यापक है और लिंगदेहके साथ ही अणु है. (४८)

इहापि व्यापिता जीवतया ब्रह्मतयाथवा।
आद्ये नैयायिके वेशो[1] द्वितीये शांकरे तथा।।४९।।

१. प्रवेशः.

उसमें भी व्यापकता जीवपने से है या ब्रह्मपनेसे? यदि जीव होनेसे व्यापकता हो तो नैयायिकोंके मतानुसार ही विचार हुआ तथा यदि ब्रह्मपनेसे व्यापकता हो तो शांकरमतानुसारी ही मत हुआ. (४९)

पुरा निराकृता व्याप्तिः द्विधोपाधिकृताऽणुता[१]।
नित्यस्वाभाविकैश्वर्यज्ञानादेर्यदि रोधकः ।।५० ।।
घटेतोपाधिः एवान्यो नाऽबाधाऽखिलधर्मिणः ।
अद्वयस्य स्वतन्त्रस्य दूरे[२] तन्मूलिका भिदा ।।५१ ।।

१. जीवत्वेन ब्रह्मत्वेन च. २. यदि अबाधाखिलधर्मणो ब्रह्मणो नित्य-स्वाभाविक ऐश्वर्यज्ञानादे रोधकोन्य उपाधिः एव न घटेत (तर्हि) अद्वयस्य स्वतन्त्रस्य (तस्य) तन्मूलिकाभिदा तु दूर इति सार्धैकस्य अन्वयः.

इस प्रसंगसे पूर्व ही ऐसी व्यापकताका निराकरण कर दिया गया है, जिसमें उपाधिजन्य दोनों प्रकारके अणुत्वका निराकरण हुआ है. बाधारहित समग्र धर्मवाले ब्रह्मके नित्य-स्वाभाविक ऐश्वर्यके ज्ञानको व्यवहित करनेवाली कोई उपाधि घटित होती ही नहीं है, तो अद्वयरूप स्वतंत्र ब्रह्मको उपाधिजन्य भेद कैसे लग सकता है? (५०-५१)

''व्रजन् तिष्ठन्[१] पदैकेन यथैवैकेन गच्छति।
यथा तृणजलौकैवं देही कर्मगतिं गतः'' ।।५२ ।।

जैसे तिमिंगल एक ही पैरसे चलती है, वैसे एक पैरसे चलता और एक पैरसे स्थिर रहता देह कर्मगतिको प्राप्त करता है. (भाग.१०।१।४). (५२)

इत्यादिना वक्ति नाना तस्य भागवतं गतीः।
'अन्यानि संयाति नवानि देही'त्यादिका स्मृतिः[१]।।५३ ।।

भगवद्गीतामें भी अनेक गतियोंका वर्णन किया गया है. 'जीव दूसरे शरीरमें प्रवेश करता है', ऐसा गीतामें कहा गया है(भग.गीता.२।२२). (५३)

पूर्वत्यागो गतिः देहान्तरे व्याप्तस्य नोचिता।
इदं लिङ्गस्य[१] चेद् ब्रूयाद् देहः कर्मगतिं गतः ।।५४ ।।

१. लिङ्गदेहस्य गमनं कथयेत् तर्हि 'देह' इति वेदान्न तु तथेत्यर्थः.

दूसरे देहमें व्याप्त जीवका पूर्वदेहका त्याग तथा गमन उचित नहीं है. यदि ऐसा कहा जाए तो पूर्वदेहका त्याग तथा गति लिंग देहकी ही होती है, तो

ऐसी परिस्थितिमें देहने कर्मगति प्राप्त की, ऐसा कैसे कहा जा सकता है? (५४)

अत्र देहीति संघातो देहवान् भिन्न उच्यते।

त्याज्यप्राप्यत्वकथनात् स्थूलदेहस्य नेह सः ।।५५ ।।

यहां देही ऐसा संघातवाला देहवान् दूसरा कहा गया है. 'एकका त्याग करता है, तथा दूसरेको प्राप्त करता है' – ऐसा जो कहा गया है वह निरूपण स्थूल देहके योग्य तो नहीं है. (५५)

इत्यादिश्रुत्यादिमूलैः मतान्येतानि दूषणैः।

प्राचाम् आचरतो वाचाम् अर्वाचामपि सुस्फुटैः ।।५६ ।।

समनूद्य पृथङ्माध्व–किरणादिषु विस्तरात्।

निरस्तानि मया शुद्धाद्वैतचन्द्रोदयादिषु ।।५७ ।।

'शुद्धाद्वैतचंद्रोदय' ग्रंथके 'माध्वकिरण' आदि प्रकरणोंमें प्राचीन तथा अर्वाचीन वाक्योंके अवतरणोंको विधिपूर्वक देकर सभी दोष पृथक्–पृथक् दिखाते हुए विस्तारपूर्वक ऐसे मतोंका निराकरण मैनें किया है. (५६–५७)

अभेदो वास्तवो ब्रह्म जगतोरैच्छिकी भिदा।

जीवाः स्वांशाः प्रवेशादि–सिद्धान्तः[१] श्रुतिसम्मतः ।।५८ ।।

१. सैन्धवखिल्यवद्ब्रह्मणि जीवप्रवेशः. आदिशब्दाद् विस्फुलिङ्गवत् त एव निर्गमः.

ब्रह्म तथा जगतका भेद वास्तविक है. भेद मात्र ऐच्छिक है. जीव प्रभुका अंश है, जीव विभिन्न देहोंमें प्रवेश करते हैं. ये सभी सिद्धांत वेदमान्य हैं. (५८)

'सजातीय–विजातीय–स्वगतद्वैतवर्जितम्'।

ब्रह्मोक्तं श्रीमदाचार्यैः द्वैतगन्धोऽपि नास्ति नः ।।५९।।

श्रीमहाप्रभुजी आज्ञा करते हैं कि ब्रह्ममें 'सजातीय....' – सजातीय, विजातीय और स्वगत, ऐसे भेदोंकी गंधमात्र भी नहीं है. (५९)

तत्र जीवाः सजातीया विजातीया जडा मताः।

स्वगतान्तरात्मानो भिन्ना घटशरावत् ।।६० ।।

अभिन्ना ब्रह्मणो मृत्त्वाद् घटादेरभिदा यथा।

सजातीयादिभेदानां स्वरूपं च यथोदितम्[१] ।।६१ ।।

१. विद्यारण्यादिभिः इति शेषः.

इनमें जीव सजातीय, जड पदार्थ विजातीय तथा अंतर्यामी स्वगत है. ये तीनों ही जैसे घटादि भिन्न होते हुए भी ब्रह्मसे अभिन्न हैं, जैसे घट आदि मिट्टीसे उसी प्रकार. सजातीयादि भेदोंके लक्षण विद्यारण्यस्वामी ने कहे हैं – (६०–६१)

वृक्षस्य[१] स्वगतो भेदः पत्रपुष्पफलादिभिः ।
वृक्षान्तरात् सजातीयो विजातीयः शिलादितः ।।६२।।

१. पञ्चदशीकारिकेयम्.

वृक्षमें स्वगत भेद पत्ते, पुष्प, फल आदिसे होता है. दूसरें वृक्षोंसे सजातीय भेद है तथा पत्थरसे विजातीय भेद है. (६२)

शुद्धाद्वयनय[१]ज[२]कृद्दयया भयहृद्भवप्रभवभाजाम् ।
कारणम् आह यमेकं[३] तम्[४] अनुत्सेकं[५] भजस्व सविवेकम् ।।६३ ।।

१.सिद्धान्तः. २. श्रीमदाचार्या इत्यर्थः. ३. मतान्तरोक्तकारणान्तरव्यावर्तनाय एकम्. ४. पुरुषोत्तमम्. ५. क्रियाविशेषणम्.

शुद्धाद्वैत सिद्धांतको विजयी बनानेवाले श्रीमहाप्रभुजीकी दयासे, जन्म तथा विजन्म प्राप्त करनेवाले जीवोंके भयको दूर करनेवाले एकमात्र जिन पुरषोत्तमको कारण कहा है, उनका शांतिपूर्वक तथा विवेकके साथ आश्रय कर. (६३)

इति श्रीमद्वल्लभाचार्यमतवर्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज श्रीगोवर्द्धनशीघ्रकविविरचिते वेदान्तचिन्तमाणौ शक्तिधर्माभेदनिरूपणपूर्वकद्वैतमतनिराकरणं नाम दशमं प्रकरणम् ।।१० ।।

d

विशिष्टाद्वैतविचारो नाम
एकादशं प्रकरणम्

१. अस्मिन् प्रकरणे प्रसङ्गप्राप्तं श्रीरामानुजमतं समालोच्यते.

यद्रूपश्चिदचित्सर्गः स्पृष्टः [१]सृष्टौ न तेन यः ।
सर्वत्र सन्नविज्ञातोऽस्मै नमोऽनुप्रवेशिने [२] ।।१ ।।

१. सृष्टावित्युक्तेः कार्यावस्थायामेव भगवतः चिदचिच्छरीरत्वं न वास्तवम् इति तन्मतस्य एकदेशित्वम् अपि सूच्यते । २. ताभ्यां चिदचित् शरीराभ्याम् इति शेषः.

चित् तथा अचित् सृष्टिके रूपोंको धारण किए होने पर भी उनसे अस्पृश्य हैं, सभी स्थानोंमें विद्यमान होने पर भी जिन्हें कोइ जानता नहीं हैं, ऐसे पृष्ठभागसे प्रवेश करनेवाले ब्रह्मको नमस्कार. (१)

यः सर्वत्रैव सन्तिष्ठन् अन्तरः संस्पृशेद् न तत् ।
शरीरं तन्न वेदेत्थं योऽनुविश्य प्रकाशते ।।२ ।।
इत्याहः श्रीमदाचार्याः [१]शास्त्रार्थे ब्रह्मरूपणे ।
संगृह्य कथ्यतेऽत्रार्थो 'यः पृथिव्याम्' इति श्रुतेः ।।३ ।।

१. शास्त्रार्थप्रकरणस्य ब्रह्मनिरूपणप्रस्तावे.

'जो सर्वत्र विद्यमान होने पर भी अंदरसे शरीरका स्पर्श नहीं करते हैं, ऐसे जो पीछे से प्रविष्ट होकर प्रकाशित हो रहे हैं.'इस प्रकार श्रीमदाचार्यजीने तत्त्वार्थदीपनिबंधके शास्त्रार्थप्रकरणमें ब्रह्मके निरूपणके प्रसंगमें कहा है. इसी अर्थका संग्रह करके यहां 'यः पृथिव्याम्...' श्रुतिका अर्थ किया गया है.(२-३)

बृहादारण्यकेऽध्याये पञ्चमे तच्च सप्तमे ।
ब्राह्मणे पठ्यते वाक्यम् अन्तर्यामिनिरूपके ।।४ ।।
'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं [१]पृथिवी न वेद
यस्य पृथिवी शरीरं यः पृथिवीम् अन्तरो यमयत्येष त
आत्मा अन्तर्याम्यमृत' इत्यादि ।
रामानुजा वदन्तीह विशिष्टाद्वैतवादतः ।
श्रुतावस्यां पृथिव्यादि सप्तम्याधाररूपणात् ।।५।।

१. यो भगवान् पृथिव्यां गन्धवद् द्रव्ये तिष्ठन्. आधारत्वे सत्यपि तद्धर्मैः न

सम्बध्यत इत्याह – पृथिव्या अन्तरो भिन्नः. तद्भिन्नस्तु तदभिमानि इति ततोऽपि भेद बोधनाय आह – ये पृथिवीतदभिमानीं न वेद, यदि जानीयाद् मुक्तः स्यात्. तदभिमानिधर्मैरपि न सम्बध्यत इत्यर्थः यस्य पृथिवी द्रव्यम् अभिमानी च शरीरम् आधारादिलीलासिद्ध्यर्थम्. लीलाम् आह यः पृथिवीम् उभयरूपां अन्तरः अन्तः–स्थापयित्वा इति अर्थः स्वस्वकार्ये प्रवर्तयति. अमृत आनन्दरूप इत्यर्थः.

बृहदारण्यक उपनिषदके पांचवे अध्ययामें अंतरायका निरूपण करने वाले सातवें ब्राह्मणमें यह वाक्य कहा गया है. जो पृथ्वीमें बिराजमान है, जो पृथ्वीमें है, जिसे पृथ्वी जानती नहीं है, जो अंतःप्रविष्ट होकर पृथ्वीका नियमन कर रहे हैं, वह आत्मा अंतर्यामी अमृत है'. इस श्रुतिवचनमें 'पृथिव्यां' में सप्तमी विभक्तिसे 'आधाररूपता–आश्रयरूपता'का निरूपण किया गया होनेके कारण रामानुजोने 'विशिष्टाद्वैत'का निष्कर्ष प्रस्तुत किया है. (४–५)

अतः[१]तस्योच्यते भेदो यथाऽस्ते भूतले घटः ।
इति वाक्ये भूमितलाद् घटभेदः प्रतीयते ।।६ ।।

१. पृथिव्यादेः.

अतः इस सिद्धांतमें जो दोष है वह कहा जा रहा है क्योंकि 'भूतल पर यह घट है', इस वाक्यमें भूमिके तलसे घटका भेद दिखाइ देता है. (६)

अतः पृथ्व्यादिकं व्याप्यं भिन्नमेवाखिलं परात्[१] ।
ब्रह्मणो[२] हि शरीरे द्वे नित्ये चिदचिती मते ।।७ ।।

१. परमात्मनः. २. षष्ठ्यन्तम्.

(पूर्वपक्ष) अतः पृथ्वीको व्याप्त करके जो रहा हुआ है, वह सभी कुछ परब्रह्मसे भिन्न है. ब्रह्मके दो शरीर नित्य हैंः (१) चित् तथा (२) अचित्. (७)

सूक्ष्मे कारणरूपे ते याभ्यां स्थूलम् अभूद् जगत् ।
चिच्छरीरात् तु चित्कार्यम् अचित् चाचिच्छरीरतः ।।८ ।।

सूक्ष्म रूपमें यह दोनों ही कारणरूप है – जिनमेंसे यह स्थूल जगत उत्पन्न हुआ है. चित् शरीरमेंसे चित् कार्य तथा अचित् शरीरमेंसे अचित् कार्यकी उत्पत्ति होती है. (८)

विभागानार्हता नामरूपयोः सूक्ष्मता मता ।
नामरूपव्याकरणं तस्यैव[१] स्थौल्यम् उच्यते ।।९ ।।

१. सूक्ष्मस्य कारणरूपस्य.

नाम तथा रूप इतने सूक्ष्म हैं कि उनका विभाग करना उचित नहीं है. सूक्ष्म कारणरूप नाम तथा रूपको व्यक्त किये गए हैं. यही उनकी स्थूलता है. (९)

ब्रह्मैवं सूक्ष्मचिदचिद् विशिष्टं कारणं [१]श्रुतेः।
कार्यं च स्थूलचिदचिद् विशिष्टम् इति निर्णयः ।।१० ।।
विशिष्टाद्वैतम् अनयोः अद्वैतं[२] तद् विशिष्टयोः[३]।
विशेषणे चिदचिती ब्रह्मणः कारणात्मके ।।११ ।।
सूक्ष्मे स्थूले तु ते कार्यात्मके कार्यविशेषणे।
जीवस्तु स्थूलचित्स्थूलम् अचित् पृथ्व्यादिकं मतम् ।।१२ ।।

१. 'यःपृथिव्याम्' इत्यादिश्रुतेः. २. अन्तर्यामिब्रह्मणोः. ३. स्थूलसूक्ष्मचिद-चिदुक्तयोः.

उपरोक्त श्रुतिवचनानुसार ब्रह्म सूक्ष्म चित् तथा अचित्के विशेषवाला कारण और स्थूल चित् और अचित्के विशेषवाला कार्य है. अंतर्यामी तथा ब्रह्मका विशिष्ट-विशेष प्रकारका अद्वैत है. स्थूल और सूक्ष्म चित् और अचित्का अद्वैत है. इनमें चित् और अचित् ये दो विशेषण ब्रह्मके सूक्ष्म कारणरूप हैं, उनके कार्यके स्थूल विशेषण कार्यरूप हैं. जीव तो स्थूल चित् है तथा पृथ्वी आदि स्थूल अचित् हैं. (१०-११-१२)

अन्तःस्थितो नियन्तेहा[१]ऽनुप्रविष्टो विभागकृत्।
उक्तश्रुतौ पृथिव्यादेः जडस्यान्तःस्थितः श्रुतः ।।१३ ।।

१. इह स्थूलचिदचितोः मध्ये.

उन दोनोंके भीतर स्थित नियामक पीछेसे उनमें प्रविष्ट होकर दोनोंके विभाग करता है. उपरोक्त श्रुतिवाक्यमें पृथ्वी आदि जडके अंदर उनकी नियामकता कही गई है. (१३)

जीवस्यापि तथा[१] काण्वैः 'यो विज्ञान'[२]इतीरणात्।
'य आत्मनी'ति तत् पाठभेदात् माध्यन्दिने[३] श्रुतम् ।।१४ ।।
शरीरत्वं च तत्रैव श्रुतं[४] तस्यैतयोर्द्वयोः।
जीवो जडोऽन्तरात्मेति भोक्तृभोग्यनियामकाः ।।१५ ।।

१. अन्तःस्थितो वर्तते इत्यर्थः. २. बृहदारण्यके काण्वानां पाठः. विज्ञाने

चिति जीव इत्यर्थः. ३. माध्यन्दिनबृहदारण्यके. ४. 'पृथिव्याम्' इत्यादिना जडस्य 'य आत्मनि' इति जीवस्य च भगवच्छरीरत्वम् उक्तम् इति अर्थः.

काण्वोंके पाठांतर अनुसार 'यो विज्ञाने...' तथा माध्यंदिनोंके पाठांतर अनुसार 'य आत्मनि...' इन दोनों प्रकारोंसे नियामकका जीवके अंतःप्रविष्ट होना कहा गया है. इस प्रकार जड तथा जीवको भगवानके शरीरके रूपमें कहे गए है. जीव, जड तथा अंतरात्मा क्रमशः भोग्य, भोक्ता तथा नियामक हैं. (१४-१५)

क्रमात् त्रयः पदार्थास्तैर्मतास्तत्कारिका यथा[१]।
''ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः।
ईश्वरश्चित इत्युक्तो जीवो दृश्यम् अचित् पुनः''॥१६॥

१. तिस्रो वक्ष्यमाणाः.

ईश्वर, चित् तथा अचित् - ये तीन पदार्थ हैं, उनमें हरि इश्वर है, जीव चित् है और जगत अचित् है. (१६)

[१]द्रव्याद्रव्यप्रभेदान् मितमुभयविधं तद्विदः तत्त्वम् आहं
द्रव्यं द्वेधा विभक्तं जडम् अजडम् इति प्राच्यम्
अव्यक्तकालौ अन्त्यं प्रत्यक् पराक् च
प्रथमम् उभयथा तत्र जीवेशभेदात्
नित्या भूतिर्मतिश्चेत्यपरम् इह जडाम् आदिमां केऽचिद् आहुः॥१७॥

१. तत्त्ववेत्तारः प्रमाणैः द्रव्यम् अद्रव्यं च इति सिद्धं द्विप्रकारकं तत्त्वं कथयन्ति. तत्र किञ्चिद् द्रव्यं जडं किञ्चिद् च अजडम् इति द्विधा विभक्तम्. तत्रापि प्रथमं जडं द्रव्यं, प्रकृतिः कालश्च इति द्विविधम्. अन्त्यं द्वितीयम् अजडं द्रव्यं, प्रत्यक् पराक् च उच्यते. तच्च जीव ईश्वरश्च इति भेदाविति द्विविधं प्रत्यक्. अपरं पराक् द्रव्यं तु नित्याभूतिर्मतिश्च. इह अनयोः मध्ये भूतिं केचित् जडाम् आहुः इति अन्वयः. द्रव्यं नानादशावत् प्रकृतिः इह गुणैः सत्वपूर्वैः उपेता कालोब्दाद्याकृतिः स्याद् अणुरवगतिमान् जीव ईशोऽन्य आत्मा.

तत्त्ववेत्ताओंने 'द्रव्य', 'अद्रव्य' ऐसे भेदसे दो प्रकारके तत्त्व कहे हैं. इनमें द्रव्यके 'जड' और 'अजड' ऐसे दो भेद हैं. इनमें जड द्रव्य, 'प्रकृति' और 'काल' है; 'प्रत्यक्' और 'पराक्' ऐसे दो भेद है. इनमें 'जीव' और 'ईश्वर' ऐसे प्रत्येकके दो भेद हैं; दूसरा 'पराक्' वह 'नित्यविभूति' और 'मति' है. इनमें

'भूति'को कुछलोग जड कहते हैं. (१७)

द्रव्यं नानादशावत् प्रकृतिरिह गुणैः सत्वपूर्वैरुपेता ।
कालो शब्दाद्याकृतिः स्याद् अणुरवगतिमान् जीवः ईशोन्य आत्मा ।।
सम्प्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्वयुक्ता तथैव ।
ज्ञातुर्ज्ञेयावभासा मतिरिति कथितं संग्रहाद्द्रव्यलक्ष्म ।।१८।।

'द्रव्य' अनेक अवस्थावाला है. 'प्रकृति' सत्व, रजस् और तमस् ऐसे तीन गुणोंवाली है. 'काल' वर्ष आदि आकारवान् है, अवगति(अज्ञान) वाला 'जीव' अणु है, 'ईश्वर' दूसरी आत्मा है, 'नित्यविभूति' सत्त्वाले तीन गुणोंसे युक्त है, 'मति' ज्ञाताको ज्ञेयका ज्ञान नहीं होने देती है. ये संक्षिप्तमें द्रव्यके लक्षण हैं. (१८)

इत्थं वेङ्कटनाथाद्या विस्तरात् श्रुतियुक्तिभिः ।
तत्स्रग्धरासहस्रादौ पदार्थं व्यभजन्त ते ।।१९ ।।

इस प्रकार वेंकटनाथ आदिने श्रुतिवचनों तथा युक्तिओंसे 'स्रग्धरासहस्त्र' आदि ग्रंथोंमें पदार्थोंका विभाग समझाया है. (१९)

लये क्रमात् जीवजडौ शरीरे चित्यचित्यपि ।
विलीयेते नामरूपाविभागेन प्रवेशतः[१] ।।२० ।।

१. नामरूपोच्छेदकात् प्रवेशात्.

प्रलयके समय जीव तथा जड क्रमशः चित् और अचित् शरीरमें प्रवेश करनेसे नाम तथा रूपकी अभिन्नतामें विलीन हो जाते हैं. (२०)

वस्तुतो भिन्नम् एवैतद् ब्रह्मणश्चिदचित्[१] सदा[२] ।
स्वरूपतः स्वभावाद्यैः[३] शरीरत्वाद् अभेदवाक्[४] ।।२१ ।।
सूक्ष्मे चिदचिती ब्रह्म तत्त्वानि त्रीणि कारणे ।
स्थूले ते[५] च तदन्तस्थः कार्ये तत्त्वत्रयं मतम् ।।२२ ।।

१. पञ्चमीयम्. २. सृष्टेः पूर्वोत्तरकालयोरपि नाभेद इति भावः. ३. भेदे हेतवः. ४. ब्रह्माभेदोस्तीति श्रुत्यादिवाणी तयोः शरीरत्वाभिप्रायाद् औपचारिकी. ५. चिदचिती.

वस्तुतः चित् तथा अचित् स्वरूपतः तथा स्वभावतः ब्रह्मसे भिन्न ही है. वे ब्रह्मके शरीर होनेसे ही उपनिषदोंमें अभेद प्रतिपादित किया जाता है. सूक्ष्म

चित्, सूक्ष्म अचित् और ब्रह्म, ये तीन तत्त्व हैं. स्थूल चित्, स्थूल अचित्, तथा उनमें स्थित अंतर्यामी; ऐसे कार्यमें तीन तत्त्व है. (२१-२२)

तत् स्थूलसूक्ष्मचिदचिद् विशिष्टे कार्यकारणे।
क्रमात् तयोरभेदस्तु विशिष्टाद्वैतम् ईर्यते ।।२३।।

कार्य तथा कारण, यह स्थूल और सूक्ष्म; चित् तथा अचित्से विशेषता प्राप्त किये हुए हैं. क्रमशः इन दोनों प्रकारके चित् तथा अचित्के अभेदको ही विशिष्टाद्वैत कहा जाता है. (२३)

चिच्छरीरेण चित्कार्यस्याचितोऽचिच्छरीरतः।
अन्तःस्थेन परस्यैक्यं न त्रयाणां परस्परम् ।।२४।।

चित् शरीरसे चित् कार्यकी, अचित् शरीरसे अचित् कार्यकी तथा अंतर्यामीसे ब्रह्मकी एकता है. परंतु इन तीनोंकी परस्पर कोई एकता नहीं है. (२४)

[1]अस्मन्मतेऽपि भेदश्चेद् जडजीवान्तरात्मनाम्।
निबन्धे तन्मतं तत्त्वत्रयं स्याद् इति चेद् नहि ।।२५।।

१. स्वमतेऽपि त्रयः पदार्था इत्याद्याशङ्क्य 'कार्यमेव त्रिधा'इति परश्लोकेन समादधाति.

शंका = शुद्धाद्वैत सिद्धांतमें भी जड, जीव तथा अंतर्यामीका भेद तत्त्वार्थदीपनिबंधमें कहा गया है. वहां प्रतिपादित ये तीन विशिष्टाद्वैतवालोंके तीन तत्त्व क्यों नहिं? (२५)

जडो जीवान्तरात्मेति कार्यमेव त्रिधा मतम्।
कारणं त्वेकमेवेदम् अद्वैतैकरसं परम् ।।२६।।

समाधान = यदि ऐसा कहते हो तो उत्तर यह है कि - जड, जीव तथा अंतर्यामी- ये तीन तो कार्य हैं. कारण तो अद्वैत, एकरसात्मक परब्रह्म ही है. (२६)

स बहुस्यां प्रजायेयेतीच्छामूलः परस्परम्।
कार्यमात्रत्वतो भेदः तेषां[1] घटशरावत् ।।२७।।

१. जडजीवानां कार्यत्वेन परस्परं भेदो न पुनः कारणेन सह.

ऐसा कार्यगत भेद 'एकोऽहं बहुस्यां..' वचनानुसार ब्रह्मकी इच्छासे उन

जडादिकोंका परस्पर कार्यरूपसे ही घट शरावोंके भेदकी तरह स्वीकृत है. (२७)

न नित्यो वास्तवस्त्वेषां भेदः कुड्यकुसूलवत्।
मृत्त्वेनाभेदवत् तेषाम्[१] अभेदोत्रास्ति[२] वास्तवः[३]॥२८॥

१. घटादीनाम्. २. जडादिषु. ३. अनौपचारिकः.

इन तीनोंमें परस्पर दीवाल तथा कमरेकी तरह नित्य अथवा वास्तविक भेद नहीं है. घट तथा प्यालेमें जैसे मिट्टीसे निर्मित होनेके कारण मृदात्मक होनेसे अभेद है, उसी प्रकार इन तीनोंका भी वस्तुतः अभेद ही है. (२८)

'सर्वं पुरुष एवेदं' 'नेह नानास्ति किञ्चन'।
'मृत्योः स मृत्युम् आप्नोति य इह नानेव पश्यति'॥२९॥

'यह सब कुछ पुरुष ही बना है', 'यहां अन्य कुछ भी नहीं है', 'जो कोइ भी यहां अनेकता देखता है, वह मृत्युसे मृत्यु प्राप्त करता है.' (२९)

द्वैतदृष्टेः 'द्वितीयाद् वै भयं भवति' सर्वथा।
[१]'आत्मेतितूपगच्छन्ति ग्राहयन्ति च' तद् विदः॥३०॥

१. ज्ञानिनः परं ब्रह्म आत्मत्वेन प्रत्यक्षीकुर्वन्ति तदनन्तरं तत् प्रविशन्ति च. परांश्चोपदिशन्ति च.

जिसकी द्वैत दृष्टि है उसे सभी प्रकारसे 'द्वितीयाद् वै भयं भवति'– अन्योंसे भय होता है'. उस अद्वैतको आत्मवेत्ता व्यक्ति ब्रह्मसूत्रमें प्रतिपादित प्रकारानुसार, 'आत्मरूपसे स्वयं उसे प्राप्त करता है तथा अन्य अधिकारियोंको भी आत्मरूपसे ज्ञात करवाता है.' (ब्रह्म.सू.४।१।३) (३०)

''तद् यो यो देवानां प्रत्यबुद्ध्यत सएव तद् अभवत्
तथा ऋषीणां तथा मनुष्याणां तद्धैतत् पश्यन् ऋषिः
वामदेवः प्रतिपेदे अहं मनुः अभवं सूर्यश्च इति''।

'अतः देवोंमेंसे जो जो कुछ भी जाग्रत हुआ, वह ब्रह्मरूप हुआ. इसी प्रकार ऋषिओंका भी तथा मनुष्योंका भी. ऐसा दर्शन प्राप्त करनेपर ऋषि वामदेवको ऐसा प्रतीत हुआ कि मैं मनु हुआ–में सभी कुछ हुआ' (बृहदा. उप.१।४।१०)

''तद् इदमपि एतर्हि य एवं वेद अहंब्रह्मास्मि इति स
इदगुं सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशत

आत्मा ह्येषां स भवति अथ योऽन्यां देवताम् उपास्ते
अन्यो असौ अन्यो अहम् अस्मि इति न स वेद यथा
पशुः एवं स देवानाम्'' इत्यादि।

'ऐसा इसलिए हुआ क्योंकि जो 'में ब्रह्म हुं' ऐसा जानता है, वह सर्वरूप बन जाता है. ऐसे जीव पर अभूत्य देवाताओंका कोइ अधिकार नहीं है. वह उनका आत्मा बनकर रहता है. जो अन्य देवोंकी उपासना करता है, 'यह अन्य है', 'मैं अन्य हुं' ऐसा वह पशुकी तरह कुछ भी जानता नहीं है, वह देवोंका भी'.....इत्यादि.

'ब्रह्मविद् ब्रह्मैव भवती'त्यादिश्रुतिषु स्फुटम्।
कार्येऽपि भिन्नचिद् अचिद् वैशिष्ट्यं तेन वारितम् ।।३१ ।।

'ब्रह्मका ज्ञाता ब्रह्मरूप ही हो जाता है.' – इन श्रुतियोंमें भिन्न चित्–अचित्की विशेषतावाला कार्य नहीं है, ऐसा स्पष्ट होता है. (३१)

[१]अथ ब्रह्मातिरिक्तस्य कारणत्वं निवारये।
'एकमेवाद्वितीयं' तद् वेदे ब्रह्मैव कारणम् ।।३२ ।।

१. भिन्नप्रक्रमेण. ब्रह्मैव स्वरूपेण सर्वकारणं न तु शरीरवैशिष्ट्येन इति उच्यत इति अर्थः.

अब ब्रह्मातिरिक्त किसीके अन्य पदार्थके कारण होनेकी शंकाका निरास किया जाता है. 'एक ही अद्वितीय' – ऐसे ब्रह्म ही वेदादिशास्त्रोंमें कारणके रूपमें कहे गए हैं. (३२)

'नासदासीद् नो सदासीद्' 'नान्यत् किञ्चिन्मिषत्' तदा।
स्वभिन्नचिदचित्सत्त्वे 'त्वेकोऽहम्' इति बाध्यते ।।३३ ।।

'न असत् था, ना ही सत् था', 'देखनेवाला अन्य कोई नहीं था', 'मैं एक ही हुं'. ये सभी वाक्य प्रभुसे भिन्न चित् और अचित्के होनेका बाध करते है. (३३)

'आत्मैव इदम् अग्र[१] आसीत् पुरुषविधः सो
अनुवीक्ष्य न अन्यद् आत्मनो अपश्यत्' तत्रैव।

'पूर्वमें पुरुषरूप आत्मा ही था, जिसने देखनेका प्रयत्न किया, परंतु अपनेसे पर कुछ भी देखा नहीं(बृहदा.उप .१।४।१,१७).

'ब्रह्म[१] वा इदम् अग्र आसीत् तद् आत्मनमेव अवैद्
अहं ब्रह्मास्मीति तस्मात् तत् सर्वम् अभवत्' तत्रैव।

पूर्वमें यह ब्रह्म ही था. उन्होंने अपनी आत्माको जाना कि, 'मै ब्रह्म हुं.' उन्हींसे यह सब उत्पन्न हो गया(बृहदा.उप.१।४।१०).

'आत्मैव इदम् अग्र आसीद्' एकएव 'सो अकामयत' इत्यादि।
'सदेव सौम्य! इदम् अग्र आसीद् एकमेव अद्वितीयं ब्रह्म'।

''पूर्वमें एक ही आत्मा थी, उसने कामना की''(बृहदा.उप. १।४।१, १७). ''हे सौम्य! सत् मात्र था. वह एक अद्वितीय ही था''(छान्दो.उप. ६।२।१).

सत्त्वेव सोम्य! इदम् अग्र आसीद् एकमेव अद्वितीयं तद्
ऐक्षत बहस्यां प्रजायेय इति। तत् तेजो असृजत। [१]आत्मा
वा इदम् एक एव अग्र आसीत् नान्यत् किञ्चन मिषत् स
ऐक्षत लोकान्नुसृजा इति स इमान् लोकान् असृजतेति[२]।।

१. बह्वृचानाम् ऐतरेयोपनिषदि १।१. २. लोका अम्भःप्रभृतयः पदार्थाः तत्र प्रसिद्धाः.

'एक ही अद्वितीय सत् मात्र पूर्व था. हे सौम्य! उसने ईक्षण किया. मैं अनेक हो जाउं, प्रजनन करुं, उसने तेजका सृजन किया.' 'पूर्वमें यह एक आत्मा ही था, अन्य कोइ देखनेवाला नहीं था. 'में लोकका सृजन करुं', ऐसी उसने इच्छा प्रकट की. उन्होंने इस जगतका सृजन किया.

''[१]तस्माद् वा एतस्माद् आत्मन आकाशः सम्भूत''
इत्यादि।

''सो अकामयत बहुस्यां प्रजायेय इति। स तपो
अतप्यत। स तपस्तप्त्वा। इदं सर्वम् असृजत।
तदात्मानं स्वयमकुरुत। तस्मात् तत्सुकृतम् उच्यत
इति।

'उस आत्मासे आकाश उत्पन्न हुआ.' 'उसने कामना की कि मैं अनेक हो जाउं, प्रजनन करुं.' 'उन्होंने तप किया.' 'उन्होंने तप करके सभीका सृजन किया.' 'उसने अपनी आत्माको स्वयं ही प्रकट किया, अतः वह उत्पत्ति सुकृत

हुई'(तैत्ति. उप. २।१।१).

स्वयं पर्यणमद् ब्रह्म जगद्रूपेण केवलम्[१]।

ब्रह्मणोऽन्ये शरीरे तु युज्यते नैव जीववत् ।।३४।।

१. निमित्तादिनिरपेक्षः. अतएव ''उपसंहरादर्शनाद् इति चेद् न क्षीरवद्धि.'' तदर्थस्तु – यथा घटोत्पत्त्यादौ मृत्तिकाया निमित्तादिसमाग्री अपेक्षते तथा ब्रह्मणोऽपि इति चेद्, न, यथा दुग्धं निरपेक्षमेव दधि भवति तथा ब्रह्माऽपि.

किसी भी निमित्तकी अपेक्षासे रहित होकर ब्रह्म स्वयं ही जगतके रूपमें परिणमित हुए. जीवको जैसे स्थूल–सूक्ष्म शरीरकी आवश्यकता है, ऐसे ब्रह्मको अन्य दो शरीरोंकी अपेक्षा नहीं है. (३४)

''अशरीरं शरीरेषु ह्यनवस्थेष्ववस्थितम् ।

महान्तं विभुमात्मानं मत्वा धीरो न शोचति'' ।।३५।।

धीर पुरुष शरीरोंके बीच अशरीरी तथा स्थितिहीनोंके बीच स्थिति किए हुए विभु आत्माको समझनेके बाद शोक नहीं करते हैं. (३५)

शरीराभावमेतस्य यत् पठन्ति कठादयः ।

नेदं जीवपरं वाक्यं ब्रह्मप्रश्नोत्तरे स्थितम् ।।३६।।

कठ आदि उपनिषदोंमें 'इन्हें शरीर नहीं है', ऐसा कहा गया है. वहां दिया गया यह वाक्य जीवको उद्देश बनाकर नहीं दिया गया है, किन्तु ब्रह्म विषयक प्रश्नके उत्तरमें कहा गया वाक्य है. (३६)

''त्रयाणाञ्चैवमुपन्यासः प्रश्नश्च'' ।

इति सूत्रे स्फुटम् इदं, विभुत्वं चेह[१] बाधकम् ।

आनन्दमात्रकरपादमुखोदर एव सः[२] ।।३७।।

१. 'स त्वमग्निम्' इत्यादिना अग्नेः प्रश्नः तदुत्तरञ्च. ''यं प्रेते विचिकित्सा'' इत्यादिना जीवप्रश्नः तदुत्तरञ्च. 'अन्यत्र धर्माद्'इत्यादिना तु ब्रह्मप्रश्नः. 'सर्वे वेदा यत् पदम्' इत्यादिना तदुत्तरम्. तेन ब्रह्मप्रकरणम् इदं न जीवस्य. २. इह जीवपक्षे. विभुत्वं बाधकम्. भवन्मते तद् अणुत्वस्वीकारात्.

साकारः श्रूयते [१]'जीववद् भिन्नावयवो न सः ।

सूत्रे तदतएवा'ऽऽह च तन्मात्रम्' इति स्फुटम् ।।३८।।

१. किन्तु इति शेषः.

'अग्नि, जीव तथा उपन्यासके विषयमें यह प्रश्न है', ऐसा अंतिम ब्रह्म प्रकरणमें भी कहा गया है. ब्रह्मसूत्रमें भी स्पष्ट ही है. यहां जो विभु कहा है, वह जीव पक्षमें बाधक है (क्योंकि रामानुजोंने भी जीवको अणु परिमाणवाला माना है). प्रभु तो आनंदमात्र हस्त-चरण-मुख-उदरवाले साकार है; जीवोंकी तरह भिन्न अंगोंवाले नहीं है. 'आह च तन्मात्रम्'- इस सूत्रमें भी यही विषय स्पष्ट किया गया है. (३७-३८)

[1]शरीरेष्वित्युक्तितस्ते कल्प्येते चेद् बहूक्तितः।
अनवस्थत्वोक्तितो द्वे एव नित्ये च ते कुतः ।।३९ ।।

१. 'अशरीरम्' इत्यादिश्रुतौ 'शरीरेषु' इति पदोपादानात् तस्यापि शरीरं कल्पयाम इति चेत् तस्यामेव श्रुतौ तस्मिन्नेव पदे बहुवचनं, पदान्तरे च अनवस्थत्वोक्तिः तर्हि तदनुरोधाद् बहूनि शरीराणि, न द्वे, अनित्यानि च, न नित्ये, इत्यपि स्वीकर्तव्यम् इति अर्थः.

'(३५वें श्लोके मंत्रमें) 'शरीरेषु' - इस शब्दसे दो शरीरोंकी कल्पना की गई है. वहां बहुवचन कहा गया होनेसे 'अनवस्थेषु' कहा गया होनेसे वही नित्य शरीर कैसे सिद्ध हो सकता है? (३९)

किं च ते किं परिच्छिन्ने न वाद्ये[1] परिमातु[2] का।
अणुर्वा मध्यमा नैव सा प्रसिद्धा तयोः क्वचित्[3]।।४० ।।

१. 'परिच्छिन्ने शरीरे' इति पक्षे. २. परिमाणम्. ३. श्रुत्यादौ.

वे दोनों शरीर परिच्छिन्न हैं कि अपरिच्छिन्न? यदि परिच्छिन्न हैं ऐसा कहें तो परिमाण क्या? अणु या मध्यम परिमाण? ऐसी कोई भी प्रसिद्धि इन दोनोंके बारेमें कहीं भी नहीं है. (४०)

परिच्छिन्नतयानन्तविश्वोत्पत्तौ क्षयोऽनयोः।
किं चैतयोरधिष्ठानं वाच्यं[1] ब्रह्मैव चेत् स्वयोः[2] ।।४१ ।।
शरीरयोरधिष्ठानं शरीरीति न सङ्गतम्।
अपरिच्छिन्नपक्षे तु सांकर्यं[3] न कुतो भवेत् ।।४२ ।।

१. वाच्यम् इत्यन्तं पृथग्वाक्यम्. २. इदम् उत्तरान्वयि. ३. चिदचिच्छरीरयोः व्यापकत्वपक्षे तु सांकर्यं (परस्परैकीभावः) कुतो न. यतः - उभयोः व्यापकत्वाद् अन्योन्यस्मिन् अन्योन्यं भवेत्. अन्यथा व्यापकत्वहानिः. तदानीं देशकालादीनाम्

अभावाद् द्वयोः विभाजकं विभागदर्शकं सर्वदा नास्ति.

परिच्छिन्नता का स्वीकार करनेसे अनंत विश्वकी उत्पत्तिमें इन दोनोंका क्षय होगा तथा यदि इन दोनों ही शरीरोंका अधिष्ठान ब्रह्म ही हो, तो अपने दोनों शरीरोंका अधिष्ठान शरीरीका होना योग्य नहीं है. अपरिच्छिन्न है, ऐसा यदि कहा जाए तो सांकर्य क्यों नहीं होगा? (४१-४२)

अन्योन्यस्मिन् यतोऽन्योन्यं विभुत्वे नास्ति सर्वदा।
अतो विभाजकं किं स्याद् देशकालाद्यसम्भवात् ।।४३ ।।

विभुपनेमें दोनोंको व्यापक कहनेसे तो कुछ भी सिद्ध नहीं होगा. यदि ऐसा न कहें तो व्यापकताकी हानि होगी. उत्पत्तिसे पूर्वके समयमें देश तथा कालके अभावको लेकर दोनोंका विभाग करनेवाला भी कौन तथा क्या होगा? (४३)

देशाभेदेऽप्यसांकर्यं विभुत्वं च न मूर्तयोः।
दृश्यतेऽथोद्गमार्थं[१] चासांकर्यार्थं जडात्मनोः[२] ।।४४ ।।

१. 'व्युच्चरन्ती'तिश्रुतेः बहिःनिःसरणादिकार्याय देशापेक्षा इति अर्थः. २. जडजीवरूपयोः तयोः परस्परस्य भेददर्शनायापि कालदेशाद्यपेक्षेत्यर्थः.

तिरोभावादि[१] वक्तव्यं तत् प्रसिद्धं न ते मते।
इत्यादि दूषणैर्वक्तुं न शक्ये चिदचित् तनू।।४५ ।।

१. चित्प्रादुर्भावदेशकालयोः अचितः तिरोभावो अपेक्ष्यते. अचित् प्रादुर्भावदेशे च चितः तिरोभावो अपेक्ष्यते. तथा त्वन्मते अस्वीकारात् तयोः व्यापकत्वं न युक्तिसहम् इत्यर्थः.

नापि शक्या[१] तयोः सत्ता सृष्टेः प्राक् ब्रह्मभिन्नयोः।

देशका अभेद कहनेपर भी उन दोनों मूर्त शरीरोंका असांकर्य और विभुत्व नहीं रहेगा. उद्गमको सिद्ध करनेके लिए तथा सांकर्यके निवारणके लिए जड तथा जीवका तिरोभाव कहना चाहिए, ऐसा रामानुजोंके मतमें भी नहीं है. ऐसे अनेक दोषोंकी संभावनाके कारण चित् तथा अचित् शरीर हैं, ऐसा कहना संभव नहीं है तथा ब्रह्मसे भिन्न इन दोनों शरीरोंकी स्थिति सृष्टिसे पूर्व होना भी संभव नहीं है. (४४-४५)

'आत्मैवेदम् अग्र आसीत्' 'सदेवे'त्येवकारतः ।।४६ ।।

'आत्मैव...' आदि श्रुतिवाक्योंमें एवकार का प्रयोग किया गया है.

'एकमेवाद्वितीयं' तद् इत्यादि श्रुतिकोपनात् ।

इह[1] सत् तत्त्वमस्यादौ तच्च ब्रह्मैव गीयते ।।४७ ।।

१. इह 'सदेव सौम्य' इति श्रुतौ सत् शब्देन्, तत्वमस्यादिश्रुतौ च तत् शब्देन ब्रह्मैव गीयत इत्यर्थः.

'अकेला ब्रह्म ही था' इन श्रुतिवाक्योंमें जो सत् शब्द है तथा 'वह तु है' – इस वाक्यमें 'तद्' शब्द है वह ब्रह्मका ही निरूपण करता है. (४६–४७)

'ॐ तत् सद् इति[1] निर्देशो ब्रह्मणः त्रिविधः स्मृतः' ।

'अहमेवासम् एवाग्रे नान्यद् यत् सदसत्परम् ।।४८ ।।

१. तदेव गीता प्रमाणयति.

'ॐ, तद् तथा सत् – ऐसे ब्रह्मके तीन प्रकारके निर्देश है.' 'पूर्वमें मैं अकेला ही था, अन्य कुछ भी सत्–असत् नहीं था.' (४८)

पश्चाद् अहं यद् एतच्च योऽवशिष्येत सोऽस्म्यहम् ' ।

श्रूयते 'सोनु[1]वीक्ष्यान्यद् आत्मनोऽपश्यद्'' इत्यपि ।।४९ ।।

१. आर्थिको अनुवादः पदविपर्यासाश्च छन्दोनुरोधात्.

'प्रलयके बाद मैं तथा यह जो कुछ भी है, जो बच जाता है वह भी मैं ही हुं', 'उन्होंने वीक्षा की , उसने आत्मामेंसे अन्यको देखा' ऐसा भी श्रुतिवाक्य है. (४९)

सती[1] स्वान्ये[2] चिदचिती दृष्टे नान्वीक्षयाऽपि चेत् ।

सर्वज्ञत्वं व्यापकत्वम् ईशत्वं तस्य भज्यते ।।५० ।।

१. विद्यमाने. २. स्वप्रतियोगिकतात्विकभेदवती.

वीक्षा करनेपर भी अपनेसे भिन्न चित् और अचित् शरीर जब देखे नहीं तब 'प्रभु सर्वज्ञ हैं, व्यापक हैं और इश्वर हैं' यह बात ही असंगत सिद्ध हो गई. (५०)

द्वितीयेच्छा रत्यभावमूलिकैकाकिनः[1] श्रुता[2] ।

एकाकित्वं रत्यभावो द्वितीयेच्छा च[3] बाधिता ।।५१ ।।

१. ''स नैव रेमे तस्माद् एकाकी न रमते, सहैतावानास'' बृहदारण्यके. २. चिदचित् सत्वाद् एकाकित्वस्य, ताभ्यां सहैव रतिसम्भवाद् रत्यभावस्य, ततएव च

द्वितीयेच्छायाश्च बाधः. ३. चकारात् सर्वरूपेण भवनमपि बाधितम्.

'नैव रेमे' – इस वाक्यमें रमणका अभाव कहनेके बाद रमणकी जो इच्छा हुई, वह इच्छा अकेले ब्रह्मको ही हुई. ऐसी स्थिति होनेके कारण 'एकाकीपना', 'रमणका अभाव' और 'द्वितीय की इच्छा', इन तीनोंका (चित् तथा अचित् शरीर माननेपर) बाध हो जाता है. (५१)

नन्वेकएवाहम् आसम् इत्यादौ[१] देहजीवयोः।
द्वयोः सत्वेऽप्येकपदं तदभेदाश्रयाद् यथा ।।५२।।
[२]तथा द्विदेहयुग् ब्रह्माऽत्रात्मशब्देन[३] गृह्यते।
तथैकोऽहं स्थलेऽतोन्यद् नासीत्[४] किञ्चित्तदेति चेत् ।।५३।।

१. लौकिकप्रयोगे. २. लौकिक वाक्य इव. ३. ''सो अनुवीक्ष्य न अन्यद् आत्मन'' इत्यत्र. ४. अतो वेदे 'एको अहम्' इति सत्यपि चिदचिदादिकिञ्चिदपि तदा न आसीद् इति न, किन्तु आसीद् एव इति अर्थः.

'शंका = 'में अकेला ही था', ऐसे वाक्योंमें देह तथा जीव, दोनों होने पर भी दोनोंका अभेदाश्रयके बोधके कारण एक शब्दका उच्चारण किया जाता है. उसी प्रकार दो देहोंवाले ब्रह्मका 'आत्मन्' शब्दसे यहां स्वीकार किया गया है अतः 'मैं एक ही हुं', इस वाक्यमें 'अन्य कोई नहीं था', ऐसा कहा है, परंतु चित्–अचित् शरीर तो हैं ही. यदि ऐसा कहा जाए तो? (५२–५३)

मैवं, जीवस्य देहेऽहंप्रत्ययोऽध्यासजो मृषा।
अविद्ययेशेच्छयास्तीत्येकत्वं[१] प्रयुनक्ति सः[२]।।५४।।

१. अविद्याकरणकबन्ध इयं हेतुः. २. लौकिकवाक्यादौ स जीवः प्रयुनक्ति इति अर्थः.

नहीं, ऐसा नहीं है. देहमें जो अहंता है वह अध्यासजन्य होनेके कारण मिथ्या है. वह अविद्या प्रभुकी इच्छासे जन्य होनेके कारण 'अस्ति–है' – ऐसा जीव एकवचनका प्रयोग करता है. (५४)

न तथा ब्रह्मणो[१] मिथ्याऽध्यासोऽज्ञानैकहेतुकः।
स्थिरानवध्यसङ्ख्येय–कल्याणगुणशालिनः ।।५५।।
सर्वज्ञस्याविलिप्तस्य स्वतन्त्रस्य नियामिनः।
स्वाधीनाविद्यादिशक्तेः नित्यमुक्तस्य युज्यते ।।५६।।

१. तथा ब्रह्मणो मिथ्याध्यासो न युज्यत इत्याद्यन्वयः.

समाधान= ऐसा मिथ्या अध्यास अज्ञानके लिए ही कारणरूप है. वह स्थिर, अवधिहीन, असंख्य कल्याणगुणशाली, सर्वज्ञ, अलिप्त, स्वतंत्र, नियामक, अविद्यादि शक्ति जिनके आधीन है, ऐसे नित्यमुक्त ब्रह्मसे उसका संबंध नहीं हो सकता है. (५५-५६)

युग्मम्

अथा'त्मैवेदम्'इत्यादौ सर्वस्याप्यात्मरूपता।
प्राक्सर्गात् श्रूयते नान्यचिदचिद्रूपता क्वचित्।।५७।।

[१]विरुद्धा ब्रह्मभिन्नत्वाद् वस्तुतो जडजीवयोः।
'आत्म'शब्दस्य चिदचित् परत्वन्तु[२] न शक्यते।।५८।।

१. जडजीवयोः ब्रह्मात्मकता इति शेषः. २. वक्तुम् इति शेषः.

'आत्मैवेदम्' आदि श्रुतिवाक्योंमें सृष्टिसे पूर्व सभीकी आत्मरूपता कही गइ है. अतः जीव-जडकी चित्-अचित्रूपताका बाध नहीं होता है. तथा वस्तुतः जीव तथा जड ब्रह्मसे अभिन्न होनेके कारण आत्मन् शब्दको चित्-अचित्परक कहना भी योग्य नहीं है. (५७-५८)

निर्गुणः पर एवैकः तदर्थ[१] इति निर्णयात्।
'गौणश्चेद् नात्मशब्दाद्'इत्यादौ तत् सर्वसम्मतम्।।५९।।

१. आत्मशब्दार्थः.

'आत्मन्' शब्दका अर्थ 'निर्गुणपरक है' ऐसा गौणश्चेन्नात्मशब्दात्।' - गौण हैं, ऐसा हो तो नहि, आत्मन् शब्दके कारण वह प्रधान ब्रह्म है', इस सूत्रमें किसीभी प्रकारके मतभेदके बिना यह सिद्धांत स्पष्टरूपसे सिद्ध ही है. (५९)

उपादानं 'सहैतावानासे'त्युक्त्वा तदेव[१] हि।
तथाभिन्ननिमित्तोपादानदृष्टान्तपूर्वकम्[२] ।।६०।।

सर्वेषां जडजीवानां ततएवैकतः[३] श्रुतः।
उद्गमो नतु तद्भिन्न चिदचिद् देहतः क्वचित्।।६१।।

१. ब्रह्मैव. २. अभिन्ननिमित्तोपादाने दृष्टान्त... स पूर्वं यस्मिन् कर्मणि इति क्रियाविशेषणम्. ३. एकस्माद् ब्रह्मण एव इति अर्थ....

'स हैतावानास' - वह इतने हो गए' ऐसा कहकर उपादान कारण

होनेकी बात कही गइ है. वहां निमित्त तथा उपादान कारण अभिन्न हैं, ऐसा कहा गया है. सभी जड तथा जीवोंका उन अकेले ब्रह्मसे ही उद्गम श्रुतिमें बताया गया है, नहिं कि उनसे भिन्न चित्-अचित् शरीरोंसे. (६०-६१)

युग्मम्

[१]'स यथोर्णनाभिस्तन्तुनोच्चरेद् यथाग्नेः क्षुद्रा
विस्फुलिङ्गा व्युच्चरन्ति एवमेव आस्माद् आत्मनः
सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि
व्युच्चरन्ति' इति।
अनेकोपनिषद्धुष्टम् एतत् किं बहुविस्तरात्।
न च जीवप्रकरणाद् वाक्यं जीवपरन्त्विदम्॥६२॥

जैसे मकडी तंतुओंका विस्तार करती है, जैसे अग्निसे छोट-छोटे व्युस्फल्लिंग प्रकट होते हैं, उसी प्रकार इस आत्मासे सभी प्राण, सभी लोक, सभी देव, सभी भूतोंका उद्गम होता है.' (बृहदा.उप.२।१) उपरोक्त सभी सिद्धांत उपनिषदोंके अनेक वाक्योंमें प्रसिद्ध ही हैं. विस्तार क्या करना? यह प्रकरण जीवके संदर्भमें होनेसे यह वाक्य जीवपरक है ऐसा नहीं है. (६१-६२)

अणुमात्रात् ततः[१] सर्वान् उद्गमाद् लिङ्गबाधनात्।
भवेद् लिङ्गं प्रकरणाद् बलिष्ठं पूर्वतन्त्रतः[२]॥६३॥

१. जीवात्. सर्वोद्गमरूपलिङ्गस्य बाधाद् इत्यर्थः. न हि परमात्मानम् अन्तरा सर्वोद्गमः कुतोऽपि सम्भवति इत्यर्थः. २. श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षाद् इति मीमांसासूत्रात्।

अणुमात्र, ऐसे जीवसे सभीका उद्गम होता न होनेसे तथा सभीके उद्गमरूप लिंगका बाध होता होनेसे पूर्वमीमांसाके प्रकरणानुसार भी लिंग बलिष्ठ है. (६३)

सुषुप्तौ ब्रह्मलीनस्य[१] तत उद्गमबुद्धये।
सर्वेषाम् उद्गमः तस्मात् पठ्यते परमात्मनः॥६४॥

१. जीवस्य इति शेषः.

सुषुप्तिमें ब्रह्ममें लीन हो चुके जीवका ब्रह्मसे उद्गम हुआ दिखानेके लिए परमात्मासे सभी जीवोंके उद्गमकी बात कही गई है. (६४)

अथोत्पत्त्यप्ययाधारं तमेवोक्त्वा तदात्मता ।
श्राव्यते तैत्तिरीयादौ सर्वेषां भूतभाविनाम् ।।६५।।

उत्पत्ति, नाश तथा स्थिति का निरूपण ब्रह्मपरक करके उपनिषदोंमें उत्पन्नोंकी तथा उत्पद्यमानोंकी ब्रह्मरूपता सिद्ध की गई है. (६५)

[१]यस्मिन् इदगुं सं चविचैति[२] सर्वं
यस्मिन् देवा अधिविश्वे निषेदुः ।
तदेव भूतं तदुभव्यमा इदं तदक्षरे परमे व्योमन् ।
'प्रकृतिश्च[३] प्रतिज्ञादृष्टान्तानुपरोधाद्'इत्यादि ।
तस्य अभिन्ननिमित्तोपादानतां प्राह सूत्रकृत् ।
अभेदश्रुतयः सर्वाः सङ्गच्छन्ते न चान्यथा ।।६६।।

१. महानारायणोपनिषदि. २. संचविचैतीति दिव्यप्रयोगेण उत्पत्तिलयौ बोध्यौ. ३. जगतः प्रकृतिः उपादानकारणं, चाद् निमित्तकारणं च ब्रह्मैव. एवं सति एवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा, 'यथा सौम्यैकेन मृत्पिण्डेन' इत्यादि दृष्टान्तश्च नोपरुद्ध्येत. (१।४।२३)

'जिनमेंसे यह उत्पन्न होता है तथा जिनमें लीन होता है, जिनमें सभी देव विश्वके ऊपर बिराजमान हैं, वही हुआ है तथा होनेवाला है. यह सभी कुछ अक्षरात्मक परम आकाशमें स्थित है.' 'एक विज्ञान द्वारा सर्वविज्ञान होनेकी प्रतिज्ञाके दृष्टांतका अनुसरण करके जगतके उपादानकारण तथा निमित्तकारण ब्रह्म ही हैं' ऐसे निरूपणमें सूत्रकार व्यासजीने जगतके उपादान तथा निमित्त कारणको एक ही कहा है. यदि ऐसा अर्थ न होता तो अभेदका बोध करवानेवाले सभी श्रुतिवाक्योंकी संगति नहीं हो पाती. (६६)

पुमांश्च प्रकृतिः सूक्ष्मतनू इत्यपि नोचितम् ।
यद् वक्ष्यते ब्रह्म तयोरुपादानं लयास्पदम् ।।६७।।
घटते तेन चिदचिद् वैशिष्ट्यं नैव कारणे ।
अन्तर्यामिब्राह्मणं न सूक्ष्म तद्देहसाधकम्[१] ।।६८।।

१. ब्रह्मदेहयोः साधकम्.

पुरुष तथा प्रकृतिको सूक्ष्मशरीर मानना भी अनुचित ही है, क्योंकि उन दोनोंका उपादान तथा लयस्थान ब्रह्म ही माने जाएंगे. उक्त हेतुसे कारणदशामें

ब्रह्मका चित् चिद्विशिष्ट होना संगत नहीं है. अन्तर्यामि ब्राह्मण भी सूक्ष्म चिद्-अचिद्का साधक नहीं है. (६७-६८)

आम्नायतेऽत्र[१] वृत्तान्तः सर्गाद् उत्तरकालिकः ।

तिष्ठन् यमयतीत्येवं वर्त्तमाने शता[२] च लट्।।६९।।

१. 'यः पृथिव्याम् इत्यादि श्रुतिषु. २. शतृशब्दस्य प्रथमैकवचनम्.

'यः पृथिव्याम्....' इस श्रुतिवाक्यमें सृष्टिकी उत्पत्ति होनेके बादका वृत्तांत कहा गया है. 'तिष्ठन् यमयति - स्थित होकर नियमन करता है', इस वचनमें वर्तमान कृदंतके साथ वर्तमानकालके रूपका प्रयोग किया गया है. (६९)

[१]कालान्तरे विभोर्भिन्नं किञ्चिद् व्याप्यं न विद्यते ।

सर्वस्य पूर्णब्रह्मत्वात् परिच्छेदाद्यभावतः[२]।।७० ।।

१. प्रपञ्चस्य व्याकृतनामरूपतया स्थित्यधिकरणकालातिरिक्ते. २. 'आदि' शब्दाद् आनन्दांशतिरोभावादीनां सङ्ग्रहः.

सभीकुछ पूर्ण ब्रह्मरूप होनेसे तथा परिच्छेद और आनंदांशका तिरोभावादि न होनेसे, नाम-रूपकी उत्पत्तिके अलावाके समयमें विभु प्रभुसे पृथक् कोइ भी पदार्थ व्यापक नहीं रहता है. (७०)

पृथ्व्यादिनामानर्हं च [१]तादृग्रूपान् उपाश्रयात् ।

यन्तव्याभावतः तत्र नियमोऽपि[२] न युज्यते ।।७१ ।।

१. सृष्टेः प्राक् विभक्तनामरूपेण परिणामाभावाद् इत्यर्थः. २. ब्रह्मकर्तृकः.

सृष्टिकी उत्पत्तिसे पूर्व व्यक्त नाम-रूपोंका आश्रय कोई भी न होनेसे पृथ्वी आदि नाम होनेकी कोई संभावना ही नहीं थी. ऐसी परिस्थितिमें किसीका नियमन करनेका भी कोइ प्रश्न नहीं उठता. अतः ब्रह्म द्वारा होते नियमनका निरूपण भी योग्य नहीं है. (७१)

सृष्टिकाले समुद्भूतं भूतप्राणेन्द्रियादिकम्।

[१]जीवाश्च ततएवाऽत्र[२] ये शरीरतयोदिताः ।।७२ ।।

१. समुद्भूता इति शेषः. २. अन्तर्यामिब्राह्मणे. 'यो विज्ञाने तिष्ठन्' इत्यादौ.

सृष्टिकी उत्पत्तिके समय भूत-प्राण-इंद्रिय आदि उत्पन्न हुए और (अंतर्यामि ब्राह्मणमें) यहां 'यो विज्ञाने तिष्ठन्' आदि वचनोंमें शरीररूप कहे गए

हैं वे जीव भी उन्हींसे उत्पन्न हुए. (७२)

'तस्माद्वा[१] एतस्माद् आत्मन आकाशः सम्भूतः. आकाशाद् वायु'रित्यादि।

उस आत्मामेंसे आकाश उत्पन्न हुआ, आकाशसे वायु...आदि. (तैत्ति.उप. २।१)

''एतस्माद् जायते[१] प्राणो मनः सर्वेन्द्रियाणि च।

खं वायुः ज्योतिरापः पृथिवी विश्वस्य धारिणी'त्यादिषु ।

'उनसे प्राण, मन, सभी इंद्रियां, आकाश, वायु, तेज, जल तथा विश्वको धारण करनेवाली पृथ्वी उत्पन्न होती है' (मुण्डकोप २।१).

अनेकत्र स्फुटम् इदं शास्त्रे[१] मीमांसितं तथा।

[२]आचार्येणान्त्ययोः[३] सम्यग् द्वितीयाध्यायपादयोः ।।७३ ।।

१. ब्रह्मसूत्रेषु. २. व्यासेन. ३. तृतीयचतुर्थयोः.

ऐसे अनेक शास्त्र वचनोंमें यह स्पष्ट है तथा व्यासजीके ब्रह्ममीमांसा शास्त्रके दूसरे अध्यायके तृतीय तथा चतुर्थ पादमें भी यही विचार किया गया है. (७३)

इदानीम् ऐच्छिकाद् भेदाद् रूपनामविभागतः[१]।

स्वात्मकस्य पृथिव्यादेः सप्तम्याऽऽधारतोचिता[२] ।।७४ ।।

१. ननु यदि अन्तर्यामिब्राह्मणस्य सूक्ष्मतद्देहसाधकत्वं नास्ति तर्हि को अर्थः तस्य? इति स्वयम् आशङ्क्य सिद्धान्ते तद्ब्राह्मणस्य ऐच्छिकभेददर्शकत्वं न वास्तवभेददर्शकत्वम् इति तदाशयं विवृणोति. २. 'यःपृथिव्याम्' इत्यादिरूपया.

इसी समय ऐच्छिक भेद प्रकट करके रूप तथा नामका विभाग करके स्वात्मरूप पृथ्वी आदिकी 'पृथिव्यां...' इस वचनमें सप्तमी विभक्तिके प्रयोग द्वारा आश्रयरूपता दिखाइ है. (७४)

तत्र व्याप्ये स्थितः कृत्स्ने प्राणनार्थं[१] नियामकः।

अनुप्रविष्टः सृष्ट्वेदं भरणाय न लिप्यते ।।७५ ।।

१. जीवनार्थम्. 'को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्याद्' इति श्रुतेः.

उत्पत्तिके बाद इस व्यापक जगतको जीवन प्रदान करनेके लिए नियामकने प्रवेश किया तथा उत्पन्न करनेके बाद उनका वे पालन करते हैं, परंतु

ऐसी क्रियासे प्रभु स्वयं इस जगतमें लिप्त नहीं होते हैं. (७५)

तत्सृष्ट्वा तदेवानुप्राविशत् श्रुतितः स्मृतेः[१]।

'यो लोकत्रमाविश्य बिभर्त्यव्यय ईश्वरः'।।७६।।

'जगतका सृजन करके स्वयं उसमें प्रविष्ट होते हैं.' यह सिद्धांत श्रुति तथा गीताके 'जो अव्यय इश्वर तीनों लोकोंमें प्रवेश करके उसका भरणपोषण करते है' (भग. गीता.१५।१७)वचन द्वारा सिद्ध है. (७६)

[१]अतः समुद्रा गिरयश्च सर्वेऽस्मात् स्यन्दन्ते सिन्धवः सर्वरूपाः।

अतश्च विश्वा ओषधयो रसाच्च[२] येनैष भूतः तिष्ठत्यन्तरात्मा।।

१. तैत्तिरीये नारायणप्रश्ने. २. प्रथमार्थे पञ्चमी. कठे रसाश्चेति पाठात्.

उसमेंसे सभी समुद्र, पर्वत, तथा सर्वरूप सभी नदियां प्रवाहित होती हैं. उन्हींसे सभी वनस्पतिओमें रस आता है, जिनसे उत्पन्न यह अंतर्यामी स्थित रहता है.

[१]आनन्दादितिरोभावात् क्रीडनार्थं पृथक्कृताः।

जडा जीवाश्च निःसङ्गं स्वान्तःस्थितम् अधोक्षजम्[२]।।७७।।

[३]तदिच्छया न जानन्तीति 'न वेदे'ति भण्यते।

शरीरम् इति[४] भेदस्तु सृष्टिकालेऽपि लुप्यते।।७८।।

१. आदिशब्दाद् ऐश्वर्यादेः. जडे चिदंशस्य च तिरोधानम्. २. अधस्ताद् अक्षजं यस्मात् तम्. इन्द्रियजन्यज्ञानाविषयम् इत्यर्थः. ३. ब्रह्मेच्छया. ४. तयोः शरीरत्वकथनात्.

युग्मम्

पृथ्व्यादीनां त्वन्मतेऽपि स्थूलानामेव[१] वर्ण्यते।

शरीरतात्रेति[२] तेन न सूक्ष्मे[३] सिद्ध्यतस्तनू।।७९।।

१. त्वया स्थूलत्वेन अभिमतानां पृथिव्यग्निप्रभृतीनाम्. २. अन्तर्यामि-ब्राह्मणे. ३. द्विवचनम्. तनूविशेषणम्. स्थूलानामेव पृथिव्यादिशब्दवाच्यत्वात् शरीरता न सिद्ध्यति इति अर्थः.

सच्चिदानंद परमेश्वरने अपनी क्रीडाके लिए आनंद तथा चिदानंदके तिरोभाव द्वारा पृथक् किये गए जड तथा जीव अपने अंतःस्थित इन्द्रियागोचर

अन्तर्यामीको उसकी इच्छासे नहीं जानते. अतः 'यं पृथिवी न वेद', ऐसा कहा गया है. यहां अन्तर्यामी ब्राह्मणमें आप रामानुज मतस्थोंके मतमें भी स्थूल ही पृथिवी आदिकी शरीररूपता वर्णित है. अतः सूक्ष्म चित्-अचित् शरीरोंकी सिद्धि नहीं होती है. (७७-७९)

भावत्कौ[1] सूक्ष्मदेहौ चेद् वेदादिप्रायगोचरौ।
तदा 'यश्चिति तिष्ठन् योऽचिति तिष्ठन्' इति द्वयम्[2] ॥८०॥
एवं ब्रूयात् तत्तु[3] नोक्तं तस्मात् तौ श्रुत्यसम्मतौ।
कारणे तेन जीवानाम् अतन्त्रं[4] त्वन्मतं त्रयम् ॥८१॥

१. भवद् अभिमतौ. २. वाक्यद्वयमेव ब्रूयाद् नतु 'यः पृथिव्याम्' इत्यादि-वाक्यानि. ३. तादृशं वाक्यं तु न उक्तम् इति अन्वयः. ४. श्रुतेः अविवक्षितम्।

रामानुजीय मतमें निरूपित दोनों सूक्ष्म चित्-अचित् देह यदि वेदादिशास्त्रों द्वारा निरूपित होते तो 'यः पृथिव्याम्...' आदिमें 'यश्चिति तिष्ठन् यो अचिति तिष्ठन्...' जो चित्में रहता है तथा अचित्में रहता है' ऐसे जो दो वाक्य कहे गये हैं उनमें उन वाक्योंका तात्पर्य कारणावस्थामें दो शरीरोंका निरूपण करना नहीं है. अतः तीन प्रकारके जीवोंका निरूपण करके तीन तत्त्वोंका निरूपण करनेवाला रामानुजीय मत श्रुतिवाक्योंको अभीष्ट नहीं है. (८०-८१)

याऽऽधारत्वनियम्यत्व-व्याप्यत्वैः दर्शिता भिदा।
उपक्रमोपसंहार विचारे सा न वास्तवी ॥८२॥

आधाररूपता, नियम्यरूपता तथा व्यापकता - ऐसे जो भेद बताए गए हैं वे श्रुतिवचनोंके उपक्रम तथा उपसंहारका विचार करनेपर योग्य नहीं लगते हैं. (८२)

'सोऽब्रवीत् पतञ्जलं काप्यं याज्ञिकांश्च यो वै
तत्काप्य सूत्रं विद्यात् तं च अन्तर्यामिणम् इति स ब्रह्मवित्
स लोकवित् स देववित् स भूतवित् स आत्मवित् स
सर्वविद् इति तेभ्यो अब्रवीत् तद् अहं वेद' ॥

'उन पतंजल, काप्य तथा याज्ञिकोने कहाः हे काप्य, जो इस सूत्रको जानता है तथा उन अंतर्यामीको जानता है वह ब्रह्मवेत्ता, लोकवेत्ता, भूतवेत्ता,

आत्मवेत्ता तथा सर्ववेत्ता है. ऐसा जो मुझे कहा, वह मैं जानता हुं.'

इत्येकस्यैव विज्ञानात् सर्वविज्ञानम् ईर्यते।

सर्वस्य तदुपादानकत्वे सत्येव सम्भवेत् ।।८३ ।।

इस प्रकार एकके विज्ञानसे सभीका विज्ञान कहा गया है. ब्रह्म ही इन सभीके उपादान कारण होनेपर ही ऐसा सर्वविज्ञान संभव है. (चित्-अचित् शरीरोंको ब्रह्मसे भिन्न माननेपर नहीं) (८३)

एकमृत्पिण्डविज्ञानाद् विज्ञातं स्यात् तु मृन्मयम्।

एकेन लोहमणिना सर्वं लोहमयं यथा ।।८४ ।।

ज़ैसे मिट्टीके एक पिंडके विज्ञानसे मिट्टी पदार्थको जान लिया जाता है, एक लोह मणिके ज्ञानसे सभी लोहमय पदार्थ जान लिए जाते हैं. (८४)

''अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता नान्यो अतो अस्ति द्रष्टा नान्यो अतो अस्ति श्रोता नान्योतो अस्ति मन्ता नान्यो अतोऽस्ति विज्ञाता एष त आत्मा अन्तर्याम्यमृत इति'' ।।

न देखे हुए को देखनेवाला, न सुने हुए को सुननेवाला, न सोचा जा सके ऐसे पदार्थोंको सोचनेवाला, न जाना जा सके उसे जाननेवाला, उसके अलावा कोइ विचारवान् नहीं है, उसके अलावा कोइ जाननेवाला नहीं है, वह तेरा आत्मा आत्मा अंतर्यामी अमृत है.

कर्त्तारो दर्शनादीनां जीवाः स्वांशतयाऽखिलाः।

ब्रह्माभिन्ना विस्फुलिङ्गवद् इत्येवेह बोद्ध्यते ।।८५ ।।

देखने, सुनने, सोचने आदिवाले सभी जीव भगवानके अंश होनेसे अग्निकी चिंगारियां जैसे अग्निसे अभिन्न हैं, उसी प्रकार वे भी ब्रह्मसे अभिन्न हैं, ऐसा समझा जा सकता है. (८५)

न चेत् तादृग्जीवसत्वात् नोपपद्येत तात्त्विकः[१]।

[२]सेधो द्रष्ट्रन्तरादीनां तस्मात् सर्वं तदात्मकम् ।।८६ ।।

१. अनौपचारिकः. २. निषेधः. 'नान्योऽतोऽस्ती'ति श्रुताविति शेषः.

यदि ऐसा नहिं होता तो ऐसा जीव होनेके कारण देखनेवालेका तात्त्विक निषेध योग्य नहीं होता. अतः सभी कुछ ब्रह्मात्मक है. (८६)

सृष्टिकाले परिच्छेदो भेदोऽचित्त्वं विभक्तता।

अनुप्रवेशो नियमो न पूर्वापरकालयोः ।।८७।।

सृष्टिके स्थितिकालमें परिच्छेद, भेद, अचित्पना, विभाग, अनुप्रवेश तथा नियमन आदि होते हैं. सृष्टिसे पूर्वके तथा सृष्टिके अंतके बादके कालमें वे नहीं होते है. (अखंड कृष्ण ही स्थित रहते हैं.) (८७)

इदानीम् एवेदम् अत एकदेश्येव तन्मतम्।

[१]तदावरणभङ्गेऽपि दर्शिताऽस्यैकदेशिता ।।८८ ।।

१. 'यः सर्वत्र सन्तिष्ठन्' इति निबन्धश्लोकव्याख्यानव्याख्याने.

अतः रामानुजमत शुद्धाद्वैतका एकदेशीय मत है. तत्त्वार्थदीपनिबंधकी आवरणभंगटीकामें इस प्रकारकी एकदेशीयताका विचार किया गया है. (८८)

ननु सर्वमतान्येवं दूषयन् द्वेषकृद्भवान्।

इति चेद् न विनोदोऽयं विदुषां तत्त्वनिर्णये[१]।।८९ ।।

१. निर्णयनिमित्तम्.

यदि कोई हमें ऐसा कहे कि 'इस प्रकार आप सभी मतोंमें दोष दिखा रहे है, इसलिए द्वेषी हो', ऐसा यदि आप कहते हो तो नहिं. तत्त्वका निर्णय करनेवाले विद्वानोंका तो यह विनोद है. (८९)

भक्तिज्ञाने यत्र विष्णोः यत्र वेदः परा प्रमा।

मतानि तानि सर्वाणि जीवोद्धारस्य हेतवः ।।९० ।।

जहां विष्णुकी भक्ति तथा ज्ञान है, जहां वेद परम प्रमाण है, ऐसे सभी मत जीवोंके उद्धारके कारण हैं. (९०)

सत्त्वादिभेदतो जीवाः चित्रप्रकृतयोऽखिलान्।

उद्धर्तुं प्रभुणा नाना सम्प्रदायाः प्रकाशिताः ।।९१ ।।

सत्त्वादि भेदोंसे जीव चित्र-विचित्र प्रकारके हैं. उन सभीका उद्धार करनेके लिए प्रभुने अनेक संप्रदाय प्रकट किए हैं. (९१)

यथाधिकारं तेष्वेते[१] प्रवर्त्तन्ते ततः फलम्।

ऐहिकामुष्मिकं मोक्षो विविधश्च यथायथम् ।।९२ ।।

१. सम्प्रदायेषु.

सभी जीव अधिकारानुसार उन संप्रदायोंमें प्रवृत्ति करते हैं, तथा उन्हीं

संप्रदायोंसे लोक तथा परलोक संबंधी फलोंको प्राप्त भी करते हैं. विविध प्रकारके मोक्ष भी आवश्यकतानुसार प्राप्त होते हैं. (९२)

ब्रह्मण्यलौकिकेऽचिन्त्ये स्वाभिन्नानन्तशक्तिनि।

तद्रूपस्य[१] व्यवस्थानम् अभेदात् श्रुतिषूदितम्।।९३।।

१. तदभिन्नस्य ब्रह्मात्मकस्य इति अर्थः.

अलौकिक, अचिंत्य, अपनेसे अभिन्न अनेक शक्तियोंवाले ब्रह्मके विषयमें अभिन्न-ब्रह्मात्मक जगतकी अभेदात्मक व्यवस्था श्रुतिवाक्योंमें कही गई है. (९३)

वितरति यत् स्वयम् अगुणं विविधेभ्यः कामना नाना।

सगुणैः शिवादिरूपैः[१] तदंशिभूतं भजे परंब्रह्म।।९४।।

१. तेन अग्रिमे प्रकरणे गुणावतारादिदेवानां स्वरूपादि वक्ष्यत इत्यपि सूचितम्.

निर्गुण ब्रह्म जो सगुण शिव आदि रूपोंमें अनेक स्वरूपों द्वारा अनेक प्रकारकी कामनाओंको पूर्ण करते हैं, ऐसे अंशीरूप परब्रह्मका मैं आश्रय करता हुं. (९४)

इति श्रीमद्वल्लभाचार्य्यमतवर्त्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज श्रीगोवर्द्धनशीघ्रकवेः कृतौ वेदान्तचिन्तामणौ विशिष्टाद्वैतविचारो नाम एकादशं प्रकरणम्।।११।।

d

अथ शैवशाक्तमतविचारो नाम
द्वादशं प्रकरणम्

लीलायै शिवशक्त्याद्याः कृता येन विभूतयः ।
नैर्गुण्यहेतुं भक्तानां नमामो निर्गुणं परम् ।।१ ।।

जिन्होनें लीलार्थ शिव-शक्ति आदि विभूतियोंको प्रकट किया है तथा जो भक्तोंकी निर्गुणताके हेतु हैं, ऐसे निर्गुण ब्रह्मको नमस्कार. (१)

शैवा[१] रामानुजमततस्कराः सर्ववाङ्मयम् ।
योजयित्वा[२] शिवपरं विशिष्टाद्वैतमैरयन् ।।२ ।।

१.नीलकण्ठादयः स्मार्ता द्विधा प्रसिद्धा दाक्षिणात्यलोके. शैवस्मार्ताः भागवतस्मार्ताश्च. तत्र भस्मत्रिपुण्ड्रधारिणो अद्वैतसिद्धान्ताभिमानिन आद्याः. द्वितीयाः तु ऊर्ध्वपुण्ड्रादिधारिणो अद्वैतिनः. अत्रोक्ताः शैवास्तु पाशुपता ज्ञेयाः. २. ब्रह्मसूत्र-भाष्य शिवतत्त्वविवेकलिङ्गार्चनचन्द्रिकादिषु.

रामानुजमतको अपना कहनेवाले पाशुपत शैवोंने संपूर्ण साहित्य शिवपरक दिखाकर 'विशिष्टाद्वैत' मत कहा है. (२)

निर्गुणं स्यात् परब्रह्म श्रुतेः निर्गुणमुक्तिकृत्[१] ।
शम्भोस्तःमप्रधानस्य ब्रह्मत्त्वं न तथोचितम्[२] ।।३ ।।

१. श्रुतितः. २. विभूतित्वेन चरमकोटिकं ब्रह्मत्वं सूचितम् एव इति भावः.

श्रौतशास्त्रानुसार निर्गुण परब्रह्म निर्गुण मुक्ति देनेवाले है. ऐसा ब्रह्मत्व तमःप्रधान शंभुमें होना योग्य नहीं है. (३)

निर्गुणः स्यात् परशिवो व्यूहादिस्थो गुणीति चेत् ।
न, सूतसंहितादौ वः सगुणः सोऽपि कथ्यते ।।४ ।।

परशिव निर्गुण हैं तथा व्यूह आदिमें रहे हुए शिव सगुण हैं. यदि ऐसा हो तो नहिं. सूतसंहिता आदिमें परशिव सगुण भी कहे गए हैं. (४)

''उमार्द्धविग्रहः[१] श्रीमान् सोमार्द्धकृतशेखरः ।
ब्रह्मविष्णुमहेशानैः उपास्यः परमेश्वरः ।।५ ।।
ऋतं[२] सत्यं परब्रह्म पुरुषं साम्बम् ईश्वरम्'' ।
अष्टमे नवमेऽध्याये तन्मतोपक्रमात् स्फुटम् ।।६ ।।

१. अष्टमाध्यायस्थम् इदम्. २. नवमाध्यायस्थम् इदम्.

'आधे देहमें उमा है, मस्तकमें अर्ध चंद्र है तथा ब्रह्मा, विष्णु जिनकी उपासना कते हैं, ऐसे परमेश्वर ऋत, सत्य, परब्रह्मरूप पुरुष सांब इश्वरको' – आठवें तथा नवमें अध्यायमें किये गए शैवमतके उपक्रमसे यह स्पष्ट है. (५–६)

महेशानोपास्यलिङ्गाद् वाक्ये परशिवः स्फुटः।
साहित्यात् सर्वदा शक्तेः सगुणत्वं दृढीकृतम् ।।७ ।।

'उन परमेश्वरकी उपासना महादेव करते हैं' ऐसा कहा गया होनेसे इस वाक्यमें निरूपण परशिव का ही है. शक्तिके साहित्यमें शक्तिकी सगुणता द्रढतापूर्वक निरूपित हुई है. (७)

शक्तेः परस्वरूपेऽपि तद्रहस्ये[१] निरूपितम्[२]।
''सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी'' ।।८ ।।

१. तान्त्रिको अयं रहस्यभागः सप्तशतीपाठोत्तरं पठ्यमानः. २. त्रिगुणात्मकत्वम् उक्तम्.

शक्तिके पररूप होनेपर भी 'दुर्गासप्तशती'के रहस्यमें शक्तिकी त्रिगुणता कही गइ है. 'सभीके आरंभमें रही हुई परमेश्वरी महालक्ष्मी त्रिगुणात्मक है.' (८)

''शिवः[१] शक्तियुक्तः शश्वत्त्रिलिङ्गो गुणसंवृतः।
वैकारिकः तैजसश्च तामसश्चेत्यहं त्रिधा ।।९ ।।
ततो विकारा अभवन् षोडशामीषु[२] कञ्चन।
उपाधावन् विभूतीनां[३] सर्वासाम् अश्नुते फलम् ।।१० ।।
हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः।
स सर्वदृग् उपद्रष्टा तं भजन् निर्गुणो भवेत्'' ।।११ ।।

१. भाग.१०।८८।३ २. महाभूतेन्द्रियमनांसि. ३. दिग्वातार्कादितदाधिदैविकरूपविभूतीनां मध्य इत्यर्थः.

मैं शक्तिके साथ रहा हुआ, हमेंशा तीन लिंगोवाला, गुणोंसे लिप्त वैकारिक तैजस तथा तामस, ऐसे तीन प्रकारका हुं. फिर इन तीनोंमें महाभूत, इंद्रिय, मन तथा सोलह विकार हुए. विभूतिओंमेंसे प्रत्येक एककी ओर गति करनेवाला सभी विभूतियोंके फलका भोग करता है. भगवान हरि निर्गुण और

प्रकृतिसे पर पुरुष है. वे सभीके द्रष्टा तथा उपद्रष्टा हैं. उनका आश्रय करनेवाला जीव निर्गुणता प्राप्त करता है. (९-१०-११)

श्रीमद्भागवतेऽप्युक्तं सगुणत्वं शिवस्य तु।
'वैष्णवानां[i] यथा शंभुः' भक्तः परशिवः परम् ।।१२।।
व्यूहवर्ती तु संहारशक्तिकार्ये निरूपितः।
तत् पाद्मब्रह्मवैवर्तपञ्चरात्रादिवाक्यतः ।।१३।।
अनेकैः वेदभागैश्च मयान्यत्र प्रपञ्चितम्।
कृष्ण एव परंब्रह्म सदानन्दस्तथा श्रुतिः ।।१४।।

श्रीमद्भागवतमें भी शिवको सगुण कहा गया है. 'वैष्णवोंमें जैसे शम्भु हैं' (भाग.पु.१२।१३।१९) वाक्यानुसार परशिव भक्त हैं. व्यूहमें स्थित शिवको संहारकी शक्तिके कार्यरूप कहे गए हैं. इसी तथ्यको पद्मपुराण, ब्रह्मवैवर्तपुराण, पंचरात्र आदिके वाक्योंसे तथा वेदके अनेक वचनों द्वारा मैनें अन्य स्थानोंमें सिद्ध किया है. श्रुतिवाक्य कहते हैं कि कृष्ण ही परब्रह्म हैं तथा सदानंद है. (१२-१३-१४)

''कृषिर्भूवाचकः[ii] शब्दो णश्च निर्वृतिवाचकः।
द्वयोः ऐक्यं परं ब्रह्म 'कृष्ण' इत्यभिधीयते'' ।।१५।।

'कृष्' धातुका अर्थ सत्ता है, 'ण'का अर्थ आनंद है. इन दोनोंकी एकतावाले परब्रह्म श्रीकृष्ण कहे गए हैं. (१. तापनीयस्था)(१५)

शिवादिरूपैः सगुणैः कामान् पूरयति प्रभुः।
स्वयन्तु निर्गुणो देवो भक्तानां निर्गुणत्वकृत् ।।१६।।

शिव आदि सगुणरूपों द्वारा भगवान (जीवोंकी लौकिक-पारलौकिक) इच्छाओंको पूरी करते हैं; स्वयं निर्गुण देव हैं तथा भक्तोंको निर्गुण करनेवाले हैं. (१६)

[iii]यस्याङ्घ्रि पंकजरजोऽखिललोकपालैः
मौल्युत्तमैः धृतम् उपाससततीर्थतीर्थम्।
ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः
श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ।।१७।।

तीर्थोंके तीर्थरूप उपास्य, जिनके चरणकमलोंकी रजको सभी

लोकपालोंने श्रेष्ठ मुकुटोंसे धारण किया है, ब्रह्म तथा मैं महादेव भी तथा लक्ष्मी जिनकी कलाकी कलाको लंबे समयसे धारण किये हुए है, उन्हें राजाके आसनकी क्या अपेक्षा है! (भाग.पु.१०।६८।३७)(१७)

'त्वामेवान्ये[१] शिवोक्तेन मार्गेण शिवरूपिणम्'।
श्रीमद्भागवतेऽस्येति भगवद्रूपता मता ।।१८।।

'अन्यलोग शिव द्वारा प्रतिपादित मार्ग अनुसार शिवरूप आपकी उपासना करते है', इस भागवतके वचनमें भी शिवको भगवद्रूप कहा गया है. (भाग.पु.१०।४०।८)(१८)

'येऽप्यन्यदेवता भक्ता' इति गीतासु चोदितम्।
पाद्मे कार्त्तिक माहात्म्ये प्रथमाध्याय ईर्यते ।।१९।।
'सौराः[१] शैवाश्च गाणेशा वैष्णवाः शक्तिपूजकाः।
मामेव प्राप्नुवन्तीह वर्षाम्भः सागरं यथा ।।२०।।
एकोऽहं पञ्चधा जातः क्रीडया नामभिः किल।
देवदत्तो यथा कश्चित् पुत्राद्याह्वाननामभिः''।।२१।।

'जो अन्य देवोंके भक्त हैं...वे भी मुझे ही प्राप्त करते है' ऐसा गीताजीमें भी कहा है. पद्मपुराणमें कार्तिकमहात्म्यमें कहा हैः ''वर्षाका जल जैसे समुद्रमें मिल जाता है, उसी प्रकार सूर्योपासक, शिवोपासक, गणेशोपासक, वैष्णव तथा शक्तिपूजक मुझे ही प्राप्त करते हैं. कोई एक बालक पुत्रादि भिन्न-भिन्न नामोंको प्राप्त करता है, ऐसे में रमणके लिए नामभेदसे पांच प्रकारका हुआ हुं''(१.पद्मपुरा.श्लोक २६ - २७). (१९-२१)

इत्थं भगवता प्रोक्ता शिवादीनां निजांशता।
शिवादिरूपं शैवाद्या भजन्तः प्राप्नुवन्ति [१]तम्।।२२।।

१. क्रमेण भगवन्तम् एव प्राप्नुवन्ति इति अर्थः.

इस प्रकार भगवानने शिव आदि देवताओंको अपना अंश कहा है. शिव तथा अन्य देवताओंका आश्रय करनेवाले भी अंततः उन्हीं भगवानको प्राप्त करते है. (२२)

विष्णुः सत्वगुणोपाधिः तद्भक्ता इह[१] वैष्णवाः।
[२]शम्भोरुपासनं चक्र[३] आसुरान् मोहयन् क्वचित् ।।२३।।

१. 'सौरा' इत्यादिपाद्मवाक्ये. इह वैष्णवा अपि सौरादीनां साहचर्याद् गुणावतारविष्णोः उपासकाएव ग्राह्या नतु पुरुषोत्तमसेवकाः. २. ननु रामाद्यवतारेषु विष्णोः शिवभक्तिकरणात् सेव्यसेवकभावविपर्ययएव कुतो न? इति आशङ्क्य आह **शंभोः** इति. तेन श्रीकृष्णचन्द्राभ्युदयादौ शंकरलालकविः तट्टीकाकृद् हाथीभाईशर्मा च द्वावपि तथाविधपुराणादिवाक्यानां तात्पर्यान् अवबोधिनावपि परास्तौ इति ज्ञेयम्. ३. भगवान् कृतवान् इति अर्थः.

[१]उत्तरोत्तरसर्गार्थं, तत्पाद्मे स्पष्टम् उच्यते।
विष्णोर्नामसहस्त्रे तु शिवेन गिरिजां प्रति ।।२४।।

१. पूर्वान्वयि. यदि भगवान् स्वस्य सर्वोत्कृष्टत्वं सर्वान् प्रति अविशेषं दर्शयेत् सर्वेऽपि मुक्ताः स्युः. सृष्टिः अवरुद्धा भवेत् तत्सृष्टिवृद्ध्यर्थं तथा करोति इत्यर्थः.

विष्णु सत्त्वगुणवाले हैं. उनके भक्त वैष्णव है. प्रभुने भविष्यकी सृष्टि करनेके हेतुसे आसुरोंको मोह करते हुए कभी शंभुकी उपासना की थी, यह बात पद्मपुराणमें कही गई है. (२३-२४)

प्रोच्यते पञ्चरात्रे च यत् स्वस्मै हरिणोदितम्।
"[१]त्वामाराध्य तथा शम्भो ग्रहीष्यामि वरं सदा ।।२५।।

१. शिवेन पार्वती प्रति विष्णुसहस्त्रनाम्न्युक्तं तदेव अक्षरशः नारद-पञ्चरात्रेपि उपलभ्यते तत्र उभयत्र इदं भगवदनुवादरूपं शिववचनम् अस्ति.

विष्णुसहस्त्रनाममें शिवजीने पार्वतीजीके प्रति तथा पंचरात्रमें हरिने अपने लिए कहा हैः 'हें शंभु! आपका आराधन करके में हंमेशा वरदान प्राप्त करुंगा.' (२५)

[१]स्वागमैः कल्पितैः त्वं च जनान् मद् विमुखान् कुरु।
मां च गोपय येन स्यात् सृष्टिः एषोत्तरोत्तरा" ।।२६।।

१. शैवादिशास्त्रैः.

'आपके द्वारा प्रकट किये गए आगमशास्त्रों द्वारा मनुष्योंको मुझसे विमुख करो तथा मुझे छुपा दो, जिससे कि यह सृष्टि उत्तरोत्तर चलती रहे.' (२६)

खण्डितः पण्डितकरभिन्दिपाले प्रहस्ततः।
भाष्यप्रकाशे तद्वादो विस्तरात् पुरुषोत्तमैः ।।२७।।

श्रीपुरुषोत्तमजीने 'पंडितकरभिंदिपाल' तथा 'प्रहस्तवाद'में तथा 'अणुभाष्य'के प्रकाशमें उक्तवादका विस्तारपूर्वक खंडन किया है. (२७)

शाक्ता जगद् उपादानं जल्पन्त्यल्पश्रुता हरिम्।
कल्पयन्ति निमित्तं च शक्तिं तां परतः पराम् ।।२८।।
देवीसूक्तादिना श्रुत्या मार्कण्डेयादिषूदितम्[1]।
विशेषतश्च तन्त्रेषु तत्स्वरूपं[2] निरूप्यते ।।२९।।

१. पुराणभागेषुः. २. शक्तिस्वरूपम्.

थोडी विद्वत्तावाले शाक्तोंने हरिको जगतके उपादान तथा परात्पर शक्तिको निमित्तकारण कहा है. ऋग्वेदीय देवीसूक्त वगेरेमें तथा 'परास्य शक्तिः' इस श्रुतिवाक्यके अनुसार 'मार्कंडेयपुराण' आदिमें इस विषयका निरूपण किया गया है तथा विशेषरूपसे तांत्रिक ग्रंथोंमें शक्तिके स्वरूपका निरूपण किया गया है. (२८-२९)

तां परां कारणं प्राह सप्तशत्यां स्तुवन्विधिः।
''परापराणां परमा त्वमेव परमेश्वरी ।।३०।।
त्वयैतद् वार्यते विश्वं त्वयैतत् सृज्यते जगत्।
त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा'' ।।३१।।

स्तुति करते हुए ब्रह्माजीने 'सप्तशती'में पराशक्तिको कारणरूपा कही हैः 'हे देवी!, आप परसे परकी भी परम परमेश्वरी हो. इस विश्वको आपने धारण किया है, उत्पन्न कर रही हो तथा पालन भी कर रही हो तथा अंततः सर्वदा आप ही इसे लीन भी करेंगी.' (३०-३१)

इति चेत् श्रूयतां मूढ शक्तयो ब्रह्मणस्तु याः।
तदभिन्नाश्च तद्रूपाः, श्रुत्या[1] पूर्वं निरूपितम्[2]।।३२।।

१. 'परास्य शक्ति'रित्यादिरूपया. २. इति इति शेषः.

यदि यह तर्क दिया जाए तो कहते हैं कि ब्रह्मकी जो शक्तियां है वे ब्रह्मसे अभिन्न तथा ब्रह्मरूप है. उपनिषद्वाक्यानुसार इस तथ्यका निरूपण पूर्वमें किया गया है. (३२)

गुणात्मकम् अचिद् रूपं[1] प्रकृतिः सृष्टिकालिकम्।
शक्तिप्रकृत्योः दुर्गा तु विभूतिः कार्यमिष्यते ।।३३।।

१. सत्वादिरूपम्.

सृष्टि करनेके समयका गुणात्मक अचित्रूप वह प्रकृतिशक्ति तथा प्रकृतिका कार्य वह विभूतिरूप दुर्गा है. (३३)

[१]रत्यै बिभित्सुनासर्वाः तिरोभाव्यापि तेन ताः।
तदंशाः स्वविभूतिभ्यो दत्ताः केचन केचन ।।३४।।

१. रमणार्थं भेदं चिकीर्षुणेति यावत्. तेन ब्राह्मणा ताः सर्वा अपि स्वालौकिकशक्तीः कार्येषु तिरोभाव्यापि तदंशाः शतांशाः केचन केचन स्वविभूतिभ्यो दुर्गादिभ्यो दत्ता इति अन्वयार्थौ.

रमणार्थ भेद प्रकट करनेकी इच्छावाले प्रभुने इन सभी शक्तियोंका तिरोभाव करके शक्तिओंके कुछ अंश विभूतियोंको प्रदान किए. (३४)

आदायामरशक्तीनाम् अंशान् सा[१] निर्मिता पुरा।
महिषासुरनाशायेत्यस्याः तच्छक्तिकार्यता ।।३५।।

१. दुर्गा.

अमर शक्तियोंके अंशोंको लेकर महिषासुरका विनाश करनेके लिए उन शक्तियोंका सृजन किया गया. अतः वह प्रभुकी शक्तिका कार्य है. (३५)

मुख्यत्वेन गुणाश्चाशाः त्रिगुणोपाधिधारिणाम्।
[१]त्रयाणाम् आगता[२] तत्रेत्यस्याः प्रकृतिकार्यता ।।३६।।

१. गुणावताराणां ब्रह्मविष्णुमहेश्वराणाम्. २. दुर्गायाम् आगता इत्यर्थः.

मुख्यतया तीन गुण–सत्व, रजस् तथा तमस्की उपाधिको धारण करके ब्रह्मा–विष्णु तथा महेशके अशक्य गुण शक्तिमें आ गए; ऐसे वह शक्ति प्रकृतिका कार्य है. (३६)

कार्याणि कार्यरूपायां शक्तीनां प्रकृतेः अपि।
ततोऽस्याम् उपचर्यन्ते माहात्म्यख्यातये क्वचित् ।।३७।।

कभी महात्म्य प्रकट करनेके हेतुसे शक्ति तथा प्रकृतिके कार्योंके कार्यरूपोंका इस शक्तिमें उपचार किया जाता है. (३७)

उक्तं द्वितीयेऽध्याये तत् सप्तशत्याः समाहितः[१]।
प्रथमाध्यायवृत्तान्तः तट्टीकायां मया पुनः ।।३८।।

१. इदम् उत्तरेण अन्वेति.

यही बात 'सप्तशती'के दूसरे अध्यायमें कही गई है तथा उस ग्रंथकी टीकाके पहले अध्यायके वृत्तांतमें मैनें समाधान भी कर दिया है. (३८)

देवीसूक्ते[१] स्वमाहात्म्यं[२] देव्यैवोक्त्वा ततो मम।
योनिरप्स्वन्तःसमुद्र इत्युक्ता हरिकार्यता ।।३९ ।।

१. ऋग्वेदप्रसिद्धे. २. ''अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः'' इत्यादिना देव्यैव स्वमाहात्म्यं (ब्रह्मरुद्रोत्पादकत्वादिरूपम्) उक्त्वा ततः ''मम योनिः अन्तःसमुद्रे अप्सु'' इति स्वस्य हरिकार्यता उक्तेन अन्वयार्थौ.

देवीने ऋग्वेदीय देवीसूक्तमें अपना महात्म्य बताया है 'मम योनि' अर्थात् मेरा जन्म समुद्रके जलसे हुआ है' इस वाक्य द्वारा वह हरिकी कार्यरूप है, ऐसा कहा है. (३९)

तस्मात् सृज्यतया नैव घटतेऽस्या निमित्तता।
शक्तिमत् पारतन्त्र्यं च शक्तित्वाद् बहुधोदितम् ।।४० ।।

अतः वह स्वयं सृज्य होनेसे जगतका निमित्तकारण नहीं बन सकती है. शक्तिरूप होनेके कारण वह शक्तिमान प्रभुसे परतंत्र है ऐसा अनेक स्थानोंमें कहा गया है. (४०)

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः।
महामाया हरेश्चैषा तया सम्मोह्यते जगत्'' ।।४१ ।।

इसमें कुछ आश्चर्य करने जैसा नहीं है कि जगतके पति श्रीहरिकी योगनिद्रा ही महामाया है तथा उस माया द्वारा जगतको मोहित किया जाता है. (४१)

इत्युक्तं प्रथमाध्याये, तथा नारायणीस्तवे।
''या देवी सर्वभूतेषु विष्णुमायेति शब्दिता'' ।।४२ ।।

इस प्रकार 'सप्तशती'के पहले अध्यायमें कहा गया है ऐसे ही नारायणी स्तवमें 'या देवी...' सभी भूतप्राणीओमें रही हुई देवीको ही विष्णुकी माया कहा गया है. (४२)

परत्वं तत्र शक्तित्वाभिप्रायेण निरूपितम्।
त्वयेति करणं [१]ज्ञेयं, शक्तेर्नो कर्तृतोचिता ।।४३ ।।

१. 'त्वया एतद् धार्यते' इत्यादिवाक्ये.

स्वयं शक्ति है ऐसा कहनेके आशयसे ही 'त्वया एतद् धार्यते' आदि वचनोंमें पररूपता शक्तिकी कही गइ है; वह साधन है. शक्ति कर्ता है, यह कथन उचित नहीं है. (४३)

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।

तथा संहृतिरूपान्ते जगतोऽस्य [१]जगन्मये।।४४।।

१. सप्तम्यन्तम्.

'सृष्टि जब नहीं होती है, ऐसी स्थितिमें जगतकी सृष्टिरूपा, पालनमें स्थितिरूपा तथा अंतमें संहाररूपा तु ही है'. (४४)

जगन्मये भगवती त्रिधा शक्तिस्तु या स्थिता।

तद्रूपा त्वम् इति स्तुत्या त्वयेति करणं ध्रुवम्।।४५।।

'जगद्रूपमें भगवानकी जो तीन शक्तियां रही हुई हैं, उन रूपोंमें तु ही है.' इन वचनों द्वारा स्तुतिके रूपमें 'त्वया एतद् धार्यते' आदि शब्दोंसे निश्चित ही साधनरूपताका निरूपण किया गया है. (४५)

समवायि निमित्तं च ब्रह्मैव श्रुतिसम्मतम्।

विभूतीनां च माहात्म्यं ब्रह्ममाहात्म्यबोधकम्।।४६।।

ब्रह्म ही जगतके उपादान और निमित्त कारण हैं यह सिद्धांत वेदसम्मत है. विभूतियोंकी महत्ता भी ब्रह्मके ही महात्म्यका बोध करवाती है. (४६)

राज्ञः स्तुतावमात्यादिप्रशंसा पर्यवस्यति।

स्तुतः क्वचित् पुराणेषु तत्तद्रूपः ततो हरिः।।४७।।

राजाकी स्तुतिमें प्रधानोंकी स्तुतिका भी समावेश हो ही जाता है. कभी कभी पुराणोंमें उन-उन विभूतियोंके रूपमें प्रभुकी स्तुति भी की जाती है. (४७)

''आकाशात् पतितं तोयं यथा गच्छति सागरम्।

सर्वदेवनमस्कारः केशवं प्रति गच्छति'' ।।४८।।

आकाशसे बरसा हुआ पानी जैसे सागरकी ओर जाता है, उसी प्रकार सभी देवोंको किया हुआ नमस्कार भगवान केशवके प्रति जाता है. (४८)

''ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्'' ।

इत्यादौ [१]फलदः पूज्यः तत्तदंशी स एव हि।।४९।।

१. 'मयैव विहितान्हितान्' इत्यादि भगवद् उक्तेः.

'जो जो भक्त, जिस जिस प्रकारसे मेरी शरणमें आते हैं, उनका भजन मैं उसी प्रकार करता हुं.' इन वाक्योंके अनुसार फल देनेवाले, पूज्य तथा सभी जीवोंके अंशी भगवान ही हैं. (४९)

पूर्वोक्तपाद्मवाक्येऽपि[१] स्फुटा भगवदंशता।
तन्त्रशास्त्राण्ययुक्तानि मोहनाय कृतानि यत् ।।५०।।

१. 'शैवाः सौरा'इतिवाक्ये.

पद्मपुराणमें 'शैवाः सौराः...', इस उपरोक्त वचनमें भगवानके ये सभी अंश हैं, यह स्पष्टतया कहा गया है. तंत्रशास्त्र तो अयुक्त हैं तथा मात्र मोह करनेके लिए उनकी रचना हुई है. (५०)

अतस्तदनुसारेण मद्यं मांसं च मैथुनम्।
मन्वाना उत्तमं कौलाद्यायान्ति यमयातनाः ।।५१।।

अतः ऐसे तंत्रशास्त्रोंका अनुसरण करके मद्य, मांस तथा मैथुनको उत्तम माननेवाले कौल आदि मार्गी यमयातना ही प्राप्त करते हैं. (५१)

तत् शाक्तकिरणे तन्त्रकिरणेऽन्यत्र दुर्मतम्।
दुर्गापाठविवृत्यादौ विस्तराद् दूषितं मया ।।५२।।

मेरी ओरसे 'शाक्तकिरण', 'तंत्रकिरण' तथा 'दुर्गापाठ'की टीकाओंमें भी उन असिद्ध मतोंके दोष सविस्तार दिखाए गए हैं. (५२)

तस्मात् तदद्वयं ब्रह्म लीलायै भावितद्वयम्।
विमोहशास्त्रसम्भ्रान्तैः अशक्यं ज्ञातुम् आसुरैः ।।५३।।

लीलार्थ, उन दों स्वरूपोंमें प्रकट ब्रह्मको इसीलिए ऐसे विमोहात्मक शास्त्रोंसे संभ्रांत हुए आसुरी प्रकृतिवाले जीव जान नहीं पाते हैं. (५३)

दैवा भजन्तु तत् स्वाचार्योक्तभक्त्या परात्परम्।
सदानन्दं वेदरीत्या न भ्रमन्तु च मोहकैः ।।५४।।

जो दैवी जीव हैं, वे अपने आचार्य द्वारा कही गइ भक्तिसे, वेदकी रीतिसे परात्पर सदानंदका आश्रय करके रहो तथा मोहक शास्त्रों द्वारा भ्रमित न हो. (५४)

[१]रूपेऽक्षरे[२] पदे[३] योऽध्यात्म्ये क्रीडति सदा स्वरूपेण।
[४]अधिभूताक्षरकर्त्ता पुरुषोत्तमम् आधिदैविकं वन्दे ।।५५।।

१. स्वरूपतभूत इत्यर्थः. २. अक्षराख्ये. ३. स्वधाम्नि. ४. तेन अग्रिमप्रकरण आध्यात्मिकादि भगवत्स्वरूपत्रयविचारो वर्तत इत्यपि सूच्यते.

स्वरूपात्मक अक्षरब्रह्मात्मक आध्यात्मिक निजधाममें हमेंशा जो अधिभूत–क्षरके कर्ता अपने स्वरूपमें क्रीडा कर रहे हैं, ऐसे आधिदैविक पुरुषोत्तमको में वंदन करता हुं. (५५)

इति श्रीमद्वल्लभाचार्यमतवर्ति श्रीब्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज श्रीगोवर्द्धनशीघ्रकविविरचिते वेदान्तचिन्तामणौ शैवशाक्तमतविचारो नाम द्वादशं प्रकरणम् ।।

d

अथ शुद्धाद्वैतविशेषविचारो नाम त्रयोदशं प्रकरणम्

[1]बल्लवीवल्लभो नाना[2] धामन्यक्षरनामनि ।
कलयंल्ललिता लीलाः सदा[3] सस्ताद् अनुग्रही ।।१ ।।

१. श्रीगोपीप्रियः. २. विविधाः. इदं लीलाविशेषणम्. ३. सद् इतिपृथक्पदम्. किं वा दासैः सहित इति समस्तम्. तत्र 'खपरे शरीति' विसर्गलोपः.

अक्षर नामक निजधाममें सदा अनेक ललित लीलाओंको करते हुए गोपांगनाओंके प्रिय प्रभु अनुग्रह करनेवाले हों. (१)

अधिदैवादिभेदेन ब्रह्मणोऽस्ति त्रिरूपता ।
क्षरोऽक्षर इति द्वेधा तथाऽद्यः पुरुषोत्तमः ।।२।।

अधिदेव, अध्यात्म तथा अधिभूत ऐसे भेदोंसे ब्रह्मके तीन रूप हैं. उनमें पहले अधिदेव पुरुषोत्तम है, अक्षर अध्यात्म है तथा क्षर अधिभूत है. (२)

पूर्णानन्दमयाकारः[1] सर्वाकारानुभावनः ।
सच्चिदानन्दरूपोऽसत् पदार्थास्पृष्टविग्रहः ।।३ ।।
अलौकिकीभिः स्वाभिन्नाभिर्नित्यानन्तशक्तिभिः ।
स्वाभाविकीभिरपराहतकार्याभिराश्रितः ।।४ ।।
विरुद्धसर्वधर्माणाम् एकाधारोऽविरोधतः ।
अप्राकृताखिलगुणो निर्गुणोऽविकृतो[2] विभुः ।।५ ।।
नित्यः पूर्णोऽव्ययो व्याप्त एक एकरसः सदा ।
ज्ञेयः कृष्णः परंब्रह्म [3]प्रमासु पुरुषोत्तमः ।।६ ।।

१. पूर्णत्वं गणनाशून्यत्वम् आनन्दे. २. सत्वादिगुणत्रयरहितः. ३. वेदादि-प्रमाणेषु इत्यर्थः.

प्रभु पूर्णानंद आकारवाले, सभी आकारोंका अनुभव करनेवाले, सत्-चित्-आनंदरूप, जिनके देहको असत् पदार्थोंका स्पर्श नहीं है ऐसे, अलौकिक, अपनेसे अभिन्न स्वाभाविक, जिनके कार्य किसी अन्यके द्वारा खंडित नहीं हुए हैं ऐसी अनंत शक्तियां जिनका आश्रय करके स्थित हैं, अविरोधेन सभी विरुद्ध धर्मोंके आश्रयरूप, अप्राकृत गुणोंसे पूर्ण, निर्गुण, अविकारी, समर्थ, नित्य,

पूर्ण, अव्ययय, व्याप्त, एकरूप, हंमेशा एकरस परब्रह्म पुरुषोत्तम कृष्णका वेदादि प्रमाणों द्वारा ज्ञान प्राप्त करना है. (३-६)

अन्यत्[१] तस्याक्षरं[२] रूपं सच्चिदानन्दमात्रकम्।

तद्रूपं गणितानन्दं[३] पूर्णानन्दो हरिः स्वयम्॥७॥

१. पुरुषोत्तमस्य. २. अक्षराख्यम्. ३. शारीरादि सर्वसुखोपेतचक्रवर्त्यानन्दापेक्षया सहस्रगुणितपरार्धगुणानन्दम्.

दूसरा सत्-चित्-आनंदरूप उनका अक्षर रूप है, उनका वह गणितानंदवाला रूप है, जबकि हरि स्वयं पूर्ण आनंदवाले (अगणितानंद) हैं. (७)

'सैषानन्दस्य मीमांसा भवती'त्यादिना श्रुतौ[१]।

विध्या[२]नन्दात् शतगुणोऽक्षरानन्दो हि गण्यते॥८॥

१. तैतिरीयब्रह्मवल्ल्याम्. २. प्राजापत्यानन्दात्.

'सैषानन्दस्य मीमांसा...' इत्यादि सन्दर्भोके द्वारा ब्रह्माके आनंदसे शतगुणित आनंद अक्षरका आनंद गिना गया है. (८)

आनन्दमात्रकरपादमुखोदरता हरेः[१]।

[२]तदा नन्दमयोऽभ्यासाद् इति सूत्रे समर्थितम्॥९॥

१. पुरुषोत्तमस्य. २. वाग्विषयगणनाराहित्यम्. तेन ''यतो वाचो निवर्तन्ते'' इति तत्रस्थश्रुत्यर्थः सूचितो भवति.

भगवानके हस्त, चरण, मुख, उदर आदि आनंदमय है. यह बात 'आनंदमयो अभ्यासात्' (ब्रह्म.सू.१।१।११) पुनः-पुनः वर्णन होनेसे प्रभु आनंदाकार हैं' इस सूत्रमें बलपूर्वक निरूपित हुई है. (९)

अन्ये तु भगवद् धर्माः सर्वे तत्र[१] हरीच्छया।

आविर्भावतिरोभावशालिनः क्रीडनास्पदे॥१०॥

१. अक्षरे. अयम् आशयः, श्रीकृष्ण-पुरुषोत्तमादिनामवाच्यस्य परब्रह्मणः 'एको अहं बहुस्यां' 'हन्त तिरोसानी'त्यादिश्रुतेः बहिःक्रीडनेच्छायां तिरोहितधर्मरूपानन्दमिव सच्चिदानन्दात्मकं किञ्चिद् रूपान्तरम् आविर्भवति तदेव प्रथमं कार्यमपि सर्वकारणकारणम्. कार्यत्वं च अत्र सर्वभवनसामर्थ्यरूपमायावेष्टितत्वरूपरूपान्तरग्रहणमेव न विकारित्वम्. सर्वकारणकारणरूप-परमाहात्म्यरूपत्वादेव 'ब्रह्म

पुच्छं प्रतिष्ठा' इत्यादिश्रुतिषु प्रतिष्ठेत्युक्तम्.

क्रीडाके स्थानरूप उन अक्षरब्रह्ममें आविर्भाव तथा तिरोभाव प्रकारके भेदसे सभी भगवद्धर्म प्रभुकी इच्छासे हुए हैं. (१०)

व्याप्तोऽक्षरः स्वयं व्याप्तो व्याप्तिः दुग्धाम्बुवद्द्वयोः।
उभे अपि यथैकस्मिन् कलशे व्याप्य तिष्ठतः ।।११।।

यथेक्षुरसयोः [१]सर्पिः दध्नोश्च तिलतैलयोः।
अलोको व्यापिवैकुण्ठः क्वचिद् गोलोक[२] इत्यपि[३] ।।१२।।

१. अत्र ''तिलेषु तैलं दधनीव सर्पिः'' इत्यादिश्रुतिरपि अनुसन्धेया. २. ''पश्यतां सर्वलोकानाम् अलोकं समपद्यत''. ३. बृहद्वामनपञ्चरात्रादिषु.

अक्षरब्रह्म व्यापक हैं, प्रभु स्वयं भी व्यापक हैं. दोनोंकी यह व्यापकता दूध और जलकी तरह है; दूध तथा जल जैसे एक ही पात्रमें व्याप्त है, जैसे गन्नेका रस, घी और दहीं, तिल और तेल आदिकी व्याप्ति होती है, उसी प्रकार उन दोनोंकी व्याप्ति है. अक्षरको अलोक, व्यापि वैकुण्ठ, कहीं गोलोक भी कहा गया है. (११-१२)

तदेव परम[१] व्योम परं धाम परं पदम्।
अक्षरं बृहदव्यक्तं[२] पर्यायैः परिकीर्त्यते[३] ।।१३।।

१. अक्षरब्रह्मैव. २. ''तदक्षरे परमे व्योमन्'' ''ऋचो अक्षरे परमे व्योमन्'' ''परमे व्योमन् प्रतिष्ठिता'' इत्यादि श्रुतिषु. ३. ''अव्यक्तो अक्षर इत्युक्त'' इति गीतादौ.

उन्हीं अक्षरब्रह्मको परम व्योम, परम धाम, परम पद, बृहत् तथा अव्यक्त आदि पर्यायवाची शब्दोंसे कहा जाता है. (१३)

परमात्मा[१] परं ब्रह्मेत्यादिभिः पुरुषोत्तमः।
[२]बहु स्फुटीकृतं वेदादौ[३] तद्रूपं तथा स्मृतिः[४] ।।१४।।

१. 'तयोः ऐक्यं परंब्रह्म' 'उत्तमःपुरुषस्त्वन्यः परमात्मेत्युदाहृतः' 'ब्रह्मेति परमात्मेति' इत्यादिश्रुतिस्मृतिपुराणेषु. २. पर्यायैः इतिशेषः. ३. मुण्डकाद्युपनिषत्सु. ४. श्रीगीतावाक्यम्.

परमात्मा, परब्रह्म आदि पर्यायवाची शब्दोंसे पुरुषोत्तमका विधान किया जाता है. वेदमें प्रभुके उस स्वरूपका निरूपण स्पष्टतापूर्वक किया गया है.

स्मृति(गीता)में भी– (१४)

''अव्यक्तोऽक्षर इत्युक्तः तमाहुः परमां गतिम्।

यद् गत्वा न निवर्तन्ते तद्धाम परमं मम'' ।।१५।।

अव्यक्तको अक्षर कहा है. उन्हें परम गति कहा गया है; जहां पहोंचकर लौटना नहीं पडता है, वह मेरा परम धाम है. (१५)

''पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया''।

इत्युक्तो भक्त्यैकलभ्योऽग्रे परः पुरुषोत्तमः ।।१६।।

हे अर्जुन! उन परपुरुषको मात्र अनन्य भक्ति द्वारा प्राप्त किया जात सकता है. इसी प्रकार पुरूषोत्तमकी भक्त्यैकलभ्यता का निरूपण भी किया गया है. (१६)

तदास्थाय निजं[१] धामेच्छानुरूपविधायकम्।

लीला नित्याः स्वयं शुद्धा अनिरुद्धा दधाति सः[२] ।।१७।।

१. अक्षरम्. २. पुरुषोत्तमः

इच्छानुसार स्वरूप धारण करनेवाले उन अक्षररूप निजधाममें बिराजकर प्रभु स्वयं किसीके द्वारा रोकी न जा सके ऐसी शुद्ध नित्यलीलाओंका स्वीकार करते हैं. (१७)

अनागन्तुकधर्मत्वात् तल्लीलास्वखिलास्वपि।

न शुद्धाद्वैतबाधः स्याद् अभेदाद् धर्मधर्मिणोः ।।१८।।

उनमें आगंतुक धर्म नहीं हैं. अतः उन सभी लीलाओंमें धर्म तथा धर्मीकी अभिन्नता होनेके कारण शुद्धाद्वैतका कहीं भी बाध नहीं होता है. (१८)

ननु चेद् अक्षरं नित्यं नित्यश्च पुरुषोत्तमः।

भेदः स्याद् वास्तवो द्वैतं न चेद् न्यूनोऽक्षरः कथम् ।।१९।।

इति चेद् न, हरिर्यत्र[१] प्रियमोदप्रमोदवान्।

आनन्दात्मा पक्षिरूपः तैत्तिरीयेषु[२] पठ्यते ।।२०।।

ब्रह्मपुच्छं प्रतिष्ठेति पुच्छं तत्राक्षरं श्रुतम्।

न पुच्छं पक्षितो भिन्नं नाक्षरं पुरुषोत्तमात् ।।२१।।

१. आनन्दब्रह्मवल्ल्याम्. २. ''अन्योन्तर आत्मा आनन्दमयः. तस्य प्रियमेव शिरः'' इत्यादिश्रुतौ.

शंका= अक्षरब्रह्म नित्य हैं तथा पुरुषोत्तम भी नित्य हैं, तो वस्तुतः भेद तो रहेगा ही. आप कहोगे कि द्वैत नहीं है, तो फिर अक्षरमें न्यूनता क्यों?

समाधान= यदि ऐसा कहते हो तो योग्य नहीं है. वहां प्रभु प्रिय आनंद और आनंदवाले हैं. तैत्तरीय उपनिषदमें उन आनंदात्माको पक्षीरूप कहा गया है. 'ब्रह्म पुच्छं प्रतिष्ठा(तै.२।५)– ब्रह्म पुच्छ है, प्रतिष्ठा है', – यहां अक्षर को पुच्छ कहा है. पूंछ किसी पक्षीसे भिन्न नहीं होती है, उसी प्रकार अक्षरब्रह्म पुरुषोत्तमसे भिन्न नहीं है. (१९–२०–२१)

सर्वावयववान् पक्षी स्वतन्त्रः पुच्छतोऽधिकः।
पुच्छन्त्वयवत्वेन न्यूनं भेदो न वस्तुतः ।।२२।।

सभी अंगोंवाला पक्षी स्वतंत्र है तथा पूंछसे अधिक है. पूंछ तो उसका एक अंग होनेसे उतना न्यून है; वस्तुतः तो दोनोंमें कोई भेद नहीं है. (२२)

अल्पधर्मकम् एकांशभूतं न्यूनं तथाक्षरम्।
सर्वधर्माश्रयः सोऽस्माद् अंशिभूतोऽधिकः श्रुतः ।।२३।।

इस प्रकार न्यून धर्मवाला, एक अंशरूपसे स्थित अक्षर न्यून है. सभी धर्मोंके आश्रयरूप रहे हुए अंशीरूप भगवान इस अक्षरसे अधिक हैं. (२३)

न भेदो भगवत् सच्चिदानन्दात्माक्षरोऽपि यत्।
पुच्छं पक्षिपदार्थाद् न विभक्तमिह तत् तथा ।।२४।।

अक्षरब्रह्म भगवानके सत्–चित्–आनंदरूप है. पूंछ जैसे पक्षीरूप पदार्थसे भिन्न नहीं है, उसी प्रकार अक्षरब्रह्म पुरुषोत्तमसे भिन्न नहीं है. (२४)

अतोऽक्षरस्य चरणत्वम् अपि [१]क्वचिद् उच्यते।
प्रतिष्ठेति पदात् तस्य प्रोक्तैवोत्तमधामता ।।२५।।

१. ''हृदोपगुह्याऽर्हपदं पदे पदे'' २।२।१८ इति श्रीभागवतादौ.

इसीलिए भागवत आदिमें अक्षरको चरणरूप भी कहा गया है. तैतिरीय उपनिषदमें 'पुच्छं प्रतिष्ठा' – इस वाक्यमें प्रतिष्ठा शब्दसे अक्षर उत्तमधाम है, ऐसा भी कहा गया है. (२५)

स्वाभिन्न एकांशभूते सच्चिदानन्दधामनि।
आत्मतन्त्रः सर्वधर्मा सर्वदा रमते विभुः ।।२६।।

अपनेसे अभिन्न ऐसे एक अंशरूप, सत्–चित्–आनंदके धामरूप

अक्षरब्रह्ममें स्वायत्त-सत्ताधारी सर्वधर्मवाले भगवान हंमेशा क्रीडा करते हैं. (२६)

[१]नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम्।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ।।२७।।

यादवोंमें श्रेष्ठ, कुयोगियोंके लिए जिनका स्थान अति दूर है ऐसे आप भगवानको पुनः पुनः नमस्कार हो. जिनसे समानता तथा अतिशयता, दोनों दूर जा चुकी है ऐसे तेज द्वारा अपने धामरूप अक्षरब्रह्ममें रमण करते आपको नमस्कार. (१.भाग.पु. २।४।१४). (२७)

यदा बही रिरंसुः स्यात् स्वरूपाद् अक्षरात्मकात्।
तिरोभावेन धर्माणां प्रपञ्चं सृजति क्षरम् ।।२८।।

जब अक्षरब्रह्मरूप स्वरूपसे बाहर क्रीडा करनेकी इच्छा होती है तब धर्म-लक्षणोंका आविर्भाव करके क्षरस्वरूप जगतका प्रभु सृजन करते हैं. (२८)

नन्वक्षरम् उपादानं निमित्तं पुरुषोत्तमः।
तदाभिन्ननिमित्तोपादानवादः कथं भवेत् ।।२९।।

शंका: अक्षरब्रह्म उपादान-समवायीकारण है तथा पुरुषोत्तम निमित्त कारण है, तो फिर उपादान तथा निमित्तकारण अभिन्न है, ऐसा (अभिन्न निमित्तोपादान-कारणतावाद) वाद कैसे हो सकता है? (२९)

एवं चेत् शृणु चेद् हेमकूटात् तत्पिण्ड उद्धृतः।
सृज्येत कटकाद्यस्मान्न[१] कूटः[२] समवायि किम् ।।३०।।

१. सुवर्णपिण्डात्. २. सुवर्णशैलः तद्राशिर्वा. स हि कटकादेः समवायि भवत्येव.

समाधान= यदि ऐसा कहते हो, तो सुनो - सोनेके बडे टुकडेमेंसे छोटा टुकडा पृथक् करके यदि उससे चूडी बनाइ जाती हो, तो क्या बडा सोनेका टुकडा उसका उपादान कारण नहीं रह जाएगा? (३०)

ऊर्णनाभिः सृजन् जालं लालया स्वांशभूतया।
लीलयाश्नन्न किं [१]तस्योपादानं स भविष्यति ।।३१।।

१. जालस्य. एवंच ऊर्णनाभिवत् परंब्रह्म लीलावद् अक्षरो जालवत् प्रपञ्चः.

अपनी अंशरूप लारसे मकडी जाल बुनती है तथा क्रीडाकी ही तरह

उसे पुनः निगल भी जाती है. तो उस जालेका उपादान कारण क्या मकडी नहीं है? (३१)

उपक्रम्याक्षरं ब्रह्म मुण्डकेष्वाद्यमुण्डके।
'तद्भूतयोनिं परिपश्यन्ति धीरा' इतीर्यते ।।३२।।

मुंडकोपनिषदके पहले मुंडकमें 'तदक्षरधिगम्यते' अक्षरब्रह्मकी प्राप्ति होती है उसी प्रकार' इस वचनसे अक्षरब्रह्मके निरूपणका उपक्रम करके 'तद्भूतयोनिं...' सभी भूतोंकी योनिरूप वह अक्षरब्रह्मका दर्शन करता है', इत्यादिसे अक्षरको सबकी उत्पत्ति, स्थिति तथा लयका स्थान कहा है. (३२)

''तथाक्षरात् सम्भवतीह विश्व''मिति चोच्यते।
तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ।।३३।।

वहां 'तथाक्षरात्...' उस अक्षरसे विश्व प्रकट होता है', ऐसा भी कहा गया है. 'तथाऽक्षराद्विविधाः...' जैसे अच्छी तरह प्रकटी हुइ अग्निसे समान रूपसे तिनके निकलते हैं, उसी प्रकार अक्षरब्रह्ममेंसे दोनों प्रकारके भाव प्रकट होते हैं तथा उन्हींमें समाहित हो जाते हैं.' (३३)

द्वितीयमुण्डकेऽप्युक्तं तस्मात्[१] सर्वं परात्मकम्।
अतः 'पुरुषएवेदं विश्वं' तत्रैव[२] पठ्यते ।।३४।।

१. अक्षरस्य पुरुषोत्तमाभिन्नत्वेन प्रपञ्चे पुरुषोत्तमोपादानकत्वानपायात्. २. द्वितीयमुण्डकप्रथमखण्डसमाप्तौ.

इसी तरह द्वितीय मुण्डकमें कहा गया है; इसीलिए सब कुछ परब्रह्मात्मक है. इसीलिए वहीं 'पुरुष एवेद गुं सर्वम्' यह विश्व पुरुषोत्तमात्मक है' ऐसा कहा गया है. (३४)

'तदाहुरक्षरं ब्रह्म सर्वकारणकारणम्[१]।
विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः' ।।३५।।

१. सर्वस्य जगतः कारणानां पञ्चमहाभूतादीनां कारणम् इति अर्थः.

सभी कारणोंके कारणरूप उन अक्षरब्रह्मको साक्षात् महात्मा विष्णु-व्यापक पुरुषोत्तमका धाम कहते हैं. (३५)

तृतीयस्कन्ध एकादशाध्याय इति, कारणम्।
तदेव जगतो[१] धामस्य[२] चोक्तं हरिणा[३] तथा ।।३६।।

१. 'कारणम्' इतिपदेन अन्वेति. २. गीतायाम् इति शेषः. ३. पुरुषोत्तमेन

तृतीय स्कंधके ११वे अध्यायमें उन अक्षरब्रह्मको ही जगतके कारण तथा उन्हें ही प्रभुके धामरूप कहे गए हैं. गीतामें भी प्रभुने – (३६)

[१]''अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत!।
अव्यक्तनिधनान्येव तत्र का परिदेवना ।।३७ ।।
अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके' ।।३८ ।।

१. ''अव्यक्तो अक्षर इत्युक्तः'' इति भगवद्वाक्याद् अक्षरो ग्राह्यो नतु प्रधानम्.

पंचमहाभूत आरंभमें अव्यक्त थे. मध्यावस्थामें व्यक्त होते है, अंतमें अव्यक्तमें लीन हो जाते हैं. तब कैसी चिंता? सृष्टिके आरंभमें अव्यक्तमेंसे सभी प्रकट होते है, प्रलयके समय उन्हीं अव्यक्तमें लीन हो जाते हैं. (३७–३८)

तस्माद् विश्वं क्षरम् इदम् आविर्भावितम् अक्षरात्।
क्षरणन्तु तिरोभावः क्षरत्यन्ते[१] ततः[२] क्षरम् ।।३९ ।।

१. लये. २. क्षरणाद् हेतोः.

यह क्षर जगत उन अक्षरब्रह्मसे ही आविर्भूत हुआ है. 'क्षरण' अर्थात् तिरोभाव. अंतमें तिरोहित होता होनेसे ही विश्व 'क्षर' कहलाता है. (३९)

न धाम्नोऽस्ति तिरोभावः कदाचिद् इति सोऽक्षरः।
एतावतीतः पुरुषोत्तमो गीतासु रूपितः ।।४० ।।

कभी भी भगवद्धाम का तिरोधान नहीं होता है. अतः उसे 'अक्षर' कहा जाता है. इन क्षर तथा अक्षरसे पर पुरुषोत्तम गीताजीमें निरूपितत हैं. (४०)

''द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।४१।।
उत्तमः पुरुषस्त्वन्यः[१] परमात्मेत्युदाहृतः।
यो लोकत्रयम् आविश्य बिभर्त्यव्यय ईश्वरः ।।४२ ।।
यस्मात् क्षरम् अतीतोऽहम् अक्षराद् अपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः[२] पुरुषोत्तमः'' ।।४३ ।।

१. ऐच्छिकादेव भेदाद् भिन्नः. २. क्षरातीतत्वेन लोके पातञ्जलदर्शनादौ

प्रसिद्धः. अक्षराद् उत्तमत्वेन तु 'अक्षरात्परतः पर' इति श्रुतौ प्रसिद्धः.

इस लोकमें दो पुरुष हैं; (१)क्षर तथा (२)अक्षर. सभी पंचमहाभूतात्मक पदार्थोंको क्षर कहा जाता है तथा कूटस्थ अक्षर कहलाता है. उत्तम पुरुष तो कोई अन्य ही है. मैं क्षर से पर तथा अक्षरसे उत्तम हुं, इसीलिए लोक तथा वेदमें पुरुषोत्तमके नामसे जाना जाता हुं. (४१-४२-४३)

क्षराक्षरौ तौ पुरुषौ ताभ्याम् एष यदुत्तमः ।
लोके वेदे क्रमात् तस्मात् 'पुरुषोत्तम' उच्यते ।।४४ ।।

क्षर तथा अक्षर, ऐसे दो पुरुषोंसे उत्तम होनेके कारण (श्रीकृष्ण) क्रमसे लोक तथा वेदमें पुरुषोत्तम कहे गए हैं. (४४)

'न तस्य[१] कालावयवैः परिणामादयो गुणाः ।
अनाद्यनन्तमव्यक्तं नित्यं कारणम् अव्ययम् ।।४५ ।।

कालके अंगरूप होनेसे परिणाम आदि गुण प्रभुमें नहीं है. वे अनादि, अनंत, अव्यक्त, नित्य कारणरूप अव्यय है(भाग.पु.१२।४।१८). (४५)

न यत्र वाचो न मनो न सत्वं तमो रजो वा महदादयोऽमी ।
न प्राणबुद्धीन्द्रियदेवता वा न सन्निवेशः खलु लोक[१]कल्पः।।४६ ।।

१. अक्षरस्य हि द्वेधा स्फूर्तिः भवति. भक्तानां पुरुषोत्तमधामत्वेन शुद्धाद्वैतज्ञानिनां च निर्धर्मज्ञानत्वेन. तत्र एतदुत्तरश्लोके ज्ञानिस्फूर्तिप्राप्तः तिरोभूतसर्वधर्माक्षरो वर्ण्यते. अस्मिंश्च भगवद्धामरूपो अक्षरो वर्ण्यते. अतएव 'लोककल्प' इति पदम्. तेन अप्राकृतिकः सन्निवेशस्तु तत्र अस्त्वेव इति सूच्यते. तथाच अयम् अर्थः अस्य यद्धामवर्णननिमित्तं मनो वाचश्च न साहसं कर्तुं शक्नुवन्ति तत् त्रिगुणात्मकं च नास्ति. तत्रत्यदेहादिषु महत्तत्वप्राणादयो लौकिका न सन्ति. न च तत् शिखरप्राकारभित्तिकुट्टिमादीनां लोककल्पः सन्निवेशः इति. अतएव सप्तमे युधिष्ठिरेण पृष्टम्. ''देहेन्द्रियासु हीनानां वैकुण्ठपुरवासिनाम्. देहसम्बन्धसम्बद्धम् एतद् आख्यातुम् अर्हसि''. अत्र अप्राकृतदेहादिमत्त्वम्.

न स्वप्न जाग्रन्न च तत् सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ।
संसुप्तवत् शून्यवद् अप्रतर्क्यं तन्मूलभूतं पदमामनन्ति ।।४७ ।।

जहां वाणी, मन, सत्व, रजस्, तमस्, महदादि, प्राण, बुद्धि, इंद्रियोंके देवता आदि जैसा विस्तार नहीं है, वह स्वप्न नहीं है, जगता नहीं है, सुषुप्त नहीं है, आकाश नहीं है, अथवा जल, पृथ्वी, पवन, अग्नि या सूर्य नहीं है, ऐसा शून्य

जैसा, तर्कातीत तथा मूलभूत पद होना शास्त्रमें कहा गया है. (४६-४७)

इति भागवते स्कन्धे द्वादशे वर्ण्यतेऽक्षरम्।

तदेव परमं धाम गीतासु बहुरूपितम्॥४८॥

इस प्रकार श्रीभागवतके १२वे स्कंधमें अक्षरब्रह्मका वर्णन करते हुए कहा गया है. इसी परमधामका निरूपण गीतामें भी किया गया है. (४८)

''यद् अक्षरं वेदविदो वदन्ति विशन्ति यद् यतयो वीतरागाः।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये''॥४९॥

वेदवेत्ता जिन्हें अक्षर कहते हैं, जिनमें रागरहित यतियोंका प्रवेश होता है, जिन्हें प्राप्त करनेकी इच्छा करते हुए ब्रह्मचर्यका आचरण करते हैं, ऐसा पद मैं तुझे संक्षेपमें कहूंगा. (४९)

इत्यादिनाह प्रणवाभिधेयं स्वपदं हरिः।

यदक्षरं तदेवैतत् कठवल्लीषु पठ्यते॥५०॥

इन वाक्योंसे भगवानने ॐकाररूप निजस्थान कहा है, जो अक्षरब्रह्म है. उसके विषयमें भी कठोपनिषद(१।२।१५) में कहा गया है. (५०)

''सर्वे वेदा यत् [१]पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति[२]॥

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते[३] पदं[४] संग्रहेण ब्रवीम्योमित्येतत्[५]''॥५१॥

१. पदं पदनीयं प्राप्यम् इति यावत्. २. यद्-यत्प्राप्त्यर्थानि. तपांसि इत्यर्थः. ३. तुभ्यं नचिकेतसे. ४. भगवद्धाम. ५. भगवद्धाम्नः प्रणववाच्यत्वं भागवतद्वादश-स्कन्धेऽपि ''स्वधाम्नो ब्रह्मणः साक्षाद् वाचकः परमात्मनः'' इति.

सभी वेद जिस पदका निरूपण करते हैं, सभी तप जिनके बारेमें कहते हैं, जिनकी इच्छा करते हुए ब्रह्मचर्यका आचरण करते हैं, ऐसे पद को मैं तुम्हें संक्षेपमें कहूंगा - वह ॐकाररूप है. (५१)

[१]एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम्[२]।

एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥५२॥

एतदालम्बनं[३] श्रेष्ठम् एतदालम्बनं परम्।

एतदालम्बनं ज्ञात्वा [४]ब्रह्मलोके महीयते॥५३॥

१. ॐकारवाच्यम्. २. क्षरजगदपेक्षया श्रेष्ठम्. ३. भगवदालयः. ४. भगवत् तत्वज्ञजनेषु. यद्वा ब्रह्माख्ये लोके. किंवा परब्रह्मणो लोके.

इति वल्ल्यां द्वितीयस्यां तृतीयस्या च भण्यते।

'यः सेतुरीजानानाम् अक्षरं ब्रह्म यत् परम्' ।।५४।।

यह ॐकार ही अक्षरब्रह्म है तथा वही पररूप है. इसी अक्षरका ज्ञान प्राप्त करके जो उनकी इच्छा करता है, उसे वे मिलते हैं. यही श्रेष्ठ आधार है, यही परम आधार है. इस आधारको जानकर ही ब्रह्मलोकमें महत्ता प्राप्त होती है. (कठ.१-२-१६-१७) ऐसा कठोपनिषदकी द्वितीय वल्लीमें कहा गया है. तृतीय वल्लीमें भी 'यः सेतुरीजाना...' अर्थात् जो यज्ञ करनेवालोंका सेतुरूप पर ऐसा अक्षरब्रह्म है.' (५२-५३-५४)

इत्यक्षरं निरूप्याऽस्य प्राप्त्यप्राप्त्योश्च [१]कारणे।

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।।५५।।

१. विज्ञानाऽविज्ञानादिरूपे.

इस प्रकार अक्षरब्रह्मका निरूपण करके उनकी प्राप्ति तथा अप्राप्तिका कारण बताते हुए 'सोऽध्वनः...' अर्थात् विज्ञान जिनका सारथी है, मन जिनकी लगाम है, ऐसा पुरुष मार्गको पार कर लेता है, वही विष्णुका परम पद-धाम है.' कहा गया है. (५५)

इत्यन्तेनोदिते[१] तस्माद् उत्तमोऽग्रे परः श्रुतः।

महतः परम् अव्यक्तम् अव्यक्तात्[२] पुरुषः परः ।।५६।।

पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।

इति श्रुत्युदितो देवो गीतासु बहुवर्णितः ।।५७।।

१. कथिते. २. अक्षरात्.

ऐसा कहकर उनसे भी उत्तम पुरुषके विषयमें कहा गया है:-'महतः...' अर्थात् महत् तत्त्वसे पर अव्यक्त है, अव्यक्तसे पुरुष पर है. पुरुषसे पर कुछ भी नहीं है. वह अंतिम कोटि है, वही परम गति है.' इस प्रकार उपनिषद द्वारा वर्णित देवका गीताजीमें वर्णन किया गया है. (५६-५७)

मुण्डकोपनिषद् उक्त्वाक्षरं[१] प्रोक्तः परः पुमान् ।।५८।।

१. 'अक्षरात्परतः पर' इत्यादौ. यत्तु प्रधानम् अक्षरवाच्यं वदन्ति केचित् तद् न, 'अक्षरमम्बरान्तधृते'रिति सूत्रे सूत्रकारेण तन्मतस्य निरस्तत्वात्.

मुंडकोपनिषदमें भी अक्षरका निरूपण करके उनसे पुरुषोत्तम पर है,

ऐसा कहा गया है. (५८)

''पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया''।

''दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याऽभ्यन्तरो ह्यजः।

अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः[1] परः''॥५९॥

१. क्षरात् परस्मात्.

'हे अर्जुन! उन परम पुरुषको अनन्य भक्ति द्वारा प्राप्त किया जा सकता है.'(गीता) 'हे दिव्य, मूर्तिविहीन पुरुष! जिनके बाहर तथा अंदर है ऐसा, अजन्मा, अप्राण, मनरहित, उज्ज्वल ऐसे उन अक्षरब्रह्मसे भी वे पर हैं. (मुंडक-२।२) (५९)

इत्यादिना विविच्योक्तौ स्पष्टं तत्र[1] पराक्षरौ।

एकस्यैवैच्छिकाद् भेदात् शुद्धाद्वैतं च दर्शितम्॥६०॥

इस प्रकार स्पष्टतापूर्वक वहां परब्रह्म और अक्षरब्रह्मके विषयमें कहा गया है. ऐच्छिक भेदके कारण उन एकका ही शुद्धाद्वैत वहां दिखाया गया है(मुण्डके). (६०)

पराक्षरविवेकोऽयं कार्यादेः तारतम्यतः।

कठमुण्डकमाण्डूक्यबृहदारण्यकादिषुः॥६१॥

छान्दोग्यकौषीतकीशावास्यतित्तिरिषु स्फुटः।

आम्नायते तैत्तिरीये प्रश्ने नारायणाभिधे॥६२॥

कठ-मुंडक-मांडूक्य-बृहदारण्यक-छांदोग्य-कौषीतकी-ईशावास्य-तैत्तिरीय आदि उपनिषदोंमें प्रकट कार्योंके तरतमभावका निरूपण करते हुए परब्रह्म तथा अक्षरब्रह्मका विवेक स्पष्ट किया गया है, जिस विषयमें तैत्तिरीय उपनिषदमें स्पष्टरूपसे कहा गया है. नारायणोपनिषदमें भी -(६१-६२)

''स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्''।

[1]परंब्रह्म[2] परंधाम पवित्रं परमं भवान्।

पुरुषं[3] शाश्वतं दिव्यम् आदिदेवम् अजं विभुम्॥६३॥

१. पुरुषोत्तमम्. २. अक्षरं च...भवान् एव इत्यर्थः. ३. अन्तर्याम्यादिः.

परब्रह्म, परमधामरूप, परम पवित्र आप हो. आप पुरूषको सभी ऋषीगण देवता सभी सनातन दिव्य आदिदेव अजन्मा और विभु कहते हैं. (६३)

आहुस्त्वाम् ऋषयः सर्वे देवर्षिः नारदस्तथा।

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।

त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ।।६४।।

आप इस विश्वके परमस्थानरूप हो, आप अव्यय हो, सनातन धर्मके रक्षक हो, आपको में सनातन पुरुष मानता हुं. (६४)

तथा – त्वमक्षरं[१] सदसत् तत् परं यत्।

एवं वेदैरभेदोऽस्य[२] शुद्धः कृष्णेन कथ्यते।

स एवाक्षरसंज्ञोऽत एकांशे[३] प्रतिपादितः[४]।।६५।।

१. सदसत्, क्षरं, अक्षरं, तत्परं च त्वमेव इत्यर्थः. २. अक्षरस्य पुरुषोत्तमेन सह अभेद इत्यर्थः. ३. पुरुषोत्तमः. ४. विष्णुपुराणादौ.

उसी प्रकार 'सत् और असत् अक्षर आप हो, उनसे पर आप हो'. इस प्रकार वेदवाक्योंने जो अभेद कहा है, वह शुद्ध अभेद है, ऐसा भगवान श्रीकृष्णने कहा है. वे प्रभु अक्षर संज्ञाको प्राप्त हुए, वहां वे एक अंशके रूपमें रहे ऐसा निश्चय किया गया है. (६५)

तस्माद् एकोऽहमित्यादि नैव किञ्चन बाध्यते।

बहुत्वन्तु तिरोभावाद् इष्टं नासीत् पुरा हि तत्[१]।।६६।।

१. ननु भवतु तयोः द्वयोः ऐक्यं तथापि तु पुरुषोत्तमो अक्षरश्चेति भेदोऽपि स्वीकृतएव. तथा च भेदाभेदावेव, न शुद्धाद्वैतम्. तत्र आह 'बहुत्वं तु तिरोभावाद्' इत्यादि. तद् बहुत्वम्. अयम् आशयः. भेदो हि नामाऽन्योन्यस्मिन् अन्योन्याभावः. स्वरूपपरिवर्तनं वा. तदिह तयोः द्वयोरपि न वर्तते. द्वयोः सच्चिदानन्दरूपत्वात्. यत्पुनः बहुत्वं तत्तु किंचिद् आनन्दांशतिरोभावाद् इष्टमेव. ''एकोऽहं बहुस्यामिति'' श्रुतेः.

अतः 'एको अहं – मैं एक हुं', इन वचनोंका कोइ बाध नहीं होता है. तिरोभाव दशाके कारण पूर्वमें बहुत्व इष्ट नहीं था. (६६)

तत्राधिदैविकं[१] रूपं सदानन्दः[२] परः पुमान्।

अध्यात्मम् अक्षरं धाम प्रपञ्चस्त्वाधिभौतिकम्[३]।।६७।।

१. त्रिविधरूपेषु. २. कृष्णशब्दार्थं वक्तुं द्वयोः एव उक्तिः. ३. रूपविशेषणत्वात् नपुंस्त्वम्.

तीन रूपोंमें आधिदैविक रूप सदानंद परम पुरुष है, अध्यात्म रूप

अक्षरब्रह्म है तथा आधिभौतिक रूप जगत है. (६७)

रूपत्रयविवेकाय दृष्टान्तः सरितो[१] दिवः ।
श्रीमद् हुताशनाचार्यै मुक्तावल्यां निदर्शितः ।।६८।।

१. दिवः सरितो गङ्गायाः.

इन तीन रूपोंकी स्पष्टता करनेके लिए श्रीमहाप्रभुजीने 'सिद्धांत मुक्तावली' में गंगाजीका द्रष्टांत दिया है. (६८)

[१]प्रथमं वारि सामान्यं तथा तीर्थात्मकं परम्[२] ।
देव्याख्यं च तृतीयं[३] स्याद् अधिभूतादि तत्क्रमात् ।।६९।।

१. आधिभौतिकम्. २. आध्यात्मिकम्. ३. आधिदैविकम्.

प्रथम सामान्य जल, दूसरा तीर्थरूप तथा तीसरा देवीरूप. ये तीन क्रमशः आधिभौतिक, आध्यात्मिक तथा आधिदैविक रूप हैं. (६९)

वृष्ट्यातपेषु यद्वृद्धिक्षययुक् चोपयुज्यते ।
व्यवहारेषु सर्वेषु तद् भौतिकजलं मतम् ।।७०।।
[१]यच्च माहात्म्यसंयुक्तं स्नानस्पर्शादिकर्मसु ।
यद् विहारास्पदं देव्याः तद्रूपं[२] च निरूप्यते ।।७१।।
[३]यात्रिकैः पूज्यते देव्यभेदबुद्ध्या फलेप्सुभिः ।
मार्यादिकेन विधिना[४] यत्तेभ्यो भोगमोक्षदम् ।।७२।।
रूपं तीर्थात्मकं तस्याः तद् आध्यात्मिकम् उच्यते ।
तत्र[५] स्थिता मूर्त्तिमती देवी स्याद् आधिदैविकी ।।७३।।

१. सार्धद्वयपद्ययोः एकोऽन्वयः. २. देवीरूपम्. ३. यत्र तीर्थरूप इति शेषः. लोकशास्त्राभ्यां दृश्यते वर्ण्यते च. ४. निरतिशयप्रेमशून्येन तीर्थाङ्गपूजाप्रकारेण. ५. तीर्थे.

वर्षाऋतुमें तथा धूपमें जैसे क्रमशः जो घटता तथा बढता है तथा सभी व्यवहारोंमें जो उपयोगमें लिया जाता है, उसे भौतिक जल कहा गया है. जो स्नान, स्पर्श आदि कार्योंमें उपयोगमें आता है, ऐसा महात्म्यवाला देवीके विहारके स्थानरूप आध्यात्मिक स्वरूप है. यात्रीजन फलकी इच्छासे देवीसे अभेद बुद्धि रखकर मर्यादामार्गकी विधिसे जिनका पूजन करते हैं तथा जो उन्हें भोग तथा मोक्ष देनेवाला है, ऐसा तीर्थात्मक रूप है, उसमें जो देवी साक्षात् रहती

है, वह मूर्तिमान स्वरूप आधिदैविक है. (७०-७१-७२-७३)

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां कलशजलहस्तां मौक्तिकैर्भूषितांगीम् ।
अभयवरदपाणिं सेन्दुकोटीरजूटां वसितसितदुकूलां जाह्नवी तां नमामि ।।७४ ।।

श्वेत मगरमच्छके उपर आसीन, उज्ज्वल वर्णवाले, तीन नेत्रोंवाले, जिनके हस्तमें कलश तथा शंख हैं ऐसे, मोतियोंसे जिनके अंगको सुसज्जित किया गया है ऐसे, जिनका हस्त अभय तथा वरदान दे रहा है, मस्तकके उपर चंद्र सहित केश बंधे हुए हैं तथा जिन्होंने सफेद वस्त्र धारण किये हैं, ऐसे गंगाजीको में नमन करता हुं. (७४)

[१]शरच्चन्द्रश्वेतां शशिशकलश्वेतालमुकुटां[२]
करैः कुम्भाम्भोजे वरभयनिरासौ च दधतीम् ।
सुधाधाराकाराभरणवसनां शुभ्रमकर-
स्थितां त्वां ये ध्यायन्त्युदयति न तेषां परिभवः ।७५।

१. गङ्गालहर्याम्. २. छन्दोभङ्गभिया 'शोभाले'ति परिष्कार्यम्.

शरदऋतुके चंद्रके समान उज्ज्वल, चंद्रकी रेखा के समान सफेद मुकुटवाले, हस्तोंसे कुंभ तथा कमल तथा वरदान और अभयमुद्रा धारण किये हुए, अमृतकी धाराके समान उज्ज्वल अलंकार तथा वस्त्रवाले, श्वेत मगरमच्छके उपर आसीन ऐसे आप गंगाजीका जो ध्यान करते हैं, उनकी कभी भी हार नहीं होती है. (७५)

इत्याद्युक्तस्वरूपा या क्वचिद्भक्त्यैव[१] दृश्यते ।
सुलभा नाखिलानां सा इतिफलं तीर्थरूपतः ।।७६ ।।

१. प्रवाहविशेष एव.

इन सभी श्लोकोंमें निरूपित स्वरूपवाली देवीके भक्तिसे दर्शन होते हैं. परंतु ऐसे दर्शन सभीको सुलभ नहीं हैं. जो भी फल होता है वह तीर्थरूपसे होता है. (७६)

आविर्भावी तिरोभावी शोकमोहादिषूदितः ।
षड्भाववान् प्रपञ्चस्तु रूपं स्याद् आधिभौतिकम् ।।७७ ।।

आविर्भाव-तिरोभावयुक्त, शोक मोह आदि ६ विकारोंवाला जो प्रपंच-जगतरूप है, वह आधिभौतिक रूप है. (७७)

यो गीतबहुमाहात्म्यः सकामैः मोक्षकामुकैः ।

सेव्यमानश्च फलदो धामाध्यात्मिकम् अक्षरः ।।७८ ।।

मोक्ष प्राप्त करनेकी इच्छासे सकाम भक्तोंने जिनके महात्म्यका बहुत गान किया है, जिनकी सेवा करनेसे फल देनेवाला होता है, ऐसा धामरूप अक्षरब्रह्म आध्यात्मिक रूप है. (७८)

पुरुषोत्तमानन्दाकारः स्याद् आधिदैविकः ।

भक्तिमात्रेण [१]लभ्यः स भोगमोक्षौ ततोऽक्षरात् ।।७९ ।।

१. ''भक्त्या लभ्यस्त्वनन्यये''त्यादिवाक्यैः.

आनंदाकार पुरुषोत्तम आधिदैविक हैं तथा उनकी प्राप्ति मात्र भक्ति द्वारा ही संभव है. भोग तथा मोक्ष अक्षरब्रह्मसे प्राप्त होते हैं. (७९)

श्रद्धालुः सलिलं तीर्थं पश्यन् कल्याणवान् भवेत् ।

तथाक्षरात्मकं पश्यन् विश्वं ज्ञानी विमुच्यते ।।८० ।।

श्रद्धावाला मनुष्य जलरूप तीर्थके दर्शन करके ही कल्याण प्राप्त करता है, उसी प्रकार ज्ञानी अक्षररूप विश्वके दर्शन करता हुआ ज्ञान तथा मोक्ष प्राप्त करता है. (८०)

परं पदं वैष्णवमामनन्ति तद्यन्नेति [१]नेतीत्यतदुत्सिसृक्षवः ।

विसृज्य दौरात्म्यम् अनन्यसौहृदा[२] [३]हृदोपगुह्यावसितं[४] समाहितैः ।।८१ ।।

१. तद् ब्रह्म ततो अन्यदतत्. २. अनन्यम् ऐकान्तिकं प्रेम येषां ते. ३. 'यो वेद निहितं गुहायाम्' इतिश्रुतेः अतुल्यार्थम् इदम्. ४. निश्चितम्. अवबद्धम् आत्मतया गृहीतं वा.

इति भागवते, विष्णुपुराणे प्रथमांशके ।

[१]''अक्षरात्मकमेतद्धी'त्युक्तम् अन्यत्र च स्फुटम् ।।८२ ।।

अन्य पदार्थोंका त्याग कर देनेकी इच्छावाले तथा अनन्य प्रेमवाले महर्षिगण दुरात्मताका त्याग करके, समाधिवाले पुरुषोंने आत्मरूपसे स्वीकृत पदका हृदयपूर्वक आलिंगन करके 'न इति' 'न इति' – ऐसा जिस पदके विषयमें कहते हैं.' इसी प्रकार भागवतमें और विष्णुपुराणके प्रथम अंशमें 'अक्षरात्मकमेतद्धि – यह अक्षरात्मक है', ऐसा जो कहा है, ऐसा अक्षरब्रह्मका स्वरूप अन्य शास्त्रवचनोंमें भी स्पष्ट है. (८१-८२)

अधिभूतादिभावोऽयम् इत्थं गीतासु रूप्यते।
अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।।८३।।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।
अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।।८४।।

इसी प्रकार अधिभूतादि भावोंके विषयमें गीताजीमें कहा गया है:– 'अक्षरको परमब्रह्म, स्वभावको अध्यात्म, पंच महाभूतोंका उद्भव करनेवाले विसर्गको कर्म, क्षर भावको अधिभूत तथा पुरुषको अधिदैवत कहा जाता है.' (८३–८४)

यो निर्गुणोऽपि निर्गुणधामाऽपि जगत् ससर्ज सगुणम् इदम्।
[१]बृहदात्मैक्यादगुणान्कुर्वाणो विजयते वरणसुलभः[२]।।८५।।

१. अक्षरब्रह्मणा सह जीवैक्यसम्पादनात्. २. भगवता जीवस्य स्वीयत्वेन अङ्गीकारो वरणम्. साधनान्तरालभ्यत्वोक्तिपूर्वकं 'यमेवैष वृणुते' इति वरणलभ्यत्व–श्रवणात्.

जिन्होंने स्वयं निर्गुण होनेपर भी, निर्गुणके धाम होने पर भी सगुण जगतका आविर्भाव किया, अक्षरब्रह्मके साथ जीवकी एकात्मकता करवानेपर वे निर्गुण कर्ता वरणकी क्रिया के द्वारा स्वयं अन्योंका चयन करनेसे प्राप्त करनेके लिए सुगम बनें हैं, ऐसे प्रभु विजयी हों. (८५)

इति श्रीमद्वल्लभाचार्यमतवर्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज
श्रीगोवर्द्धनशीघ्रकवेः कृतौ वेदान्तचिन्तामणौ
शुद्धाद्वैतविशेषविचारो नाम त्रयोदशं प्रकरणम् ।।१३।।

d

अथ प्रकृतिपुरुषदिग्दर्शनपूर्वकभगवद्धामोदाहरणं नाम चतुर्दशं प्रकरणम्

नमोऽस्तु [१]ज्ञानलभ्याय भक्त्येकसुलभाय[२] यः।
प्रकृतिं पुरुषं कृत्वा निर्माति सगुणं जगत् ।।१ ।।

१. ''अविज्ञातं विजानतां'' ''क्लिश्यन्ति ये केवलबोधलब्धये' इत्यादि श्रुतिपुराणवाक्यैः भक्ति रहितशुष्कज्ञानिभिः पुरुषोत्तमो न लभ्यः तेषाम् अक्षरएव लयः. २. ''भक्त्या अहम् एकया ग्राह्य'' इत्यादिवाक्यैः.

जो प्रकृति तथा पुरुषका सृजन करके सगुण जगतका निर्माण करते हैं, ज्ञान द्वारा प्राप्य तथा भक्तिसे सुलभ ऐसे भगवानको नमस्कार. (१)

सत्वं रजस्तम इति त्रिभिर्व्याप्तं जगद्गुणैः।
जीवाश्च त्रिविधा देवाः त्रयस्तत्तन्नियामकाः[१] ।।२ ।।

१. ब्रह्मविष्णुशिवाः.

सत्व, रजस् तथा तमस् इन तीन गुणोंसे जगत व्याप्त है तथा जीव भी उसी प्रकार तीन प्रकारके स्वभाववालें हैं तथा उनके नियामक देव भी तीन हैं. (२)

ननु स्याद् निर्गुणं ब्रह्म स्वयं धामात्मकं तथा।
ब्रह्माभिन्नो ब्रह्मकार्यः प्रपञ्चः सगुणः कुतः ।।३ ।।

शंका= परब्रह्म स्वयं निर्गुण हों तथा धामरूप अक्षरब्रह्म भी निर्गुण हों, तो ब्रह्मसे पृथक् तथा ब्रह्मके कार्यरूप प्रपंच सगुण कैसे? (३)

अत्रोच्यते गुणा मायाकार्या व्यामोहिका हि सा।
जीवानां तादृशीर्वृत्तीः आत्मकार्यैः करोति तैः[१] ।।४ ।।

१. गुणैः.

समाधान= यहां कहा जाता है कि गुण मायाके कार्यरूप हैं. वह माया व्यामोह करवानेवाली है. वह माया अपने द्वारा निर्मित गुणोंसे जीवोंकी ऐसी वृत्ति बनाती है. (४)

मायायां ते विलीयन्ते कार्यत्वात् प्रलये गुणाः।
शान्ताविरतकार्यत्वात् सुप्तवत् तत्र[१] तिष्ठति[२] ।।५ ।।

१. ब्रह्मणि. २. सा मायेति शेषः.

वे सभी गुण मायाके कार्यरूप होनेसे प्रलयके समय मायामें लीन हो जाते हैं. मायाका कार्य शांत तथा अविरत चलता रहता होनेसे वह ब्रह्मके भीतर सुषुप्त रहती है. (५)

सर्गम् इच्छति चेद् देवः पुरुषं कुरुतेऽक्षरात् ।
चिद्रूपं तर्ह्यचिद्रूपां जडां च प्रकृतिं पुनः ।।६ ।।

जब प्रभु सृष्टि प्रकट करनेकी इच्छा करते हैं, तब अक्षर ब्रह्ममेंसे चिद्रूप पुरुष तथा अचिद्रूप जड प्रकृतिका आविर्भाव करते हैं. (६)

श्रीमद् भागवते–

[१]"आसीद् ज्ञानम् अथो ह्यर्थ एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे।।७ ।।

१. अयं कृत्स्नोऽपि द्रष्टृदृश्यादिरूपः पदार्थः प्रपञ्च इति यावत्. आदौ सर्वतः पूर्वं युगेभ्यः पूर्वम्. किंवा यदा विवेकनिपुणा जना भवन्ति तदापि नामरूपादि-विकल्परहितम् एकं ज्ञानमेव आसीत्. अक्षररूपम् इत्यर्थः. तदेव अक्षरज्ञानं वाङ्मनसातीतं निर्विकल्पितमपि प्रकृतिपुरुषरूपेण केवलं (स्वरूपेणैव इत्यर्थः) द्विप्रकारकम् अभूत्. तेन मायायाअपि ब्रह्मात्मकत्वम् उक्तं भवति न तु मिथ्यात्वम्. तयोः एकतरः पदार्थः प्रकृतिः कार्यकारणमयी कथ्यते. अन्यश्च भागः पुरुष उच्यते.

तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ।।८।।
तयोः एकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते' ।।९।।

सृष्टिके आरंभमें युगोंसे भी पूर्व तथा जब विवेकमें निपुण प्रजा थी, तब भी नाम-रूप आदि विकल्प बिनाका एकमात्र अक्षररूप ज्ञान था तथा ऐसा ही अर्थ था. वही अक्षर ज्ञान, वाणी तथा मनसे अतीत और विकल्परहित था. तथापि मायाके कार्यरूप तथा पुरुषरूप- ऐसे दो रूपोंमें वह हो गया. उनमेंसे एक प्रकृति कार्यकारणमयी कही जाती है तथा ज्ञान वह दूसरा भाव है, जो पुरुष कहलाता है. (७-८-९)

इति भागवते प्राह तदेव भगवान् स्वयम् ।
तिरोहितचिदानन्दा सदंशात् प्रकृतिर्जडा ।।१० ।।

श्रीमद्भागवतमें इसी विषयका निरूपण भगवानने किया है. प्रकृतिमें चित् और आनंद तिरोहित हैं तथा सत् अंशमात्र है, अतः वह जड है. (१०)

''सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः''[१]।

'प्रकृतिर्गुणसाम्यं स्याद्'[२] इति भागवतोक्तितः ।।११।।

समग्राणां समानानां त्रिगुणानाम् अबाधतः ।

ऐक्यं तत् शक्तिमायात्मा जडा प्रकृतिरुच्यते ।।१२।।

१. श्रीभाग.११।२२।१२ २. श्रीभाग.पु.११।२२।१२

'सत्व, रजस् तथा तमस् ये प्रकृतिके गुण हैं, आत्माके नहीं.' 'प्रकृति गुणोंकी साम्यावस्था है' ऐसा भागवतमें कहा गया है. उपरोक्त कथनानुसार समान तथा उन तीनों गुणोके किसी भी प्रकारके व्यवधान बिनाकी एकतापन्न तथा प्रभुकी शक्ति मायाके स्वरूपवाली जड प्रकृति है. (११-१२)

''प्रकृतिर्ह्यस्योपादानम् आधारः पुरुषः परः ।

[१]सतोऽभिव्यञ्जकः कालो ब्रह्म [२]तत् त्रितयन्त्वहम्'' ।।१३।।

१. सतो नित्यस्यैव आविर्भावकः (पुरुषस्यैव अपरं रूपं) सृष्टिकालः. २. तत् त्रितयं कालप्रकृतिपुरुषाः त्रयोपि अहं ब्रह्म. भगवद्रूपाएव इत्यर्थः. तेन ब्रह्मणो जगदभिन्ननिमित्तोपादानता न हीनेतिभावः.

प्रकृति जगतकी उपादान है तथा पुरुष आधार है. उस सत्को स्पष्ट करनेवाला काल है. इन तीनों रूपोंमें मैं ब्रह्म ही हुं. (१३)

[१]तद्द्वाराविष्कृतं भूतादिकं[२] तत्सगुणं मतम् ।

ततो महद् अहं[३] तस्माद् इति सांख्ये क्रमः स्मृतः[४] ।।१४।।

१. प्रकृतिद्वारा. २. भूतादिकम्. देहेन्द्रियतन्मात्रादिकम् इत्यर्थः. आकाशादिकं च. ३. प्रकृतेः महत्तत्वं (समष्टिबुद्धिः) ततः त्रयोऽपि अहंकाराः तेभ्यश्च क्रमात् देवेन्द्रियभूतानि इति क्रमो ज्ञेयः. ४. तेन स्मार्तोऽयं क्रमो न तु श्रौतः. 'इतरेषाञ्च अनुपलब्धे'रित्यत्र तन्निषेधात्. (ब्रह्मसूत्र २।१।२)

प्रकृति द्वारा आविर्भूत किया गया पंचमहाभूतोंवाला जगत सगुण है. उससे महत्तत्व, उससे अहंकार - ऐसा उत्पत्तिका क्रम (निरीश्वर) सांख्य सिद्धांतमें बताया गया है. (१४)

प्रकृत्या निर्मितत्वेन प्राकृतत्वाद् गुणान्वयात् ।

धर्मान्तरतिरोभावाद् जडम् अब्रह्म भासते ।।१५ ।।

प्रकृति द्वारा निर्मित होनेसे सत्त्वादि गुणोंके संबंधके कारण जड पदार्थ प्राकृत कहलाता है. उसमें चित् तथा आनंदांश एवं ऐश्वर्यादि धर्मोंका तिरोभाव हुआ है. अब वह ब्रह्मसे भिन्न प्रतीत होता है. (१५)

तस्याप्यंशभूतत्वात् जडे ब्रह्मसमन्वयम् ।

तन्मूलके[१] सदंशेन वक्ति 'तत्तु समन्वयात्' ।।१६।।

१. प्रकृतिमूलके जडमात्रे. सदंशेन अस्ति इतिरूपेण ब्रह्मणः सर्वत्र अन्वयः अस्ति इति ज्ञाप्यते.

वह प्रकृति भी अंशरूपा होनेसे 'तत्तु समन्वयात्' 'यह जगद् ब्रह्म है, क्योंकि ब्रह्म जगतमें ओतप्रोत उपादानरूपसे स्थित है' इस सूत्रमें प्रकृतिमूलक जड जगतमें ब्रह्मका सदंशद्वारा समन्वय-उदापादनत्व कहा गया है. (१६)

जीवास्तु निर्गुणाः स्वांशा आवृताः प्राकृतैर्गुणैः ।

सृष्ट्यारम्भे नारदीये पञ्चरात्रे स्फुटं तथा ।।१७ ।।

''त्रिविधा[१] जीवसङ्घास्तु देवमानुषदानवाः ।

तत्र देवा मुक्तियोग्या मानवेषूत्तमा अपि ।।१८।।

मध्यमा मानुषा ये तु सृतियोग्याः[२] सदैव हि ।

अधमा निरयायैव दानवास्तु तमोलयाः ।।१९।।

१. सात्विकराजसतामसाः. ते च क्रमेण देवमनुष्यासुराः. दैत्यदानव-राक्षसाश्च असुरभेदाः. २. मध्यलोकभ्रमणधर्माणः.

जीव तो निर्गुण हैं तथा ब्रह्मके अंश हैं, परंतु प्राकृतगुणोंसे आवृत्त हैं. सृष्टिके आरंभमें जीवोंकी गुणावृत्तदशाका नारद पञ्चरात्रमें निरूपण करते हुए कहा गया है कि जीवोंके समूह तीन प्रकारके होते हैं, देव, दानव तथा मानव. उनमें देव तथा उत्तम मानव मुक्ति योग्य हैं. सामान्य मानव जो मानवोंमें मध्यम हैं, वे जन्म-मृत्युके चक्रमें लोकमें भ्रमण करनेके योग्य होते हैं तथा अधममानव नरकलोक प्राप्त करने योग्य ही होते हैं. दानव तो अंधकारमें ही लीन होते हैं.(१८-१९)

श्रुतावपि [१]''त्रयः प्राजापत्या' इति तदुच्यते ।

तदन्तःकरणादीनि[२] तादृशानि भवन्ति हि ।।२० ।।

१. सर्वनिर्णयावरणभङ्गोक्तायाम्. २. सात्विकादीनि यथायोग्यान् इति अर्थः.

वेदमें भी 'त्रयः प्राजापत्याः' 'तीन प्रजापति' इस वचन द्वारा इन्हीं तीन प्रकारोंका निरूपण किया गया है. उनके अंतःकरणादि भी तीन प्रकारके होते हैं. (२०)

जीवाः कर्माणि कुर्वन्ति स्वभावानुगुणान्यतः।

फलं वाञ्छन्ति तादृक्षं प्राप्य सुख्यन्ति तत्र[१] ते ।।२१।।

१. स्वगुणकर्मानुरूपफलेषु.

स्वभावानुरूप जीव कर्म करते हैं. फल भी उसी प्रकारके चाहते हैं तथा उन्हें प्राप्त करके सुख प्राप्त करते हैं. (२१)

सत्वाद्युपाधिम् आदाय विष्णुर्ब्रह्मा शिवस्तथा।

[१]तत्तन्नियमनायाऽभूत् स्थित्यादिकृतये पृथक् ।।२२।।

१. सात्विकादिपृथक्-पृथक्स्वभावस्य जीवसंघस्य तत्तदनुरूपफलादि दानाय इति यावत्.

सत्वादि उपाधियोंका स्वीकार करके स्थिति, पालन तथा संहार की क्रियाओंका नियमन करनेके लिए क्रमशः विष्णु, ब्रह्मा तथा शिव पृथक्-पृथक् हुए. (२२)

[१]सत्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते।

स्थित्यादये हरि-विरञ्चि-हरेति संज्ञाः

श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः ।।२३।।

सत्व, रजस् तथा तमस् प्रकृतिके गुण हैं. उन गुणोंसे युक्त होकर एक ही परपुरुष जगतकी स्थिति आदिके लिए हरि, ब्रह्मा और हर; ऐसी तीन संज्ञाओंको धारण करते हैं. उनमेंसे मनुष्यका कल्याण तो सत्त्वदेहवाले हरिके आश्रयसे ही होता है(१.भाग.पु.१।२।२३). (२३)

चिच्छक्तिः पुरुषो नारायणो ब्रह्मा ततोऽभवत्।

ब्रह्मादिद्वारकः सर्गः पुराणादौ परिस्फुटः ।।२४।।

चित्-शक्ति पुरुष नारायणसे ब्रह्मा प्रकट हुए. पुराणोंमें ब्रह्मा द्वारा सृष्टिके उत्पन्न होनेका निरूपण स्पष्टतया वर्णित है. (२४)

[१]"जगृहे पौरुषं रूपं भगवान् महदादिभिः।

सम्भूतं षोडशकलम् आदौ लोकसिसृक्षया ।।२५ ।।

यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ।

नाभिह्रदाम्बुजाद् आसीद् ब्रह्मा विश्वसृजां पतिः ।।२६ ।।

भगवानने पुरुषसंबंधी रूपको धारण किया जो रूप महत्तत्वादि निष्पन्न एवं भूतेन्द्रियादि षोडशकलाओंवाला था. प्रारंभमें लोकोंकी रचना करनेकी इच्छासे वह पुरुषावतार हुआ. वह योगनिद्राका विस्तार करता हुआ जलमें शयन करता था. उसकी नाभिसरोजसे विश्व सृष्टाओंके पति ब्रह्मा हुए(भाग.पुरा. १।३।१). (२५-२६)

गुणा विलीय जायन्ते शून्यवत् प्रकृतौ लये ।

प्रकृतिः लीयतेऽव्यक्ते[१] पुरुषश्च तथा स्मृतिः ।।२७ ।।

१. अक्षरे

प्रलयके समय सभी गुण प्रकृतिमें लीन होकर शून्यवत् हो जाते हैं. प्रकृति और पुरूष अक्षरमें लीन हो जाते है, ऐसा स्मृतिमें कहा गया है. (२७)

''प्रकृतिः पुरुषश्चोभौ लीयते परमात्मनि'' ।

''कदाचित्[१] पुरुषद्वारे''त्युक्तः सर्गोऽयम् ईरितः ।।२८।।

१. निबन्धस्थ अयं श्लोकपादः. तत्र हि षोढा दर्शितः सर्गः. तेषु प्रकृति-पुरुषद्वारोपि एकः.

'प्रकृति तथा पुरुष दोनों परमात्मामें लीन होते हैं.' 'कभी पुरुष द्वारा सृष्टि होती है'. इस वाक्यमें जो सृष्टि कही गई है, वह यही सृष्टि है. (२८)

ननु लीना गुणा यत्र[१] लीयते प्रकृतिर्यदि ।

साक्षरे सगुणं[२] धाम भवेदेवेति चेद् न हि ।।२९ ।।

१. यस्यां प्रकृतौ. २. प्रकृतेः गुणात्मकत्वात् तस्याश्चाक्षरेलीनत्वाद् अक्षरे धाम्नि अपि सगुणत्वं दुर्निवारम् इति आशङ्क्य - न हि इति अनेन वारयति.

शंका= जिनमें गुणोंका लय होता है, वह प्रकृति यदि अक्षरब्रह्ममें लीन हो जाती हो, तो क्या वह धाम भी सगुण नहीं हो जाएगा ? तो कहते हैं. (२९)

जगतः सगुणत्वं तु गुणबन्धोऽनुभूयते ।

न तस्य वश्यमायस्य बन्धगन्धः स्वशक्तिजैः[१] ।।३० ।।

१. गुणैरिति शेषः.

समाधान= जगत सगुण होनेसे गुणोंका बंधन प्रतीत होता है. माया जिनके वशमें है, ऐसे उन अक्षरमें उनकी ही शक्तियोंसे उत्पन्न हुए गुणोंके किसी भी प्रकारके बंधनकी गंध मात्र भी नहीं है. (३०)

'बद्धो[१] मुक्त इति व्याख्या गुणतो मे न वस्तुतः।
गुणस्य मायामूलत्वाद् न मे मोक्षो न बन्धनम्' ।।३१।।

१. श्रीभाग.पु.११।११।१. अयमाशयः व्याख्या नाम विशेषेण सृष्टिरूपेण हेतुनाऽऽख्या. तेन सृष्टौ एव गुणहैतुकीबद्धमुक्ताऽऽख्या न पुनः सृष्टेः आाद्यन्तयोः इति अर्थः. किञ्च लये हि विपर्ययेण तत्तत्स्वरूपापत्त्या तत् जननी प्रकृतिः एव अक्षररूपताम् आप्नोति कुतस्तरां तदा गुणानाम् आत्मरूपेण अस्तित्वम्. कुतः तत्कृतं च अक्षरे सगुणत्वम्.

'मुझे बंध तथा मोक्ष गुणसे हैं, वस्तुतः नहीं है. गुणोंका मूल तो माया है, अतः मुझे न मोक्ष है, न बंध है.' (३०)

सृष्टावेवोद्भवन्त्येते प्राकृताः सति[१] सल्लयात्।
साऽप्यनुद्भूतरूपा चेत् तत्कार्याणि[२] कुतस्तराम् ।।३२।।

१. सदंशे जडवाच्यस्य सतो लयात्. २. गुणादीनि.

सदंशमें सद्रूप जडका लय होनेसे सृष्टिके साथ ही वे प्राकृतगुण उत्पन्न होते हैं. यदि वो उद्भूत रूपवाली न होती, तो सृष्टिके कार्य भी कैसे हो पाते? (३२)

किञ्च तत्तद्वृत्तिरूपाः सम्भवन्त्यधुनैव ते।
जीवेष्वेव विमूढेषु क्रीडार्थं[१] लिङ्गवत्सु[२] च ।।३३।।

१. क्रीडार्थभेदार्थम् इत्यर्थः. २. इन्द्रियमनः तन्मात्रारूपं लिङ्गशरीरं, तद्वत्सु.

लिंगशरीरवाले विशेष मूढ जीवोंमें क्रीडार्थ वे सभी वृत्तिरूप गुण सृष्टिकी उत्पत्तिके बाद ही उत्पन्न होते हैं. (३३)

न हि ज्ञानघने नाना युज्यन्ते वृत्तयः परे।
गुणानां वृत्तिरूपत्वं सांख्यविद्भिः विविच्यते ।।३४।।

ज्ञानघन परब्रह्ममें अनेक प्रकारकी वृत्तियोंका योग नहीं होता है. गुणोंमें वृत्ति होनेका सिद्धांत सांख्यमतावलम्बियोंका है. (३४)

'प्रीत्य[१]प्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः[२]।

[3]अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ।।३५ ।।

१. ईश्वरकृष्णविरचितार्याणां मध्ये तद्द्वयम् इदम्. २. आच्छादनम्. ३. तैलवर्त्यादीनां पञ्चमहाभूतानाञ्च परस्परविरुद्धानाम् अपि यथा दीपदेहाद्येक-कार्यकारित्वं तथैव एतेषां सत्वादिगुणानाम् अपि अविरोध इति अन्यत्र भूमा विस्तरः.

सत्वं लघु प्रकाशकम् इष्टम् उपष्टम्भकं चलं च रजः ।

गुरुवरणकमेव[1] तमः प्रदीपवच्चार्थतो वृत्ति'' ।।३६ ।।

१. आच्छादकम्.

गुण प्रीति, अप्रीति तथा विषादरूप प्रकाशकी वृत्तिको नियममें रखनेवाले, परस्परके अभिभवका आश्रय करके जन्म तथा मृत्युके द्वंद्ववाले हैं. सत्त्वगुण कोमल, प्रकाशक तथा इष्ट है. रजोगुण रोधक तथा चल है, जबकि तमोगुण विस्तृत आच्छादन करनेवाला है. ये सभी वृत्तियां विषयके साथ दीपकके समान होती है. (अर्थात् विषयोंको प्रकाशित करनेवाली हैं.) (३६)

तस्माद् अचिन्त्यमहिमा भगवान् पुरुषोत्तमः ।

विरुद्धधर्माधारेऽस्मिन्[1] युक्तं सर्वम् अलौकिके ।।३७ ।।

१. पुरुषोत्तमे.

अतः भगवान पुरुषोत्तमकी महिमाका विचार भी करना संभव नहीं है. परस्पर विरुद्धधर्मोके आधाररूप उन अलौकिक प्रभुमें सभी कुछ योग्य ही है. (३७)

''सएवेदं ससर्जाग्रे[1] भगवान् आत्ममायया ।
सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ।।३८ ।।
तया विलसितेष्वेषु गुणेषु गुणवान् इव ।
अन्तः प्रविष्ट आभाति विज्ञानेव विजृम्भितः ।।३९ ।।
यथा ह्यवहितो वह्निः दारुष्वेकः स्वयोनिषु ।
नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ।।४० ।।
असौ गुणमयैर्भावैः भूतसूक्ष्मेन्द्रियात्मभिः ।
स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ।।४१।।
भावयत्येष सत्वेन लोकान् वै लोकभावनः ।
लीलावतारानुरतो देव-तिर्यङ्-नरादिषु ''।।४२ ।।

इस प्रकार अपनी सद्-असद्रूप गुणमय माया द्वारा इस जगतका आरंभमें निर्गुण भगवानने आविर्भाव किया. जब वे गुण विकसित होने लगे, तब विज्ञानसे विकसित वे भगवान मानों गुणवाले हों, ऐसे उनमें प्रविष्ट हुए दिखाई देते हैं. जिस प्रकार अपने मूलस्थानमें काष्ठमें रही हुई अग्नि अनेक हो, ऐसी प्रतीत होती है, उसी प्रकार विश्वात्मा यह पुरुष पंचमहाभूतोंमें दिखलाई देते हैं. प्राणियोंके सूक्ष्म इंद्रियरूप गुणमय भावोंसे वह पुरुष अपनेमें निर्मित प्राणियोंमें प्रविष्ट होकर, उनमें स्थिति करके उन प्राणियोंके गुणोंका भोग करते हैं. ये परमात्मा सर्वलोकोंके पालक हैं. अतः सत्त्वगुण द्वारा सभी लोकोंकी रक्षा करते हैं तथा तदर्थ ही देव-पशु-पक्षी-मनुष्य आदि रूपोंमें लीलार्थ अवतरित होनेमें रुचि भी रखते हैं (१. श्रीभाग.पु.१।२।३०-३४. एवं पञ्चश्लोकी श्रीभागवतस्था इयम्). (३८-४२)

इत्युक्तं सर्वमुदितं श्रीमद्भागवतादिषु।
श्रुतिप्रसिद्धं तत्सिद्धं शुद्धम् अद्वैतम् उज्ज्वलम्।।४३।।

इस प्रकार पूर्व निरूपित सभी सिद्धांत श्रीमद्भागवत आदि शास्त्रोंमें निरूपित हैं. श्रुतिवाक्योंमें प्रसिद्ध ऐसा वह शुद्ध उज्ज्वल अद्वैत इस प्रकार सिद्ध है. (४३)

चतुष्टये प्रमाणानाम् अविरोधाद् विचारिते।
श्रीमदाचार्यसिद्धान्तात् न वर्णोऽप्यन्यथा भवेत्।।४४।।

परस्पर किसी भी प्रकारके विरोधके बिना विचारित चारों प्रमाणों-(वेद, गीता, ब्रह्मसूत्र तथा भागवत)में श्रीमहाप्रभुजीके सिद्धांतोंसे अक्षरमात्र भी विरोध नहीं है. (४४)

सर्वप्रमाणाविषयः सर्वशक्तिः स्वयं प्रभुः।
पूर्णानन्दो रसात्मासौ[१] क्रीडत्यध्यात्मधामनि।।४५।।

१. 'रसो वै सः' ब्रह्मवल्लीश्रुतिः.

सभी प्रमाणोंके भी जो विषय नहीं है, सर्वशक्तियुक्त, पूर्णानंद रसात्मा वे प्रभु अध्यात्म धामरूप अक्षरमें क्रीडा कर रहे हैं. (४५)

यादृशं धाम तत् तत्र यथा क्रीडा यथा हरिः।
लीलार्थं तस्य रूपाणि यथा नाना तथाखिलम्।।४६।।

बृहद्वामनसंज्ञे तत् पुराणे खिल्य उत्तरे।

ब्रह्मभृग्वादिसंवादे स्पष्टं तदिहं लिख्यते ।।४७।।

१. पुराणस्थम् आख्यानं प्रमाणत्वेन दीयत इत्यर्थः.

वह धाम जैसा है, वहां जैसी लीला तथा जैसे लीला करनेवाले हरि हैं तथा लीलार्थ उनके नानारूप हैं, उनका ऐसा निरूपण बृहद्वामनपुराणके उत्तरखण्डमें ब्रह्मा तथा भृगुके संवादमें स्पष्ट है. उसीका निरूपण यहां किया जा रहा है. (४६-४७)

षष्ठिवर्षसहस्राणि मया तप्तं तपः पुरा।

नन्दगोपव्रजस्त्रीणां पादरेणूपलब्धये ।।४८।।

तथापि न मया प्राप्ताः तासां वै पादरेणवः।

श्रुत्वैतद् ब्रह्मणो वाक्यं भृगुः प्राहाथ सादरम् ।।४९।।

वैष्णवानां पादरजो गृह्यते तद्विधैरपि।

सन्ति ते बहवो लोके वैष्णवा नारदादयः ।।५०।।

तेषां विहाय गोपीनां पादरेणुस्त्वयापि यत्।

गृह्यते संशयो मेऽत्र को हेतुः तद्वद प्रभो ।।५१।।

भृगुऋषिने ब्रह्माजीके इस कथनको सुना कि मैंने हजारवर्ष तक नंदगोपके व्रजकी गोपियोंकी चरणरजको प्राप्त करनेके लिए तप किया तथापि मैं उस चरणरजको प्राप्त न कर पाया. यह सुनकर भृगुऋषिने आदरपूर्वक पूछा कि आप जैसे भी वैष्णवोंके चरणरजके ग्राहक हैं! वैष्णव तो लोकमें नारदादि बहुत हैं तथापि उन्हें छोडकर गोपियोंके चरणरजको ग्रहण करने विषयक आपके वचनमें मुझे संदेह है. हे प्रभो! आपके इस कार्यमें क्या हेतु है, उसे स्पष्ट करें. (४८-५१)

ततो ब्रह्मा भृगुं प्राह चिन्तयित्वा पुरातनीम्।

कथां सर्वश्रुतीनां च रहस्यं परमाद्भुतम् ।।५२।।

तब ब्रह्माने भृगुसे सभी श्रुतियोंकी प्राचीन कथाका विचार करते हुए उन्हें कहा जो कि परम अद्भन्नत रहस्य है. (५२)

(ब्रह्मोवाच)

नं स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः किल।

नाहं शिवश्च शेषश्च श्रीश्च ताभिस्समाः क्वचित् ।।५३।।

प्राकृते[२] प्रलय प्राप्ते [३]व्यक्तेऽव्यक्तं[४] गते पुरा ।

शिष्टे ब्रह्मणि चिन्मात्रे कालमायाद्य[५]गोचरे[६]।।५४ ।।

ब्रह्मानन्दमयो लोको व्यापिवैकुण्ठसंज्ञकः ।

निर्गुणोऽनाद्यनन्तश्च वर्त्तते केवलेऽक्षरे ।।५५।।

अक्षरं ब्रह्म परमं वेदानां स्थानम् उत्तमम् ।

गोलोकवासी तत्रस्थैः[७] स्तुतो वेदात् परात्परः[८]।।५६।।

१. यथा लौकिकाः स्त्रियः तथा व्रजसुन्दर्यो नेति लौकिकत्वनिषेध एव तात्पर्यम्. न तु स्त्रीत्वस्य. २. ब्रह्माऽऽयुःसमाप्तिरूपे. ३. आविर्भावं गते जगति. ४. अक्षरम्. ५. प्रविष्टे. ६. तिगेऽक्षर इति वा पाठः. ७. अक्षरे स्थितैः. ८. जगद् अपेक्षया आध्यात्मिकाक्षररूपात्परः. आधिदैविकः पुरुषोत्तमः श्रीकृष्ण इत्यर्थः.

ब्रह्मा बोले कि हे पुत्र! व्रजसुन्दरी गोपियां लौकिक स्त्री नहीं हैं. वे साक्षात् श्रुतिरूपा हैं. मैं, शिव, शेष, लक्ष्मी आदि कोई भी कभी भी उनके समान नहीं हो सकते. प्राकृत प्रलयके (मेरे आयुके समाप्तिलकाल)समय व्यक्त जगत जब अव्यक्त अक्षरमें लीन हो गया था तथा केवल ज्ञानरूप व काल एवं मायासे पर अक्षरब्रह्म ही शेष रह गया था. तब उस पूर्वकालमें अवशिष्ट अक्षरमें ब्रह्मानंदमय व्यापिवैकुण्ठ नामक निर्गुण, अनादि व अनंतलोक वर्तमान रहता है. अक्षरब्रह्म वेदोंका परम उत्तम स्थान है. वहां स्थित रहनेवाले मूर्तिमान वेदोंने गोलोकवासी परात्पर कृष्णकी स्तुति की. (५३-५६)

चिरं स्तुत्या ततः तुष्टः परोक्षं प्राह तान् गिरा ।

तुष्टोऽस्मि ब्रूत भो प्राज्ञा वरं यन्मनसीप्सितम् ।।५७ ।।

चिरकाल तक की गई स्तुतिसे सन्तुष्ट होकर भगवानने अप्रत्यक्षरूपसे वाणी द्वारा कहा कि, हे प्राज्ञ वेदगण! मैं प्रसन्न हुं. तुम्हारे मनमें जो अभीष्ट हो, उसे कहो. (५७)

नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत ।

सगुणं ब्रह्म सर्वेषां[१] वस्तुबुद्धिर्न[२] तेषु नः ।।५८ ।।

ब्रह्मेति पाठ्यतेऽस्माभिः यद् रूपं निर्गुणं परम् ।

वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत् ।।५९ ।।

आनन्दमात्रम् इति यद् वदन्तीह पुराविदः ।
तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः ।।६०।।

१. अशेषाणां नोऽस्माकमित्यन्वयः. २. निर्गलितवस्तुत्वबुद्धिः.

वेदोंने कहा कि हमने नारायणादि रूपोंको जाना है. हे अच्युत! हमारी उन रूपोंमें सब ही की परमार्थवस्तुरूप बुद्धि नहीं है, क्योंकि वे तो सभी सगुणरूप हैं. हम जिन परम निर्गुणरूपको पढते हैं, जो वाणी, मन आदिका विषय नहीं है, वह रूप तो हमें ज्ञात ही नहीं है. अतः यदि आप हमें वरदान देना चाहते हों, तो जिस रूपको पुरावृतज्ञोंने आनंदमात्र कहा है, ऐसे उस रूपको दिखलाइए. (५८-६०)

श्रुत्वैतद् दर्शयामास स्वं लोकं प्रकृतेः परम् ।
केवलानुभवानन्दमात्रम् अक्षरमध्यगम् ।।६१।।
यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः ।
मनोरमनिकुञ्जाढ्यं सर्वर्तुसुखसंयुतम् ।।६२।।
यत्र गोवर्द्धनो[१] नाम सुनिर्झरदरीयुत[२]।
रत्नधातुमयः श्रीमान् सुपक्षिगणसङ्कुलः ।।६३।।
यत्र निर्मलपानीया कालिन्दी सरितां वरा ।
रत्नबद्धोभयतटी हंसपद्मादिसङ्कुला ।।६४।।
[३]शश्वद् रासरसोन्मत्तं यत्र गोपीकदम्बकम्[४]।
लसत्कदम्बमध्यस्थः[५] किशोराकृतिरच्युतः ।।६५।।
दर्शयित्वेति च प्राह ब्रूत किं करवाणि वः।
दृष्टो मदीयो लोकोऽयं यतो नास्ति परं वरम् ।।६६।।

१. गिरिः इति शेषः. २. सुपदं काकपेयत्वादिनिवृत्तये. ३. नानेत्यपि पाठः. ४. कदम्बः समूहः. ५. तत्कदम्बकमध्येति पाठो वा. तेन गोपीसमूहस्थित इत्यर्थः.

यह सुनकर भगवान श्रीकृष्णने अक्षरमध्यवर्ती अनुभवैकलभ्य आनंदमात्र तथा प्रकृतिसे पर अपने लोकको दिखलाया. जहां अभीष्टपूरक वृक्षोंसे युक्त तथा मनोहर निकुञ्जोंसे युक्त, सभी ऋतुओंके सुखोंसे संपन्न वृंदावन नामक वन है, जहां सुंदर झरने तथा गुफाओंसे युक्त, सुंदर पक्षीगणोंसे व्याप्त, रत्नधातुमय श्रीगोवर्धनपर्वत है, जहां निर्मल जलपूर्ण उत्तम सरितारूप

रत्नजटित उभयतटवाली एवं हंस तथा कमलोंसे व्याप्त श्रीयमुना है, जहां निरंतर रासके रससे उन्मुक्त गोपियोंका समूह है, तथा उस सुंदर गोपिकाओंके समूहके मध्यमें किशोर आकृतिवाले अच्युत श्रीकृष्ण हैं. ऐसा धाम दिखलाकर भगवानने कहा कि, बोलो अब तुम्हारे लिए मैं क्या करूं. जिससे उत्तम कुछ भी नहीं है, ऐसा मेरा लोक तुमने देखा. (६१-६६)

कोटिकन्दर्पलावण्ये त्वयि दृष्टे मनांसि नः।
कामिनीभावम् आसाद्य स्मरक्षुब्धान्यसंशयम्।।६७।।

वेदोंने कहा कि कोटिशः कामदेवोंसे अधिक लावण्यवाले आपके दर्शन होते ही हमारे मन कामिनीभावको प्राप्त होकर कामसे चंचल हो गए हैं, इसमें कोई संदेह नहीं है. (६७)

यथा त्वल्लोकवासिन्यः कामं तत्वेन गोपिकाः।
भजन्ति रमणं मत्वा चिकीर्षाऽजनिनस्तथा।।६८।।

जैसे आपके लोकमें रहनेवाली गोपिकाएं, आपको रमण करवानेवाले जानकर आपनी कामभावसे सेवा करती हैं, उसी प्रकार आपकी सेवा करनेकी इच्छा हमारे मनमें भी प्रकट हुई है. (६८)

दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः।
मयानुमोदितः सम्यक् सत्यो भवितुमर्हति।।६९।।

तब श्रीकृष्णने कहा कि तुम्हारा यह सुंदर मनोरथ अतिदुष्कर है. किंतु क्योंकि मैनें तुम्हारी प्रार्थनाका अनुमोदन किया है, अतः तुम्हारा यह मनोरथ अवश्य ही पूर्ण होगा. (६९)

आगामिनि विरञ्चौ तु जाते सृष्ट्यर्थम् उद्यते।
कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ।।७०।।
पृथिव्या भारते क्षेत्रे माथुरे मम मण्डले।
वृन्दावने भविष्यामि प्रेयान् वो रासमण्डले।।७१।।
जारधर्मेण [१]सुस्नेहं सुदृढं सर्वतोऽधिकम्।
मयि सम्प्राप्य सर्वेऽपि कृतकृत्या भविष्यथ।।७२।।

१. सुस्नेहादिपदैः 'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्ति' रित्यादि पञ्चरात्रवचनं स्मार्यते.

जब आगामी ब्रह्मा द्वारा सृष्टि उत्पन्न करनेका उद्यम होगा, तब सारस्वतकल्पको प्राप्त होकर, व्रजमें गोपियोंके रूपमें तुम्हारा प्राकट्य होगा. भूतलमें भारतदेशके अन्तर्गत मथुरामण्डलस्थित वृन्दावनमें रासमण्डलमें तुम्हारा परमप्रिय मैं बनूंगा. तुम सभी जारधर्मसे मुझमें सर्वाधिक व सुद्रढस्नेहको प्राप्त करके कृतकृत्य हो जाओगे. (७०-७२)

ब्रह्मोवाच।

श्रुत्वैतत् चिन्तयन्त्यस्ता रूपं भगवतश्चिरम्।
उक्तकालं समासाद्य गोप्यो भूत्वा हरिं गताः ।।७३।।
स्त्रियो वा पुरुषाश्चापि तद्भावेनैव केशवम्।
हृदि कृत्वा गतिं यान्ति श्रुतीनां[१] नात्र संशयः ।।७४।।

१. श्रुतिरूपादिगोपीनाम्

ब्रह्माजीने कहा कि हे ऋषिगण! ऐसा सुनकर स्त्रीभावापन्न वे श्रुतियां भगवानके सौन्दर्यका चिरकाल तक चिन्तन करती हुई उक्तकाल सारस्वत कल्पमें गोपीरूपको प्राप्त करते हुए श्रीहरिसे मिलीं. स्त्री हो या पुरुष हो, जो गोपीभावसे हृदयमें केशवको स्थित करते हैं, वे श्रुतियोंकी उस उत्तम गतिको प्राप्त करते हैं, इसमें कोई संदेह नहीं है. (७३-७४)

तासां पादरजः स्तुत्यं नित्यं वृन्दावने भुवि।
तत्प्राप्य तत्कामनया[१] यान्त्यहो गोपिकागतिम् ।।७५।।
नन्दगोपव्रजस्त्रीणाम् अतः पादरजो मया।
वाञ्छितं पुत्रकाः सम्यक् यद्धि ताः श्रुतयो मताः ।।७६।।
श्रुत्वैद् ऋषयो वाक्यं ब्रह्मणः परमेष्ठिनः।
सर्वात्मना प्रपन्नास्ते श्रीगोपीजनवल्लभम् ।।७७।।

१. पुरुषोत्तमप्राप्तिकामनया.

उन गोपियोंकी चरणरज वंदनीय है. वे भूतलपर वृंदावनमें सदा ही विद्यमान हैं. श्रीकृष्णको प्राप्त करनेकी कामनासे गोपियोंकी चरणरजको धारण करते हुए, अहो! सामान्यजन भी गोपिकाओंकी गतिको प्राप्त करता है. अतः हे प्रिय पुत्रों! मैंने नंदगोपके व्रजकी गोपियोंके चरणरजकी लालसा की, ऐसा ही करना योग्य है, क्योंकि वे श्रुतिरूपा हैं. ऋषियोंने परमेष्ठी ब्रह्माजीके सर्वोच्च

पदाधिकारी संबंधी वाक्योंको सुनकर श्रीगोपीजनवल्लभकृष्णकी सर्वात्मभावसे शरणागति प्राप्त की. (७५-७७)

इत्युक्तम् उत्तरे खिल्ये बृहद्वामनसंज्ञके।

प्रभुपादादिभिरिदं[1] सङ्गृहीतं सनिर्णयम् ।।७८ ।।

१. अयं बृहद्वामनभागो विद्वन्मण्डने श्रीप्रभुचरणैः सङ्गृहीतः. आदिपदेन च बहिर्मुख-ध्वंसे गोपालभट्टैश्च इति द्योत्यते.

इस प्रकार बृहद्वामन पुराणके उत्तर खिल्यमें जो कहा गया है, उसका संग्रह श्रीगुसांईजीने विद्वन्मंडनमें निर्णयके साथ संग्रहीत किया है. (७८)

ऋगादिनाम् उपनिषत्सु पृथङ्नामपूर्वकम्।

तत्रत्यं[1] वर्ण्यते सर्वं तद्रूप्याद् अभिदोदिता[2] ।।७९ ।।

१. भगवद्धामस्थवृत्तम् इत्यर्थः. २. तत्रत्यवस्तूनां भगवद्रूपत्वात्.

ऋग्वेदादिके उपनिषदोंमें भिन्न-भिन्न नामोंसे प्रभुके उस धामका वर्णन किया गया है. वो भगवद्रूप होनेसे अभेदपूर्वक कहा गया है. (७९)

भाष्यादौ श्रीमदाचार्यैः दर्शितं प्रभुभिस्तथा।

तन्नित्यलीलावादादावन्यत्रान्यैस्तदीक्ष्यताम् ।।८० ।।

अणुभाष्यमें श्रीमहाप्रभुजीने तथा 'नित्यलीलावाद'में श्रीगुसांईजीने तथा अन्य विद्वानोंने अपने ग्रंथोंमें जो निर्णय दिया है उसे भी देखा लेना चाहिए. (८०)

तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः।

दिवीव चक्षुराततम्।

ऋग्भिर्निरूपिते धाम्न्यात्माभिन्नेऽचिन्त्यधर्मवान्।

सर्वात्मकः सर्वलीलो नित्यभक्तैर्निजात्मभिः ।।८१।।

अखण्डः पूर्ण एवासौ रमते स समं सदा।

भक्त्येकलभ्यो भगवान् नान्यथा दृश्यते परः ।।८२।।

'आकाशमें विस्तृत नेत्र की तरह विद्यमान भगवान विष्णुके उस परमधामका सदा दर्शन करते हैं.' - इस प्रकार ऋग्वेदमें निरूपित भगवान अपनेसे अभिन्न धाममें सर्वरूप, सर्वलीलावाले, अखंड तथा पूर्ण ही अपनी आत्मारूप निज भक्तोंके साथ सदा रमण कर रहे हैं. भक्त्यैकलभ्य ऐसे परात्पर

भगवानका अन्य किसी भी प्रकारसे दर्शन प्राप्त करना संभव नहीं है. (८१-८२)

इत्यवश्यं सेवनीयः परमानन्दसिद्धये ।
स्वाभाविककृपाशक्तिः जीवैः सेवार्थनिर्मितैः ।।८३।।

अतः परम आनंदकी सिद्धिके लिए, सेवाके लिए जिनकी उत्पत्ति हुई है, ऐसे जीवोंको स्वाभाविक कृपाशक्तिवाले भगवानकी सेवा करनी चाहिए. (८३)

यत् तेनोद्गमिता दैवाः सेवनायैव चेतनाः ।
'दासभूतो हरेरेवे'ति पाद्मे यज्जीवलक्षणम् ।।८४।।
जीवाः स्वांशा यतः सृष्टा मोक्षेऽप्यक्षररूपिणः ।
अतोऽपि भजनं युक्तं ''यो यदंशः स तं भजेत्'' ।।८५।।

प्रभुने सेवाके लिए ही चेतन जीवोंको प्रकट किया है. 'दासभूतो...' अर्थात् प्रभुका ही दासरूप जीव है' - ऐसा पद्मपुराणमें जीवका लक्षण दिया गया है. अतः अपने अंशरूप तथा मोक्षमें भी अक्षरब्रह्मरूप जीवोंको प्रभुने प्रकट किए हैं. अतः प्रभुका भजन करना ही योग्य है. 'यो यदंशः....' - जो जिसका अंश है, वह उसे भजे.' (८४-८५)

शक्तिगणैरममाणं तनुवित्तजभजनजातपरभक्त्या ।
सेवध्वं संसारं भित्त्वा ब्रह्मैक्यभावना भूयः ।।८६।।

तनुजा(तन द्वारा) तथा वित्तजा(वित्त द्वारा)सेवा द्वारा सिद्ध होते आश्रयसे प्राप्त परामानसी भक्तिसे, सर्वत्र एक ही ब्रह्म है ऐसी भावनाको सिद्ध करके संसारका भेदन करके शक्तियोंके समूहोंके साथ क्रीडा करते प्रभुकी निरंतर सेवा करो. (८३)

इति श्रीमद्वल्लभाचार्य्यमतवर्त्ति श्रीव्रजवल्लभचरणानुचर पञ्चनदीघनश्यामभट्टात्मज
श्रीगोवर्द्धनशीघ्रकवेः कृतौ वेदान्तचिन्तामणौ
प्रकृतिपुरुषदिग्दर्शनपूर्वकभगवद्धामोदाहरणं नाम चतुर्दशं प्रकरणम् ।।१४।।

d

अथ साधनफलादिसर्वविवेको नाम

पञ्चदशं प्रकरणम्

सर्वात्मार्पणतः सेवारसैः मुक्त्यधिकैः कृतः।

स्वाचार्यैः सुलभो यः स श्रीकृष्णः शरणं मम।।१।।

सर्वात्मसमर्पणके सिद्धांतका प्रतिपादन करके अपने आचार्यने सेवामें संपूर्ण रस लेकर मुक्तिसे भी अधिक जो प्रभु हैं, उन्हें सुलभ बना दिये हैं. ऐसे भक्त्यैकलभ्य श्रीकृष्ण मेरे आश्रय हैं. (१)

ननु ता[१] गोपिका नित्या नित्यं क्रीडादिकं यदि।

शुद्धं द्वैतम् इदं जातं शुद्धाद्वैतं कुतः पुनः।।२।।

१. बृहद्वामनाद्युक्ताः.

शंका= वे गोपीजन नित्य होनेसे, प्रभुकी उनके साथकी क्रीडा भी नित्य होनेसे शुद्ध-द्वैत हो गया, शुद्धाद्वैत कैसे हुआ? (२)

न शंकनीयम् इत्येवं शक्तिशक्तिमतोर्हतः[१]।

सूत्रेषु श्रुतितो भेदः सुबोधिन्यां[२] न्यरूपयन्।।३।।

१. निरस्तः. २. वेणुगीतादिव्याख्याने. पादोऽयम् उत्तरत्रान्वयी.

समाधान= ऐसी शंका करनेकी आवश्यकता नहीं है. शक्ति और शक्तिमानके बीचके भेदका ब्रह्मसूत्र, श्रुति तथा श्रीभागवतकी सुबोधिनीटीकामें निरसन किया गया है. (३)

आधिदैविकशक्तित्वं तासां कृष्णमुखाग्नयः।

वासुदेवोपनिषदि[१] श्रूयते शक्तिरूपता।।४।।

१. आथर्वणीयेयम् उपनिषत्. गोपीचन्दनोपनिषदित्यपि कथ्यते. ॐ नमस्कृत्य भगवन्तं नारदः सर्वेश्वरं वासुदेवं पप्रच्छेत्यादि. इयं शंकराचार्याद्यनुसारिभिः बहुभिः व्याख्याता भागवत तत्त्वभास्करादिषु सर्वसाधारण ग्रन्थेषु उदाहृता च.

श्रीमहाप्रभुजीने सुबोधिनीजीमें उन गोपांगनाओंको कृष्णकी मुखाग्निरूप होनेसे उनका आधिदैविकशक्तित्व कहा है. अतः वे भगवानकी आधिदैविक शक्तियां हैं. (४)

गोप्यो नाम विष्णुपत्न्यः तासां चन्दनमाह्लादनम्।

कश्चाह्लाद एष ब्रह्मानन्दरूपः। काश्च विष्णुपत्न्यो

गोप्यो नाम, जगत्सृष्टिस्थित्यन्तकारिण्यः प्रकृति–महदहमाद्या महामायाः। कश्च विष्णुः परब्रह्मैव विष्णुरिति।

तत्रैवाग्रे।

आपो ह वा अग्रे 'आसन्'इत्युपक्रम्य. ताश्च उपनिषद् वैवस्वते अन्तरे सगुणं ब्रह्म विधिना आनन्दैकरूपं पुरुषोत्तम–रूपेण मथुरायां वसुदेव–सद्मनि आविर्भविष्यति तत्रभवत्यः सर्वलोकोत्कृष्ट–सौन्दर्यक्रीडाभोगं गोपिकाः स्वरूपैः परब्रह्मानन्दैक–रूपं कृष्णं भजिष्यथ.

वासुदेवोपनिषद् तथा गोपीचंदनोपनिषद्में गोपिकाओंको विष्णुकी शक्तिरूपा कही गई हैं. उन्हें प्राप्त होता आह्लाद ब्रह्मानंदवत् है. विष्णुपत्नीरूपा गोपिकाएं कौन हैं? वे जगत् की सृष्टि, स्थिति तथा लय करनेवाली प्रकृति, महदादियोंकी आदि, महामाया है. विष्णु कौन हैं? विष्णु परब्रह्म हैं. वहीं वासुदेवोपनिषद्में आगे कहा गया है कि 'आपो ह वा अग्र आसन्।' यहां से उपक्रम करते हुए उत्पत्तिका वर्णन किया गया है. वहां उपनिषद्में निरूपित है कि वैवस्वतमन्वन्तरमें आनंदरूप पुरुषोत्तमका आविर्भाव सगुणताको धारण करते हुए वसुदेवके महलमें होगा. उस लीलामें लोकोत्कृष्ट उत्तम सौंदर्य प्राप्त करके उत्कृष्ट क्रीडाका भोग गोपिकाओंके रूपमें परब्रह्म आनंदस्वरूप भगवान श्रीकृष्णके साथ करोगे.

तत्र श्लोकौ।

इति ब्रह्मवरं लब्ध्वा श्रुतयो ब्रह्मलोकगाः।
कृष्णम् आराधयामासुः गोकुले धर्मसंकुले।।

(वहां दो श्लोक हैं.) ब्रह्मलोकमें स्थित श्रुतियोंने ब्रह्माजीसे ऐसा वर प्राप्त करके गोकुलरूपी धर्मसंकुलमें कृष्णका आराधन किया.

श्रीकृष्णाख्यं परब्रह्म गोपिकाः श्रुतयोऽभवन्।
एतत् सम्भोगसम्भूतं चन्दनं गोपिचन्दनम् इति।।

परब्रह्म श्रीकृष्णरूप हुए, श्रुतियां गोपिकाएं हुईं. इनके संभोगसे हुआ

चंदन गोपीचंदन हुआ.

''[1]ताभिर्विधूतशोकाभिर् भगवान् अच्युतो वृतः ।

व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा''।।५ ।।

जिनका शोक निवृत्त हुआ है, ऐसे गोपीजनोंसे भगवान आवृत्त हैं. तब पुरुष जैसे अपनी शक्तियोंसे शोभायमान होता है, ऐसे भगवान गोपीजनोंके समुदायके बीच अधिक शोभा देने लगे(१. भाग.पुरा. १०।३२।१०). (५)

इति पुंशक्तिवल्लीला शक्तिभिः सह शंसिताः।

मूर्तिमत्त्वं तु शक्तीनाम् अप्राकृततयेच्छया ।।६ ।।

ऐसी पुरुष तथा शक्तिके समान भगवान की लीला है, जहां (भगवानके साथ) वे अप्राकृत शक्तियां मूर्तिमंत हुई.

यथा मूर्त्तिर्न वर्णानां लौकिकानाम् अलौकिके ।

'वेदा[1] यथा मूर्त्तिधराः त्रिपृष्ठे'[2] तद् इदं तथा ।।७।।

१. श्रीभागवतस्थोऽयम् इन्द्रवज्र चरणः. (भाग.पु. १।१९।२३)
२. सत्यलोकादौ.

(भागवतजीमें भी गोपियोंके आधिदैविकत्वका निरूपण इस प्रकार किया गया है–) 'आप सभी स्थलोंसे जैसे सत्यलोकमेंसे वेद साक्षात् देह धारण करके आए हों ऐसे आये हो. ऐसे आपको अन्योंपर अनुग्रह करनेके अलावा कोई प्रयोजन नहीं है. इस लोकमें तथा परलोकमें और कोई कर्तव्य भी नहीं है.' (७)

मूर्त्तयोऽक्रूरदृष्टानां शक्तीनामपि वर्णिताः ।

तर्ह्याधिदैविकीनां तु तथात्वे[1] को नु संशयः ।।८ ।।

१. मूर्तिमत्वे.

अक्रूरकी यमुनाजलके अंदर भगवद्दर्शनके समय देखी हुई श्री, कीर्ति प्रभृति शक्तियोंकी मूर्तियोंका जब वर्णन हुआ है, तब आधिदैविक शक्तियोंके गोपियोंके रूपमें मूर्तिमान् होनेमें क्या संदेह हो सकता है!

एवं परिष्वङ्गकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः।

रेमे रमेशो व्रजसुन्दरीभिर् यथाऽर्भकः स्वप्रतिबिम्बविभ्रमः ।।९ ।।

भगवान रमापति होने पर भी व्रजसुन्दरियोंके साथ बालक जैसे अपने

प्रतिबिंबके साथ खेलता है, उसी प्रकार आलिंगन, करस्पर्श, स्नेहपूर्वक देखना, निर्मर्याद विलास तथा हास्यादि द्वारा लीला करते हैं (भाग.पु.१०।३३।१७). (९)

ते ते भक्तास्तदात्मनो न भिदाऽण्वपि वर्त्तते।

इत्यभेदे क्रीडने च दृष्टान्तं[१] शुक उक्तवान् ।।१०।।

१. शिशुप्रतिबिम्बदृष्टान्तम्.

वे सभी भक्त भगवानके स्वात्म प्रकटित स्वरूप होनेसे अणुमात्र भी उनसे भिन्न नहीं हैं. इसी अभेदको समझानेके लिए रमणका (शिशुका प्रतिबिंब के साथ खेलनेका) उदाहरण श्रीशुकदेवजीने दिया है. (१०)

लीलामात्रैर्धर्मभूतेः कामादिभिरलौकिकैः।

अबद्धस्य स्वतन्त्रस्य बाधः सर्वाश्रयस्य तैः ।।११ ।।

उनकी उस लीलामें धर्मभूत कामादि गुण भी अलौकिक ही हैं. उनके ऊपर कोई बंधन न होनेसे तथा वे स्वतंत्र होनेसे इस लीलामें कोई बाध नहीं है. (११)

नाचिन्त्यस्याप्रमेयस्य शुद्धाद्वैतस्य कश्चन।

अतो भागवतेऽप्युक्तम् 'आत्मारामोऽप्यरीरमत्' ।।१२।।

वे अचिन्त्य तथा अप्रमेयरूप होनेसे भी उनके साथ (गोपीजनोंके) अद्वैतमें कोई बाध नहीं है. अतः भागवतमें भी कहा गया है कि 'मैं मेरी आत्माके साथ ही रमण करता हुं.' (१२)

'रसो वै स' इति श्रुत्या रूपिताऽस्य रसात्मता।

'सर्वकामः[१] सर्वरस' इति धर्मत्वम् ईर्यते ।।१३।।

१. सर्वकामः सर्वगन्धः सर्वरस इति छान्दोग्ये पञ्चमप्रपाठके (खं. १८.) शाण्डिल्य-विद्यायां द्विवारमाम्नातम्.

'प्रभु रसरूप हैं' इस श्रुतिवाक्यमें भगवानकी रसात्मकताका निरूपण किया गया है. 'सर्वकामनारूप तथा सर्वरसरूप' – इस प्रकार भगवानके धर्मोंका निरूपण भी श्रुतिवचनमें किया गया है. (१३)

विरुद्धधर्माधारत्वं ब्रह्मत्वम् इति लक्षणात्।

कामादयो ज्ञानघने भूषणं न तु दूषणम् ।।१४।।

ब्रह्म सभी विरुद्ध धर्मोंके आश्रय हैं. अतः ज्ञानघन भगवानमें कामादि

भूषणरूप हैं, दूषणरूप नहीं. (१४)

शक्तिशक्तिमतोर्भेदो नैव[१] शुद्धं तदद्वयम्[२]।
तत्रत्येषु[३] तिरोभावो न धर्माणां तु[४] वस्तुषु ।।१५।।

१. भेदस्य अयं निषेधः. २. तस्माद् भेदाभावाद् हेतोः शुद्धाद्वैतं सिद्ध्यति. ३. परधामस्थेषु लीलोपयोगिषु. ४. तत्रत्यवस्तुषु इति अन्वयात् लौकिकवस्तु-व्यावृत्तिः.

शक्ति तथा शक्तिमान्में कोई भेद नहीं है. इनमें शुद्धाद्वैत ही है. परमधामके लीलोपयोगी पदार्थोंमें प्रभुके धर्मोंका तिरोभाव नहीं होता है. (१५)

अनीश्वरान् अप्रकृष्टान् तिरोहितगुणान् बहून्।
यदेच्छति प्रजायेयेति तदा कुरुते जगत् ।।१६।।

ईश्वरताहीन, न्यून कोटिके तथा जिनके गुण तिरोहित हुए हैं ऐसे अनेकों विषयोंमें 'मैं प्रजनन करुं', ऐसी भगवान इच्छा करते हैं, तब जगत उत्पन्न होता है. (१६)

ते तिरोहित तद् धर्मा बद्धाः संसारमायया[१]।
दृढाऽहंत्वात् शरीरेत्राचिराप्ते क्षणभंगुरे ।।१७।।
नाव्येकस्याम् इवारोहात् प्रपायाम् इव सङ्गमात्।
वियोक्ष्यमाणेष्वचिराद् मिलितेष्वधुनैव च ।।१८।।
तेन[२] स्त्र्यादिषु सम्बन्धं[३] कल्पयित्वा च पण्यवत्[४]।
गतागेतषु वित्तेषु ममत्वात् चिन्तयाकुलाः ।।१९।।

१. संसारहेतुभूतया. २. सम्बन्धद्वारभूतशरीरेण. ३. पत्नीत्वपुत्रत्वादि-लक्षणम्. ४. क्रय्यवस्तुषु इव गतागतेषु.

वह जीव अपनेमें भगवद्धर्मोंके तिरोहित हो जानेके कारण संसारकी हेतुरूपा मायासे बद्ध हो जाते हैं. वे इस अल्प समयसे प्राप्त हुए क्षणभंगुर शरीरमें द्रढ अहंकारवश बंधे हैं. वे जीव अविद्याग्रस्त होनेके कारण देहाभिमानवश स्त्री आदिमें संबंधकी कल्पना करते हैं, जो शीघ्र ही अलग होनेवाले हैं तथा अभी मिले हैं. उनसे हुआ संग उसी प्रकार क्षणभंगुर है, जैसे एक नौकामें लोग चढते हैं, या जैसे जल पीनेकी प्रपामें लोग एकत्रित होते हैं. विक्रयहेतु प्राप्त वस्तु जैसे कहींसे आती है तथा कहीं और चली भी जाती है, उसी प्रकार (अज्ञानवश)

आनेजानेवाले धनमें ममता रखनेके कारण जीव चिंतासे व्याकुल हो जाता है. (१७-१९)

संसक्ता देहगेहादौ अकृतार्था अतर्पणाः।

बलेना मृत्युना नीताः प्रापिताः[१] पारवश्यतः ।।२०।।

१. पुनर्जन्म प्रापिता इति अग्रिमेण अन्वयः.

अहंता-ममता द्वारा गृह तथा देहमें आसक्त अकृतार्थ ऐसे जीव बलपूर्वक मृत्यु तथा पुनर्जन्म की ओर पहोंचाए जाते हैं. (२०)

पुनर्जन्म पुनः सत्तास्तत्रत्येषु[१] गृहादिषु।

नीयमानाः पुनस्तेन[२] पापपुण्यानुरोधतः ।।२१।।

१. तज्जन्मभवेषु. २. मृत्युना.

पाप तथा पुण्यके अनुरोधवश अविद्यासंसक्त जीव बारबार गृहादिके बंधनमें आसक्त होकर पुनर्जन्मकी ओर ले जाए जाते हैं. (२१)

आपन्ना नरकं स्वर्गं नानोद्विग्ना वृथा मुहुः।

क्वचित्सुखं[१] क्वचिद् दुःखं क्वचिद् मोहमुपागताः।।२२।।

१. सुखादीनि सत्वरजस्तमो जन्यानि, क्रमात् तेषां सुखदुःखमोहस्वभावत्वं सांख्य-तत्त्वकौमुदि आदिषु प्रसिद्धम्.

वे जीव स्वर्ग, नरकको बारबार प्राप्त करके भी उद्विग्न नहीं होते हैं. कभी सुख कभी दुःख तथा कभी मोहादिको प्राप्त करते रहते हैं. (२२)

एवं परवशाः प्राप्ता जन्ममृत्युपरम्पराम्।

व्यूह्यमाना इवौघेन घटीयन्त्रम् इव श्रिताः ।।२३।।

क्रमशः परवश होकर जन्ममृत्युकी परम्परामें वे जीव ऐसे घूमते रहते हैं, मानों नहनदीके वेगसे बहाये हुए हों या नीचे-ऊपर घूमनेवाले कूपसे जल निकालनेके लिए उपयोगमें आते घटीयंत्र पर चढे हुए हों. (२३)

जीवाः क्लिश्यन्ति दुःखस्य नाशे[१] पुनरनुद्भवे।

तद्भक्तिरेव परमं कारणं हरितोषिणी ।।२४।।

१. नाशेऽनुद्भवे च कारणम् इति उत्तरेण अन्वेति. लौकिका उपायैः नाशेऽपि दुःखस्य पुनः उद्भवो दृष्ट इति उभयग्रहणम्.

इस प्रकार जीव क्लेश प्राप्त करते हैं. दुःखके सर्वथा नाशके लिए तथा

जीवको दुःख पुनः प्राप्त हो ही नहीं उस हेतुसे भगवानकी भक्ति ही भगवानके परम संतोषका कारण बन सकती है. (२४)

[१]''न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे'' ।।२५।।

१. महाभारते विष्णुनामसहस्त्रे.

(भगवानके भक्तोंको प्राप्त होती अप्राकृतताका निरूपण शास्त्रोंमें इस प्रकार किया गया है–) पुण्यकर्मवाले भगवान पुरुषोत्तमके भक्तोंको क्रोध, मात्सर्य, लोभ, अशुभ मति आदि नहीं होते हैं. (२५)

पुरुषोत्तमम् आपन्नो न पुनः दुःखम् आप्नुयात्।
प्राप्यो भक्त्यैव स तथा गीताभागवतादिषु।।२६।।

पुरुषोत्तमकी भक्ति जो प्राप्त कर लेते हैं, उन्हें कभी दुःख प्राप्त नहीं होता है. गीता–भागवतादिमें इस सिद्धांतके समर्थनमें वचन प्राप्त होते हैं. (उनमेंसे कतिपय वचनोंको ग्रंथकारने उद्धृत किए हैं, जिनका निरूपण अब किया जा रहा है.) (२६)

''नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधो द्रष्टुं दृष्टवान् असि मां यथा।।२७।।
भक्त्या त्वनन्यया शक्य अहम् एवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप''।।२८।।

वेद, तप, दान, यज्ञ आदि किसी भी साधनसे मेरे ऐसे दर्शन हो पाने संभव नहीं है, जैसे दर्शन तूने किए हैं. परंतु हे अर्जुन! हे परंतप! अनन्य भक्तिसे ही मेरा ऐसा ज्ञान, दर्शन तथा तत्त्वसे मुझमें प्रवेश कर पाना संभव है. (२७–२८)

'भक्त्याहमेकया ग्राह्यो' 'भक्त्या लभ्यस्त्वनन्यया'।
'भक्त्यैव तुष्टिम् अभ्येति विष्णुः नान्येन केनचित्' ।।२९।।

'मात्र भक्ति द्वारा ही में ग्राह्य हुं,' 'अनन्य भक्तिसे ही में लभ्य हुं', 'विष्णु मात्र भक्तिसे ही संतुष्ट होते हैं, अन्य किसी साधन से नहीं.' (२९)

'न दानं न तपो नेज्या न शौचं न व्रतानि च।
प्रीयतेऽमलया भक्त्या हरिरन्यद् विडम्बनम्' ।।३०।।

भगवानकी अमल भक्तिके अलावा दान, तप, यज्ञ, पवित्रता, व्रतादि

कोई भी साधन भगवानकी प्रसन्नताका कारण नहीं बन सकते. (३०)

'भक्त्या तुतोष भगवान् गजयूथपाय'।

इत्यादौ भक्तिरेवास्य पुरुषार्थः परो मतः।

[१]सम्यक्त्वसिद्धये ज्ञानं साधनं भक्तिसूत्रतः ॥३१॥

१.भक्तेः दार्ढ्यादिसिद्धये.

'भगवानको भक्ति द्वारा संतुष्ट करो.' इन सभी वचनोंमें भक्तिकी परमपुरुषार्थरूपता भक्तिसूत्रोंमें निरूपित हुई है. उस भक्तिको द्रढ करनेके लिए (महात्म्यज्ञान) ज्ञान साधन है. (३१)

तत् सा[१] मुख्येतरापेक्षितत्वाद् इत्थम् उपक्रमात्।

[२]ब्रह्मकाण्डन्तु भक्तौ 'तस्यानुज्ञानाय सामान्याद्'इत्यन्तम्।

भक्तेर्ज्ञानादिशेषित्वं वक्ति सम्पूर्णम् आह्निकम्[३]॥३२॥

१.(अ. १ सू. १०) सा मुख्येति भक्तिः एव मुख्या. इतरैः ज्ञानादिभिः स्वाङ्गितया तस्या एव अपेक्षितत्वात्. २.ज्ञानकाण्डः तु भक्तौ भगवत्स्वरूपानुज्ञापक-तयोपयुज्यते. याग इति कर्त्तव्यतादि अनुज्ञापकतया पूर्वकाण्डमिव. ३.भक्तिमीमांसा प्रथमाध्यायस्य द्वितीयम् आन्हिकम्.

वह भक्ति ही मुख्य पुरुषार्थ है. अन्य ज्ञान आदि अंगतया अपेक्षित हैं, मुख्यतया नहीं. वेदके ज्ञानकाण्डका उपयोग भक्त भगवानके स्वरूपज्ञानको प्राप्त करनेके लिए करता है तथा यज्ञादि सभी पूर्वकाण्डप्रोक्त कर्तव्यादि अनुज्ञापक हैं. भक्तिमें ज्ञानादि सभी शेषी हैं ऐसा भक्तिमीमांसामें कहा गया है. (३२)

पदार्थ एव न ज्ञातो यः सेव्यः स कथं भवेत्।

भक्त्यसम्पादकं ज्ञानं केवलं तु विनिन्दितम् ॥३३॥

[१]''श्रेयः स्रुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये।

तेषाम् असौ क्लेशएव शिष्यते नान्यद् यथा स्थूलतुषावघातिनाम्''॥३४॥

जिनके स्वरूपका ज्ञान ही न हो, उनका सेवन कैसे किया जा सकता है? अतः भक्तिका संपादन करनेमें ही ज्ञानका उपयोग है, स्वतंत्र होनेपर तो वह साधन व्यर्थ श्रम ही है ऐसा भागवतमें कहा गया है. 'हे विभु! आपकी भक्ति सभी प्रकारके कल्याणोंका मूल है. जो लोग उस भक्तिको छोडकर मात्र ज्ञानके लिए प्रयत्नशील होते हैं वे दुःख प्राप्त करते हैं. उन्हें तो फलके रूपमें मात्र क्लेश

ही प्राप्त होता है, और कुछ भी नहीं. जैसे चावलके दानोंको निकाल लेनेके बाद अवशिष्ट छिलके मेहनत तथा दुःखके अतिरिक्त कोई लाभ नहीं देते हैं.' (अर्थात् अब उन छिलकोंमेंसे चावलके दानें नहीं मिलते है.(भाग.पु.१०।१४।४) (३३-३४)

[१]**''नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्।**
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्'' ।।३५।।

'मोक्षकी प्राप्तिका साक्षात् साधन ऐसा निर्मल ज्ञान भी यदि भगवानकी भक्तिरहित हो तो शोभा नहीं देता है, तो फिर जो कर्म भगवानको अर्पित न किया जाता हो, वह कितना भी श्रेष्ठ हो, तो भी सर्वदा अमंगलरूप तथा दुःखदायक ही है, तो वह शोभास्पद कैसे बन सकता है?' अतः कर्म तथा ज्ञान तो भक्तिके सहायक हैं. स्वतंत्रतया तो वे कदापि मुख्य फलकी प्राप्ति करवानेवाले नहीं हो सकते हैं(भाग.पु.१२।१२।५२). (३५)

[१]**''तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।**
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन।।३६।।
योगिनाम् अपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः'' ।।३७।।

हे अर्जुन! योगी तपस्वीसे अधिक है, ज्ञानियोंसे भी अधिक माना गया है, कर्ममार्गीयोंसे भी योगी अधिक है. अतः तु योगी बन. सभी योगियोंमें भी मेरेमें अपनी अंतरात्माको स्थित करनेवाला, श्रद्धाशील होकर जो मुझे भजता है, उसे मैं उत्तम योगी जानता हुं(भग.गीता.६।४६-४७). (३६-३७)

तदेव[१] कर्मिज्ञानियोगिभ्य आधिक्यशब्दात्[२]।
प्रश्ननिरूपणाभ्याम् आधिक्यसिद्धेः[३]।
इति स्मृत्यनुसारेण शाण्डिल्यमुनिनोदितम[४]।
माहात्म्यबोधके ज्ञाने भक्तिसाधनतोचिता।।३८।।

१. भक्तेः योगादि अपेक्षया मुख्यत्वम्. २. शब्दः तु उक्तगीतावाक्यरूपः. ३. अर्जुन-भगवत्कर्तृकाभ्याम्. ४. भक्तिमीमांसा प्रथमाध्याय उक्तम्.

इन गीतामें निरूपित वाक्योंसे कर्मयोगी तथा ज्ञानयोगियोंसे भक्तका स्वरूप उत्तम सिद्ध होता है. स्मृतिवाक्योंके अनुसार ही शाण्डिल्यऋषिने भी

भगवानके महात्म्यका बोध करवानेके हेतुरूप ही भक्तिके साधनतया ज्ञानका स्वीकार किया है. (३७-३८)

''माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्न चान्यथा''।।३९।।

नारदीये पञ्चरात्रे तस्या[१] लक्षणम् ईरितम्।
''सा[२] परानुरक्तिः ईश्वरे''[३]।
इत्युक्तं भक्तिसूत्रेषु श्रीमद्भागवते तथा।।४०।।

१. मुख्यभक्तेः. २. पुरुषोत्तमे या परा (ज्ञानानन्तरं स्नेहः) सा पराभक्तिः इति स्वप्नेश्वरादयो व्याख्यातारः. ३. उत्तमं प्रेम.

महात्म्यज्ञानपूर्वक सुद्रढ, सर्वतोधिक स्नेहको ही भक्ति कहते है. उसीसे मुक्ति होती है, अन्य किसी साधनसे नहीं. नारदपंचरात्रमें भक्तिका यही लक्षण बताया गया है. 'ईश्वरमें परानुरक्ति' ही भक्ति है, ऐसा भक्तिसूत्रमें तथा श्रीमद्भागवतमें भी कहा गया है. (३९-४०)

''देवानां[१] गुणलिङ्गानाम् आनुश्रविककर्मणाम्।
सत्वएवैकमनसो वृत्तिः स्वाभाविकी तु या''।।४१।।

१. श्रीभाग.पु.३।२५।३२. गुणैः विषयैरूपरसादिभिः ज्ञायन्त इति तेषाम्. अनुश्रवो वेदः तद् उदितानी कर्माणि येषां ते देवाः तेषाम् इन्द्रियाणाम् इत्यर्थः. या सत्वे विष्णौ भगवत्येव एका स्वभावप्रवृत्ता वृत्तिः स्नेह इति यावत्. स चाऽपि निर्हेतुकः स एव भागवती भक्तिः कथ्यते. सा च सिद्धेः सालोक्यादेः श्रेष्ठेति श्लोकद्वयार्थः.

''जिससे पदार्थोंके गुण आदि जाने जा सकें, ऐसी दैवी सम्पत्तिवाली तथा जिससे वेदविहित कर्म करनेवाली इन्द्रियां निर्गुण भगवानमें स्वाभाविक-रूपसे प्रवृत्ति करवा सके, ऐसी मनकी स्वाभाविकी निष्ठा ही भक्ति है.' (४१)

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी'।
इति निष्कामनः स्नेहो भक्तिराथर्वणे तथा।।४२।।

निमित्तरहित भागवती भक्ति निश्चय ही सिद्धि प्राप्त करवानेवाली है. ऐसा निष्काम स्नेह ही भक्ति कहलाता है. (४२)

''भक्तिः अस्य भजनं तद् इहामुत्रोपाधिनैराश्येन
मनःकल्पनम्'' इति।

[1]**''चतुर्विधा भजन्ते मां'' चतुर्धेत्यधिकारिषु।**

न[2] सम्मतोर्थार्थ्यार्त्तश्च ज्ञानी जिज्ञासुरुत्तमः ।।४३।।

१. गीतायां ''चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन. आर्त्तो जिज्ञासुः अर्थार्थी ज्ञानी च भरतर्षभ इति.''७।१६ २. उत्तमतया न अभिप्रेतः सकामत्वात्.

'भक्ति अर्थात् पत्नी, गृहादिने अनासक्त होकर इनका (कृष्णका) भजन.' गीतामें चार प्रकारके भक्तोंका निरूपण भगवानने किया है. – (१)आर्त, (२)जिज्ञासु, (३)अर्थार्थी तथा (४)ज्ञानी. इन चारोंको अधिकारी बताते हुए भी इनकी उत्तमताका स्वीकार न करते हुए निष्काम भक्तिकी ही भगवानने प्रशंसा की है. (४३)

'भक्त्या[1] सञ्जातया भक्त्ये'त्येका भक्तिस्तु साधनम्।

फलात्मिका पराभक्तिर्मानसी प्रेमलक्षणा ।।४४।।

१. श्रीभाग.पु.११।३।३१. भक्त्या सञ्जातया भक्त्या विभ्रत्युत्पुलकां तनुम् इति.

'इस प्रकार साधन करते हुए प्रेमलक्षणा भक्तिका उदय होता है.' इस वचनमें भक्तिका ही साधनतया निरूपण किया गया है. अतः फलात्मिका पराभक्ति मानसी, प्रेमलक्षणा भक्ति ही है. (४४)

तनुजा वित्तजा सेवा तस्याः[1] साधनम् उच्यते[2]।

सर्वेन्द्रियैः शुद्धभावात् तत्परैः सेवनादिमा[3]।।४५ ।।

१. मानस्याः. २. श्रीभागवतादिषु. ३. तनुजा.

तनुवित्तजासेवाको उस प्रेमलक्षणा भक्तिके साधनरूपा कही गई है. सभी इन्द्रियों द्वारा शुद्धभावसे सेवामें तत्पर रहना ही तनुजा सेवा है. (४५)

तदिच्छाप्तैः[1] स्वसर्वस्वोत्थैः सेवावैभवैः परा[2]।

उभे अपि प्रमाणोक्ते प्रथमं तनुजा यथा ।।४६ ।।

१. भगवदिच्छया लब्धैः. २. वित्तजा.

भगवानकी इच्छासे प्राप्त साधन–सामग्री तथा वैभव द्वारा सेवा करना वित्तजा सेवा है. दोनों ही सेवा प्रमाणसिद्ध है. तनुजा प्रथम प्रमाणित की जाती है, जैसे कि ऋग्वेदमें वचन है.– (४६)

[1]**''तमु स्तोतारः पूर्व्यं यथा दिव(विद!) ऋतस्य गर्भं जनुषा पिपर्त्तन।**

आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे''।

[२]**''करौ हरेः मन्दिर मार्जनादिषु''।**

''शावौ करौ नो कुरुतः सपर्याम्''।

''वाणी गुणानुकथने श्रवणौ कथायाम्''।।

''करौ च तत्कर्मकरौ मनश्च''।

''गृहशुश्रूषणं मह्यं दासवद् यद् अमाया''।

''आदरः परिचर्य्यायाम्''।

१. ऋग्वेदे. १।१५६।३ २. श्रीभाग.पु.९।४।१८

'हे स्तुतिकरनेवालों! यज्ञके केन्द्र, अत्यंत प्राचीन उस विष्णुको जैसा भी तुम जानते हो, उसी रीतिसे स्तुतियोंसे तृप्त करो. इसके यश या पराक्रमको जानते हुए तुम उसका वर्णन करो. हे व्यापक देव! महान् तुम्हारी उत्तम बुद्धिको हम प्राप्त करें.' भागवतके वचनोंमें भी तनुजासेवा का निरूपण किया गया है, यथा– 'भगवानके मंदिरके मार्जनादिमें हाथोंका विनियोग हो, भगवानकी परिचर्या न करनेवाले हाथ मुर्देके हाथ हैं, भगवद्गुन्नणानुवादमें वाणी तथा उनकी कथामें कर्ण लगे रहें, हाथ भगवानकी टहल करते रहें तथा मन भगवानका स्मरण करता रहे, निष्कपटभावसे दासके समान मेरे लिए गृहसेवा करे, भगवत्परिचर्यामें आदर हो....' इत्यादि वचनोंमें तनुजासेवाका निरूपण हुआ है.

इत्यादौ [१]प्रथमा प्रोक्ता द्वितीयाप्युच्यते[२] यथा।

'सर्वलाभोपहरणं'[३]''पत्रं पुष्पं फलं''[४] तथा।।४७।।

१. तनुजा, २. वित्तजा. ३. श्रीभाग.पु.११।११।३५. ४. ''पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छती''ति भगद्वाक्यम्.

इन सभी वचनोंमें तनुजासेवा का निरूपण किया गया है तथा वित्तजा सेवा भी निरूपित ही है. 'जो कुछ भी प्राप्त हो जाए उसे मुझमें समर्पित कर दे तथा दास्यभावसे मुझमें आत्मनिवेदन कर', 'पत्र, पुष्प, फल,फूल जो भी मुझे प्रेमपूर्वक समर्पित करते हैं.....' – इन वचनोंमें वित्तजासेवाका निरूपण किया गया है. (४७)

''तज्जन्म तानि कर्माणि तदायुः तन्मनो वचः।
नृणां येन हि विश्वात्मा प्रीयते हरिरीश्वर''।।४८।।

''मुकुन्दसेवौपयिकं स्पृहा हि नः''।

''भर्त्ता[1] सन् म्रियमाणो बिभर्ति''।

''योगक्षेमं[2] वहाम्यहम्''।

इत्यादावपरोक्तैते[3] एकीभूय सुदुर्लभाम्।

[4]अकृत्यशेषां कुर्वाते [5]दशमीं प्रेमलक्षणाम्।।४९।।

सर्वार्पणात् प्रवृत्तस्य सेवने प्रेम निर्मलम्।

भवेद् एव गुणाम्भोधौ हरौ स्याद् मानसी ततः।।५०।।

१. तैत्तिरीयश्रुतिः.१४।१ २. गीता.९।२२ ३. तनुजवित्तजासेवा. प्रथमा द्विवचनं. ४. नास्ति कर्त्तव्यशेषो यस्यां ताम्. ५. श्रवणादि नवविध भक्तिभ्यः पराम्.

देवता कहते हैं कि, 'भगवान मुकुन्दकी सेवामें उपयुक्त होनेवाला जन्म धन्य है. हमारी इच्छा है कि ऐसा जन्म हमें मिले.' इत्यादि वचनोंसे वित्तजा सेवा कही है. यह तनुजा एवं वित्तजा सेवा, दोनों मिलकर परम दुर्लभ, जिसे प्राप्त करलेनेपर कोई कर्तव्य शेष नहीं रहता, ऐसी प्रेमलक्षणा श्रवणादि नवधाभक्तिसे आगे दशमी मानसीसेवाको सिद्ध करती है. जो सबकुछ भगवदार्पण कर उनकी सेवामें प्रवृत्त हो जाता है, उसका गुणनिधान भगवानमें प्रेम होना ही चाहिए. प्रेमसे मानसी सिद्ध होती है. (४९-५०)

[1]''एवं प्रवृत्तस्य विशुद्धचेतसः तद्धर्मएवात्मरुचिः प्रजायते'' इति।

''इत्यच्युतांघ्रिं[2] भजतोऽनुवृत्या भक्तिर्विरक्तिः भगवत्प्रबोधः'' इति।

१. श्रीभाग.पु.१।५।२५ २. श्रीभाग. स्कंध.११।२।४३

भागवतमें ऐसे भगवदीय एवं सेवामें प्रवृत्त नारदके चित्तकी विशुद्धि हो जानेका निरूपण इस प्रकार गया है - 'जब दोषोंका नाश हुआ तब भगवद्धर्ममें रुचि उत्पन्न हुई'. 'इस प्रकार एक-एक वृत्ति द्वारा भगवानके चरणकमलोंकी जो भक्ति करते हैं, उस भक्तको वैराग्य तथा भगवत्स्वरूपका ज्ञान अवश्य प्राप्त होता है.' ऐसा भी भागवतके एकादशस्कंधमें कहा गया है.

अवान्तरे फले द्वे स्तः प्राङ्मुख्यफल[1]तोनयोः[2]।

संसारदुःखविलयो बृहदात्मैक्यबोधनम्[3]।।५१।।

१. मानसीतः. २. उक्तसेवयोः. ३. अक्षरब्रह्मणा सह जीवाऽभेदज्ञानम्.

मानसीसेवाके दो अवांतर फल है. (१) संसारदुःखकी निवृत्ति तथा (२) अक्षरब्रह्म तथा जीवात्माके ऐक्यका बोध. (५१)

[१]''न हि भगवन्नघटितम् इदं त्वद्दर्शनात् नृणाम् अखिलपापक्षयः।
यन्नाम सकृद्ग्रहणात् पुल्सकोऽपि विमुच्यते संसारात्'' ।।५२।।
''अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।
जनयत्याशु वैराग्यं ज्ञानं यत् तद् अहैतुकम्'' ।।५३।।

(इन दोनों अवांतरफलोंकी प्राप्तिमें प्रमाण हैं-) चित्रकेतु कहते हैं- ''यह असंगत नहीं कि, आपके दर्शनसे मनुष्यके सभी पापोंका क्षय हो जाता है. यह कोई अघटित घटना नहीं है. यदि कोई एकबार भी आपके नामका श्रवण भी करले, वह नीच, चांडाल हो तो भी संसारसे मुक्त हो जाता है''(भाग.६।१६।४४ .चित्रकेतुः). अहैतुकी तथा अव्यवहित जो भक्ति पुरुषोत्तममें है, उससे वैराग्य तथा ज्ञान त्वरित ही उत्पन्न होते हैं.' (५२-५३)

''मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते'' ।।५४।।

भगवान भी गीतामें आज्ञा करते हैं, 'जो अव्यभिचरित भक्तियोग द्वारा मेरा सेवन करते हैं, वे प्रकृतिके सभी गुणोंका उल्लंघन करके ब्रह्मरूप हो जाते हैं.' (५४)

इत्युक्तो [१]भक्तितो बन्धनाशो ब्रह्मात्मबोधनम्।
संसारोऽविद्यया शक्त्या कृतः [२]पूर्वं प्रवृत्तये[३]।।५५।।
[३]स्वरूपं विस्मरन् मूढोन्तः[४]प्राणेष्विन्द्रिये तनौ।
क्रमाद् अध्यासतो वेत्ति देवदत्तोऽहम् इत्यसौ ।।५६ ।।
देहसम्बन्धिगेहादौ ममत्वेनानुषज्जते।
अहं-ममात्मकस्तर्हि संसार इति बुध्यते ।।५७ ।।

१. द्विविधसेवातः. २. सृष्ट्यारम्भे. ३. अन्यथा ब्रह्मांशानाम् इत्थं प्रवृत्त्य-सम्भवात् इतिभावः. ३. स्वरूपाज्ञानम् अध्यासचतुष्टयञ्च इति पञ्चाविद्यापर्वाणि. ४. अन्तःकरणे.

भगवानने सृष्टिके उत्पत्तिकालमें अपनी अविद्याशक्तिसे जीवोंकी विषयोंमें प्रवृत्ति करवानेके लिए संसार बनाया है, जिससे जीव अपने स्वरूपको

भूलता हुआ, मोहग्रस्त हुआ क्रमशः अंतःकरण, प्राण, इन्द्रिय तथा देहमें अध्याससे अंतःकरणादिरूपमें ही इस भ्रमसे मैं देवदत्तादि नामवाला हुं, ऐसा जानता है तथा देहके संबंधी गृहादिमें ममतासे आसक्त हो गया है. अतः जीव द्वारा अविद्यासे कल्पित संसार अहंता-ममतारूप है, ऐसा समझा जाता है. (५५-५७)

सर्वात्मना प्रवृत्तस्य सेवनायां निरन्तरम् ।

देहादीनां तदीयत्वभावनाद् अहमो[१] हतिः ।।५८।।

१. अहन्तायाः.

प्रभुकी सेवामें संपूर्ण आत्मासे प्रवृत्त होनेवाले देहमें भगवदीयपनेकी भावना होनेसे अहंता नष्ट हो जाती है. (५८)

तन्मूलिका तु ममता विहताऽहंकृतेर्हतेः ।

[१]''मामेव ये प्रपद्यन्ते मायाम् एतां तरन्ति ते'' ।।५९।।

अहंतामूलकममता भी अहंताके नष्ट होनेपर नष्ट हो जाती है. जैसा कि भगवानने गीतामें कहा है-'जो मेरी शरणमें आते हैं, वे मेरी मायाको पार कर जाते हैं' (भग.गीता.७।१४) (५९)

अविद्यानाश इत्युक्तो भक्तानां स्वप्रपत्तितः[१] ।

संसारकारणलयाद् न[२] तस्य[३] पुनरुद्भवः ।।६०।।

१. शरणागतितः. २. अविद्यानाशात्. ३. तस्य संसारस्य.

भक्तके प्रपन्न होनेपर अविद्याका नाश होना भगवानने कहा है. अविद्या ही संसारको उत्पन्न करनेमें कारणरूपा है. उसका नाश हो जानेसे संसार पुनः उत्पन्न होता ही नहीं है. (६०)

अविद्या[१]कालकर्मादि नैव शक्नोति बाधितुम् ।

एकान्तभक्त्येकनिष्ठं[२] जनमेतद् इति स्फुटम् ।।६१।।

१. कर्तृपदम् इदम्. आदिशब्देन देशविशेषादयः. २. एकोऽन्तो निश्चयो अत्र इति.

अविद्या, काल, कर्म आदि भगवानकी ऐकान्तिक भक्तिमें निष्ठ भक्तको कोई बाधा नहीं पहोंचा पाते हैं, यह निश्चय है. (६१)

संसारो मायया मिथ्या भ्रमो मध्येऽन्तरायकृत् ।

ब्रह्मज्ञाने जवनिका तन्नाशे ब्रह्मविद् भवेत् ।।६२।।

माया जनित संसार, मिथ्या तथा ब्रह्मज्ञानमें अंतरायरूप है. ब्रह्मज्ञान द्वारा उस संसाररूपी अंतरायके नष्ट होनेपर जीव ब्रह्मवेत्ता बन जाता है. (६२)

सर्पज्ञाने हते रज्जु ज्ञानं स्यात् तत्कृतं[1] भयम् ।

नश्येद् एव तथैवेदं[2] श्रीभागवत ईर्यते ।।६३ ।।

१. नश्येद् एवं इति उत्तरेण इदम् अन्वेति. २. सर्पस्थाने अहन्ता रज्जुस्थाने अक्षरात्मा जीवः. संसारभ्रमनाशे स्वात्मनि प्रपञ्चे च अक्षरब्रह्मात्मकता प्रतीतिः.

जैसे रज्जुका ज्ञान हो जानेपर सर्पकी भ्रांति नष्ट हो जानेसे भ्रान्तिजन्य भय भी नष्ट हो जाता है, उसी प्रकार भागवत द्वारा भगवानकी भक्तिके सिद्ध हो जानेपर सर्पकी तरह भ्रांतिमूलक अहंताके नष्ट हो जानेपर तथा रज्जुके समान अक्षरात्मक जीवका बोध हो जानेपर संसाररूपी भ्रमका नाश तथा अपनेआपमें अक्षरात्मकताकी प्रतीति जीवको हो जाती है. इस अवस्थाका निरूपण करते हुए भागवतमें कहा गया है– (६३)

[1]''यथा घनोऽर्कप्रभवोऽर्कदर्शितो [2]ह्यर्कांशभूतस्य च चक्षुषः तमः[3]।

एवं त्वहं[4] ब्रह्मगुणस्तदीक्षितो[5] ब्रह्मांशकस्यात्मन[6] आत्मबन्धनः''।।६४।।

१. श्रीभाग.पु.१२।४।३२–३३–३४ २. सूर्याधिभौतिकरूपस्य. ३. सूर्यदर्शन–प्रतिबन्धकः. ४. अहंकारः. ५. भगवत्कृतः. ६. जीवस्य.

''देखो सूर्यके किरण पृथ्वीसे जलको खींचते हैं और वे मेघरूप आकाशमें रहते हैं. वही मेघ जिनका सूर्य अधिदेव है, ऐसे नेत्रोंको सूर्यके दर्शनमें प्रतिबंधक बनते हैं, ऐसा तो सभीका अनुभव है. इसी तरह अहंकार भी ब्रह्मका गुण है, अर्थात् उनका कार्यभूत है तथापि ब्रह्म भी प्रकाशित ऐसे जीवके ब्रह्मदर्शनमें प्रतिबंधक बनता है'' (६४)

''घनो यदार्कप्रभवो विदीर्यते चक्षुः[1] स्वरूपं रविम् ईक्षते तदा ।

यदा ह्यहंकार उपाधिरात्मनो[2] जिज्ञासया नश्यति तर्हि अनुस्मरेत्'' ।।६५ ।।

१. कर्तृ. २. भगवतः.

जब सूर्यसे उत्पन्न हुआ मेघ विदीर्ण होता है, तब नेत्र अपने अंशीरूप सूर्यको देख पाता है. उसी प्रकार जब जीवकी उपाधिरूप अहंकार ब्रह्मजिज्ञासा द्वारा नष्ट होता है, तब जीवको अपने अंशी ब्रह्मका अनुस्मरण हो जाता है.

(६५)

''यदैवम् एतेन विवेकहेतिना मायामयाऽहंकरणात्मबन्धनम् ।

छित्त्वाच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकम् अङ्ग[१] सम्प्लवम् ।।६६ ।।

१. आत्यन्तिकसम्प्लवो मोक्षः.

उपरोक्त विवेकरूपी शस्त्रद्वारा आत्माको बंधन करनेवाला तथा आवृत्त करनेवाला मायामय अहंकारका छेदन करके परिपूर्ण ऐसे भगवानको प्राप्त करके जीव भगवद्रूप होकर रहता है, तब हे प्रिय राजा! ऐसी अवस्थाको आत्यन्तिक प्रलयरूप मोक्ष कहते है. (६६)

धामाप्तिः संसृतेर्नाशे ब्रह्मत्वं त्वक्षरात्मता ।

तत् षष्ठे पञ्चमेऽध्याये द्वादशस्कन्ध उच्यते ।।६७ ।।

ब्रह्मत्वका अर्थ यहां अक्षरात्मकता प्राप्त करना है तथा संसारके नष्ट होनेपर उस धामकी प्राप्ति होती है. यह निरूपण द्वादशस्कंधके पांचवे तथा छठे अध्यायोंमें प्राप्त होता है. (६७)

''त[१] एतद् अधिगच्छन्ति विष्णोर्यत् परमं पदम् ।

अहंममेति दौरात्म्यं न येषां देहगेहयोः''।।६८ ।।

विष्णु भगवानका यही वास्तविक स्वरूप है. यही आपका परम पद है. जिनके अंतःकरणमें शरीरके प्रति अहंभाव नहीं है अथवा तत्संबंधी गृहादि पदार्थोंमें ममता भी नहीं है, ऐसे लोगोंको वह परमपद प्राप्त होता है(१. भाग.पु. १२।६।३३). (६८)

''अहं[१] ब्रह्म परं धाम ब्रह्माऽहं परमं पदम् ।

एवं समीक्षन् अत्मानम् आत्मन्याधाय निष्कले'' ।।६९ ।।

आप इस प्रकार चिंतन करो; 'मैं ही सर्वाधिष्ठान परब्रह्म हुं, सर्वधिष्ठान ब्रह्म मैं ही हुं.' इस प्रकार आप अपनेआपको वास्तविक एकरस अनंत अखंड स्वरूपमें स्थित कर लो(भाग.पु.१२।५।११). (६९)

''उपाधिनाशे[१] विज्ञाने ब्रह्मात्मत्वावबोधने ।

गङ्गातीरस्थितो[२] यद्वद् देवतां[३] तत्र[४] पश्यति।।७० ।।

१. सार्धश्लोकोऽयं सिद्धान्तमुक्तावलीस्थः. २. गङ्गायाः परमभक्तः. ३. मूर्तिमतीं गङ्गाम्. ४. प्रवाहादौ.

श्रीमहाप्रभुजी सिद्धांतमुक्तावलीग्रंथमें आज्ञा करते हैं– 'गंगातीरमें स्थित जीव अभेदबुद्धि करनेपर जैसे गंगादेवीको वहां देख पाता है, उसी प्रकार अविद्यारूपी उपाधिका नाश होनेपर जीव ब्रह्मका आत्मत्वेन बोध प्राप्त कर लेता है.' (७०)

''तथा कृष्णं परं ब्रह्म स्वस्मिन् ज्ञानी प्रपश्यति''।
इत्युक्तं श्रीमदाचार्यैः जीवन्मुक्तिरियं परा ।।७१ ।।

'उसी प्रकार ज्ञानी अपनेआपमें परब्रह्म श्रीकृष्णको देख लेता है' – इन वचनों द्वारा आचार्यचरणने उत्तमोत्तम जीवन्मुक्तिका निरूपण किया है. (७१)

अक्षरं जानतः सर्वं[1] भवेद् अक्षररूपता ।
''ब्रह्मविद् ब्रह्मैव भवती''ति श्रुत्या तथोदितम् ।।७२।।

१. प्रपञ्चम्.

सर्व जगतको अक्षरब्रह्मतया जाननेवाला अक्षरब्रह्मरूप ही हो जाता है. श्रुतिने ब्रह्मवेत्ता ब्रह्म ही हो जाता है, ऐसा कहा है. (७२)

आनन्दादितिरोभावाद् जीवभावो विचारितः।
भूयो भक्त्यानन्दलाभाद् ऐश्वर्यादेश्च सम्भवात् ।।७३ ।।

आनंदांशके तिरोधानसे ही जीवभाव प्राप्त होता है. भक्ति द्वारा आनंदकी प्राप्ति हो जानेपर ऐश्वर्यादि षड्गुण भी शीघ्र ही सिद्ध हो जाते हैं. (७३)

[1]श्रुते ''रसं ह्येवायं[2] लब्ध्वानन्दी भव''त्यतः ।
''अपि[3] वा तमादेशम् अप्राक्षो येनाश्रुतं श्रुतं
भवत्यमतं मतम् अविज्ञातं विज्ञातम्''।
इति स्याद् ब्रह्मता धामत्वात् कृष्णस्फूर्तिरुज्वला ।।७४ ।।

१. ब्रह्मवल्लीश्रुतेः. २. अयं तिरोहितानन्दोऽपि जीवो रसं आनन्दरूपं परं लब्ध्वा पुनः आनन्दांशवान् भवति. ३. छान्दोग्य अष्टमाध्यायश्रुतिः.

श्रुतिमें 'इस रसको प्राप्त करके ब्रह्मानंदी हो जाओ', 'उनका ज्ञान प्राप्त करके अश्रुत भी श्रुत हो जाता है, अज्ञात भी ज्ञात हो जाता है', – इन वचनों द्वारा तिरोहित आनंदरसका जीवमें आविर्भाव हो जानेसे वह आनंदांशवान् बन जाता है ऐसा निरूपण किया गया है. यहां अक्षरब्रह्म भगवानके धामरूप होनेसे

धामी परब्रह्म श्रीकृष्णकी स्फूर्ति जीवको हो जाती है. (७४)

स्वयं तदात्मना[१] तेन[२] प्रपञ्चोऽप्यक्षरात्मकः।

सर्वोऽपि शक्यते द्रष्टुम् अबाध्यज्ञानचक्षुषा।।७५।।

१. अक्षररूपेण. २. जीवन्मुक्तेन.

जीव स्वयं अक्षरात्मक होनेसे तथा प्रपंच भी अक्षरात्मक होनेसे संपूर्ण जगतको अबाधित ज्ञानचक्षुओं द्वारा अक्षरात्मक देखपाना आनंदांशके प्रकट हो जानेपर जीवके लिए संभव हो पाता है. (७५)

सर्वं ब्रह्मात्मकं पश्यन् सर्वत्राविहता[१] हरेः।

लीला विलोकयन् तास्ता न किञ्चिदपि काङ्क्षति।।७६।।

१. विघातशून्याः.

वह सबको ब्रह्मात्मक देखता हुआ तथा सर्वत्र हरिकी अबाधित लीलाओंको देखता हुआ, कुछ भी नहीं चाहता है. (७६)

''आत्मारामाश्च[१] मुनयो[२] निर्ग्रन्था[३] अप्युरुक्रमे।

कुर्वन्त्यहैतुकीं भक्तिम् इत्थम्भूतगुणो हरिः'' ।।७७।।

१. श्रीभाग.१।७।१०. २. मुनयो मननशीला भगवद्भजनयुक्ताश्च. प्रथमस्कन्धे सूतोक्तिः इयम्. ३. अविद्याग्रन्थिरहिताः.

श्रीमद्भागवतमें भी जीवकी ऐसी अवस्थाका निरूपण करते हुए कहा गया है कि 'आत्मरमण करनेवाले, मनन करनेवाले तथा अहंता-ममताकी ग्रंथिरहित भक्त उरूक्रम भगवानकी अलौकिक निष्काम भक्ति करते रहते है. क्योंकि वे हरि ऐसे गुणोंवाले है कि जो गुण प्रवृत्ति तथा निवृत्ति स्वभाववाले सभीको आनंद देते हुए अपनी ओर खींच लेते हैं.' (७७)

तत्तल्लीलापरं पश्यन् सर्वत्र पुरुषोत्तमम्।

शब्दान् तद्वाचकान् शृण्वन्[१] सदा चरति निःस्पृहः।।७८।।

१. विरुद्धांशपरिहारमात्रेण शब्दमात्रं तत्तत् लीलाविशिष्टभगवद् अभिधायकम् अवगच्छन्.

भगवान पुरुषोत्तमको ही उन उन रूपोंमें लीला करते हुए देखकर तथा उन उन नामों द्वारा भगवानका ही श्रवण करता हुआ निःस्पृह व्यक्ति सदा विचरण करता रहता है. (७८)

कृष्णप्रेमामृतास्वा[1]दाद् आरभ्यैहिकवैभवम्[2]।
तृणप्रायाणि गणयन् मोक्षान्तानि सुखान्यपि ।।७९।।
विकलोऽयं दाम्भिकोऽयं महात्मायं हरेर्जनः।
इति नाना जनोक्तिभ्यो न शोचति न हृष्यति ।।८०।।

१. हेतोः. २. ऐहिकवैभवं मानुषानन्दम् आरभ्य.

कृष्णप्रेमामृतका आस्वादन करता हुआ, मानुषानंदके हेतुरूप ऐहिक वैभवोंसे लेकर मोक्षपर्यन्तके सभी सुखोंको तुच्छ मानता हुआ भक्त, यह पागल है, अहंकारी है, ऐसी अनेक लोगों द्वारा बोली जाती बातोंका शोक तथा हर्ष नहीं करता है. (७९-८०)

सख्या स्वस्वामिना स्वाति प्रियेण हरिणा सदा।
'भगवता सह संल्लाप' इत्याद्युक्तदशां[1] गतः ।।८१।।

१. वेणुगीतसुबोधिनीस्थगाथोक्तदशाम्.

वह भक्त भगवानके साथ संलाप, सख्यभाव आदिको प्राप्त करके (भागवतमें कथित) उक्तदशा को प्राप्त करता है. (८१)

''क्वचिद् रुदन्त्यच्युतचिन्तया क्वचिद्
हसन्ति नन्दन्ति वदन्त्यलौकिकाः।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः''।।८२।।

[1]''शृण्वन् सुभद्राणि रथाङ्गपाणेः जन्मानि कर्माणि च यानि लोके।
गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेद् असङ्गः।।८३।।

१. श्रीभाग.पु.११।२।३९-४१. एतेत्रयोऽप्यत्र ज्ञेयाः.

भक्तको प्राप्त होती ऐसी अवस्थाका निरूपण भागवतके वेणुगीतमें इस प्रकार किया गया है – 'कभी वह चिंता करता है कि अभी तक भगवान नहीं मिले. अब क्या करुं? कहां जाउं? किससे पूछुं? मुझे आपकी प्राप्ति कौन करवायेगा? ऐसा विचार करते हुए वह रोने लगता है. तो कभी सामने ही प्रभु बिराज रहे हैं, ऐसी स्फूर्ति होनेपर, में तो व्यर्थ ही रो रहा हुं, प्रभु तो यहां ही हैं, ऐसा सोचकर हंसने लगता है. कभी प्रभु स्वाधीन हैं, ऐसा सोचकर आनंदमग्न हो जाता है तो कभी लोकातीतभावोंमें स्थित होकर भगवानके साथ बातें करने

लगता है. कभी मानों भगवानको सुनाता है, ऐसे उनके गुणोंका गान करने लगता है, तो कभी उन्हें प्रसन्न करनेके लिए नाचने-गाने लग जाता है. कभी आपके दर्शन न होनेपर आपको ढूंढने लग जाता है. तो कभी-कभी आपके साथ एकाकार होकर आपकी सन्निधिमें स्थित होकर परम शांतिका अनुभव करता हुआ चुप हो जाता है.''(श्रीभाग.पु.११।३।३२)

''चक्रपाणि प्रभुके जो लोकमें गाए गए जन्म व चरित्र हैं, उनको सुनता हुआ तथा जन्म, प्रभुके चरित्र आदिसे संबंधित अर्थवाले नंदनंदन गोवर्धनधर आदि नामोंका गान करता हुआ लज्जारहित तथा संगरहित होकर वह विचरण करता रहे.' (८२-८३)

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः।
हसत्यथो रोदिति रौति गायति उन्मादवन् नृत्यति लोकबाह्यः ।।८४।।

जो ऐसा व्रत ले लेता है, उसके हृदयमें अपने परम प्रियतम प्रभुके नामोंके कीर्तनसे प्रेमका अंकुर अंकुरित होनेपर उसका चित्त द्रवित हो जाता है. अब वह साधारण लोगोंकी स्थितिसे, मान्यताओंसे, धारणाओंसे पर हो जाता है तथा दंभसे नहिं अपितु स्वभावसे ही मानों मतवाला होकर हंसने लगता है, तो कभी रोने लगता है. कभी ऊंची आवाजसे चिल्लाकर भगवानको बुलाने लगता है तो कभी मधुर स्वरोंसे उनके गुणोंका गान करने लग जाता है. कभी नृत्य भी करने लगता है. (८४)

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दिशो द्रुमादीन् ।
सरित् समुद्रांश्च हरेः शरीरं यत्किञ्च भूतं प्रणमेद् अनन्यः[१]''।।८५।।

१. भगवद्व्यतिरिक्त मानशून्यः. न विद्यते अन्यो यस्य सः अनन्यः, श्रीकृष्णचरणनिष्ठ इत्यर्थः.

हे राजन्! यह आकाश, वायु, अग्नि, जल, पृथ्वी, ग्रह-नक्षत्र, प्राणी, दिशाएं, वृक्ष-वनस्पति, नदी, समुद्र सभी भगवानके शरीर हैं. सभी रूपोंमें भगवान ही प्रकट हैं ऐसा समझकर जो कुछ भी उत्पन्न हुआ है, उन्हें अनन्यभावसे-भगवद्भावसे प्रणाम करता है. (८५)

'गृहीत्वापीन्द्रियैरर्थान्' इति आरभ्य
'स भवति भागवतप्रधान उक्त' इति अन्तम् ।

'कृष्णग्रहगृहीतात्मा न वेद जगद् ईदृशम्'।

इयमेव परा भक्तिः मानसीत्यभिधीयते ।।८६ ।।

'इन्द्रियों द्वारा अर्थको ग्रहण करके भी' से आरंभ करके 'वही भक्तोंमें प्रधान हैं' तथा 'कृष्णके आश्रयका ग्रहण करलेनेवाला भक्त इस जागतको जानता ही नहीं है' – इन वचनोंमें कथित भक्ति ही परा भक्तिरूपा मानसी भक्ति कहलाती है. (८६)

एतत् सिद्धौ पुनः किञ्चित् कर्तव्यं नावशिष्यते ।

[1]''चेतस्तत्प्रवणं सेवे''त्याचार्यैः लक्षणं [2]कृतम्।।८७ ।।

१. चेतसः तस्मिन् भगवति प्रवणं (प्रवणत्वं) सूच्यामिव सूत्रस्य. भगवत्प्रवणं चेत एव सेवेत्यपरे. २. सिद्धान्तमुक्तावल्यां कृतम्.

अतः सिद्ध होता है कि जीवका अन्य कोइ भी कर्तव्य अवशिष्ट रह नहीं जाता है. इसीलिए आचार्यचरणने 'चित्तका कृष्णमें प्रवण हो जाना ही सेवा है.' ऐसा पराभक्तिका लक्षण कहा है. (८७)

विट्ठलेशैः सङ्गृहीतं[1] वक्तुं तल्लक्षणं[2] यथा ।

तामेव आह व्रजस्थानां श्रीगोपीजनवल्लभः ।।८८ ।।

१. ता नाविदन्निति वचनम्. २. मानसीलक्षणम्.

श्रीगुसांईजीने भी आचार्यचरण द्वारा संगृहीत मानसीके लक्षणका विवरण करते हुए सिद्धांतुमुक्तावली ग्रंथकी टीकामें इस प्रकार कहा है कि उन व्रजमें स्थित श्रीगोपीजनवल्लभमें ही चित्तका स्थिर हो जाना मानसी है, जिसका विवरण करते हुए आपने भागवतके अधोलिखित श्लोकोंमें निरूपित व्याख्याको भी उद्धृत किया है. (८८)

[1]''ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।

यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे'' ।।८९।।

१. श्रीभाग.पु.११।१२।१२. गोप्यः.

'जैसे श्रेष्ठ मुनिगण समाधिमें तथा गंगा आदि नदियां समुद्रमें मिल जानेपर नामरूपविहीन हो जाती हैं, उसी प्रकार वे गोपीजन परम प्रेम द्वारा मुझमें इतनी तन्मय हो गई हैं कि उन्हें इस लोक–परलोक, शरीर तथा अपने सांसारिक पति, पुत्र आदिकी भी सुधबुध नहीं रही.' (८९)

[१]एतत् प्रकारा बहवोऽदर्श्यन्ताऽप्राकृताग्निभिः[२]।
स्वानुभूत्येकवेद्या सा वक्तुं शक्येत किं मया ।।९०।।

१. फलरूपभक्तिप्रकाराः. २. श्रीमदाचार्यैः.

ऐसे भक्तिके अनेक प्रकार अप्राकृत अग्निस्वरूप श्रीमहाप्रभुजीने दिखाए है. ऐसी भक्तिका अनुभव तो मात्र स्वानुभव से ही किया जा सकता होनेसे अधिक मैं क्या कहुं? (९०)

एवं विहरतो[१] देहः पतेत् यदि तदिच्छया।
परमानुगृहीतस्य देहोऽपिस्याद् अलौकिकः ।।९१।।
आत्माऽभिन्नो महानन्दो हरेः चरणरेणुजः।
देहम् आहादिमस्कन्धे द्विविधं[२] विधिनन्दनः[३]।।९२।।

१. मानसी सम्पन्नस्य. २. प्राकृत अप्राकृतभेदेन. ३. नारदः.

इस प्रकार विचरते हुए परम कृपास्पद भक्तके देहका यदि भगवद् इच्छासे विलय हो भी जाए, तो उसे अलौकिक देहकी प्राप्ति होती है, जो आत्मासे अभिन्न महान्, आनंदरूप एवं भगवच्चरणरजसे निष्पन्न होता है. (९१-९२)

''प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्।
प्रारब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिकः'' ।।९३।।
निगुर्णः प्राकृतः सोऽस्मात् शून्यः[१] पुण्यैश्च पातकैः।
सगुणात् कर्मबद्धान्नः शरीराद् व्यतिरिच्यते ।।९४।।

१. ''एतङ्ह वाव न तपति किम् अहं साधु नाकरवं किम् अहं पापमकरवम्'' इत्यादिश्रुतिभ्यः.

नारदजीने ऐसे द्विविध देहोंका निरूपण करते हुए कहा है- 'ब्रह्माजीका दिन जब समाप्त होता है, तब इस जगतको तिरोहित करके भगवान समुद्रके जलमें शयन करते हैं. उस समय उनके हृदयोंमें शयन करनेकी इच्छासे इस समग्र सृष्टिको तिरोहित करके ब्रह्माजी जब प्रवेश करने लगे तब उनके श्वास द्वारा मैं भी उनके हृदयमें प्रविष्ट हो गया.' (भाग.पु.१।६।२९) उपरोक्त विवरण तथा तदुपरांत किए गए निरूपणमें नारदजी कहा है कि शुद्ध भगवदीय देह पुण्य-पापरहित तथा इस प्राकृत, सगुण एवं कर्मबद्ध देहसे भिन्न ही होता है. (९४)

''जहर्गुणमयं[1] देहं सद्यः प्रक्षीणबन्धनाः''[2]।

इत्युक्ता निर्गुणप्राप्तिः तासां सुव्यज्यते यतः ।।९५ ।।

१. श्रीभाग.पु.१०।२९।१२. २. रासपञ्चाध्याय्याम् अन्तर्गृहगता गोप्यः.

अन्तगृहगता गोपियों द्वारा गुणमयदेहके त्यागका वृत्तांत भी भागवतमें इस प्रकार निरूपित है– 'हे मुनि! ये अन्तर्गृहगता गोपीजन कृष्णको ब्रह्मरूप नहीं जानती थी, परंतु उन्हें अपने पतिके रूपमें ही जानती थी, तो फिर गुणबुद्धिवाली होनेपर भी गुणोंसे निवृत्त होकर उनके संसारका नाश कैसे हुआ?' – इस वचनमें स्नेह द्वारा उन्हें निर्गुणताकी प्राप्ति होनेका निरूपण किया गया है. (९५)

[1]सूत्रेष्वेतत् [2]फलाध्याये स्पष्टत्वेन प्रपञ्चितम्।

[3]''विवक्षितगुणोपपत्तेश्च''।

इत्याद्यध्यायान्तरेऽपि तद् विनिर्णीयते श्रुतेः[4]।।९६ ।।

१. ब्रह्मसूत्रेषु. २. तुर्याध्याये चतुर्थपादे. ३. ब्रह्म.सूत्र.१।२।१. विवक्षिता लोकान्तरे तादृशरूपप्राप्तिः, सा प्रकृतेः उपपद्यत इत्यर्थः. ४. एवमितः प्रेत्याभिसम्भविता–स्मीत्यादिभ्यो विषयवाक्यरूपाभ्यः श्रुतिभ्यः इत्यर्थः.

ब्रह्मसूत्रके फलाध्यायान्तर्गत सूत्रोंमें स्पष्टतया निर्गुण देहलाभ होनेका निरूपण विस्तारसे किया गया है तथा प्रथमाध्यायके द्वितीयपादके 'विवक्षितगुणोपपत्तेश्च' सूत्रमें भी निर्गुण देहलाभ होना कहा गया है तथा लोकान्तरीय देहभोग्यफल प्राप्तिरूप जो विवक्षित गुण है, उसकी प्राकृत भगवदीय शरीरमें भी संगति कही गई है. (९६)

[1]''परंब्रह्मैतद् ध्यायति रसति भजति सो अमृतो भवति''।

[2]''ब्रह्मसंस्थो अमृतत्वम् एति''।

[3]तत्संस्थस्य अमृतत्वोपदेशात्''[4]।

[5]''मयि भक्तिर्हि भूतानाम् अमृतत्वाय कल्पते''।

इत्यादावमृतत्वं त्वप्राकृताकार उच्यते ।।९७ ।।

१. आथर्वणश्रुतिः. २. छान्दोग्यश्रुतिः. ३. संस्था भक्तिः. ४. भक्ति–मीमांसासूत्रम्.१।३. ५. श्रीभाग.पु.१०।८२।४५ कुरुक्षेत्रसमागमप्रसङ्गे.

'परब्रह्मका जो ध्यान करता है, रस लेता है, भजन करता है, वह अमृत हो जाता है', 'ब्रह्ममें स्थिति होनेपर अमृत हो जाता है', 'अमृतके उपदेशसे वह

वहां स्थित हो जाता है', 'मेरी भक्ति ही जीवोंको अमृतत्वकी प्राप्ति करवा देनेवाली है'– 'तत्संस्थस्य' इत्यादि भक्तिमीमांसासूत्रमें भक्तके अमृतत्वके उपदेशको कहा गया है, एवं भागवतमें भगवान गोपियोंसे कहते हैं कि प्राणियोंकी मुझमें भक्ति अमृतत्वके लिए सिद्ध होती है. इन सभी वचनोंमें अमृतत्वको अप्राकृताकार कहा गया है. (९७)

दुःखैर्जन्मजरामृत्युमोहसंदोहदोहदैः।
रहिते महितेऽन्वर्थाऽमृतत्वम् इति तत्र वाक् ।।९८।।

जन्म, जरा, मृत्यु, मोहोंकी राशि, विविध तृष्णारूप दुःखोंसे रहित महत्वपूर्ण उस अप्राकृत देहमें अमृतत्वकी उक्ति सार्थक है. (९८)

कर्हिचिद् न भवेद् भूयः पर्यावर्त्तोऽस्य संसृतेः[१]।
[२]आम्रेडितं 'न स पुनरावर्त्तत' इति श्रुतौ[३]।।९९।।

१. ऐहिकजन्मादिकम् एव निषिद्धं न तु अवतारवद् ऐच्छिकं तद् इति भावः. २. द्विरुक्तम्. ३. छान्दोग्यान्ते.

भगवानके ऐसे भक्तके संसारकी पुनः आवृत्ति नहीं होती है, इसी सिद्धांतका प्रतिपादन करनेके हेतुसे छान्दोग्योपनिषद्के अन्तकी 'न स पुनरावर्तते' श्रुतिमें द्विरुक्ति हुई है. (९९)

''आब्रह्मभुवनाद् लोकाः[१] पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते'' ।।१००।।

भगवानने भी भक्तकी पुनरावृत्ति नहीं होती है, यह कहते हुए गीतामें कहा है कि– 'हे अर्जुन! ब्रह्मलोक पर्यन्त सभी लोकोसे पुनरावृत्ति होती है, परंतु हे कौन्तेय! मुझे प्राप्त करनेके बाद पुनर्जन्म नहीं होता है'(१.गीता.८।१६) (१००)

तत्सेवैकार्हयानन्दमय्या निर्दोषया तया[१]।
भगवद् रूपया तन्वा सेवा सिद्ध्यति सा सदा ।।१०१।।
निर्गुणा परमा[२] मुक्तिः इयम् एवाखिलाधिका।
यथैतद् आनन्दवल्ल्या तैत्तिरीये तथोच्यते ।।१०२।।

१. अलौकिक्या ब्रह्मरूपया. २. श्रुतौ ''अस्मान् लोकात् प्रेत्येति'' जीवन्मुक्ति–व्यावर्तनात्, परा.

भगवत्सेवा योग्य आनंदमय निर्दोष एवं भगवद्रूप उस देहसे सदा भगवत्सेवा सिद्ध होती है. यही परम मुक्ति तथा सर्वोत्कृष्ट फल है. तैत्तरीयके आनंदवल्ली प्रकरणमें भी यही कहा गया है. (१०२)

[1]''ब्रह्मविद् आप्नोति परम्। तद् एषाभ्युक्ता[2]। सत्यं[3] ज्ञानम् अनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सो अश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता इति''॥

१. अक्षरपुरुषोत्तमयोः ज्ञाता पुरुषोत्तमम् आप्नोति. २. पूर्वोक्तभि मुखीकृत्य व्याख्यानरूपैषा सत्यं ज्ञानम् इति ऋगुक्ता. ३. सच्चित्पूर्णं गणितानन्दं देशकाला-परिच्छिन्नम् अक्षरं तत्र निहितं परं च यो वेद स गुहायां हृदि आविर्भूते अक्षरधाम्नि पुरुषोत्तमेन सह कामान् उपभुङ्क्ते.

'ब्रह्मको जाननेवाला ब्रह्मको प्राप्त करता है.' पूर्वोक्त वचनके व्याख्यानके रूपमें ब्रह्मका लक्षण भी दिया गया है कि सत्य, ज्ञान तथा अनंतको ब्रह्म कहते है. सच्चित् रूपसे गणितानंद अक्षरमें निहित जो परब्रह्म हैं, उस हृदयरूपी गुहामें आविर्भूत पुरुषोत्तमके साथ उत्तम भक्ति द्वारा मुक्ति प्राप्त जीव सभी कामोंका भोग करते हैं.

इति मन्त्रेण सङ्क्षिप्य वर्णितं विस्तरात् पुनः।
समग्रोपनिषत् प्राह बहुनोक्तेन किं मम॥१०३॥

इस मंत्रमें संक्षिप्तमें वर्णन किया है तथा समग्र उपनिषद्ने विस्तारपूर्वक इस विषयका वर्णन किया है. इससे अधिक अब मैं क्या कहूं? (१०३)

यच्चरणाब्जनिशरणास्तत्करुणामन्दमकरन्दात्।
माद्यन्ति दैवमधुपाः स्वीये कृपयन्तु मयि निजाचार्याः॥१०४॥

निर्गुणमपि[1] गुणपूर्णं तूर्णं वरणाद्विधाय[2] शरणाप्तम्।
[3]तत्परवन्तं तनुते भगवन्तं भावदः स मे भूयात्॥१०५॥

१. सत्वादि प्राकृतरहितं ऐश्वर्यादि निजगुणपूर्णम्। २. अङ्गीकारात्. ३. निर्गुणीकृत भक्तस्य आधीनम्.

जिनके चरणकमलोंके आश्रित दैवीजनरूपी भ्रमर करुणाके अमन्द मधुसे मत्त रहते हैं, वे निजाचार्य अपने सेवकपर कृपा करते रहें. जो शरणागतको गुणहीन होते हुए भी शीघ्र अंगीकार मात्रसे गुणपूर्ण बनाकर भगवानको उसके

आधीन कर देते हैं, ऐसे निजाचार्य मुझे भावका दान करें. (१०४–१०५)

सिद्ध्यत्येतद् हरेरेवानुग्रहादेव केवलम् ।

न साधनान्तरं कर्तुं किञ्चिद् जीवेन शक्यते ।।१०६।।

भगवानकी ऐसी भक्ताधीनता मात्र उनके अनुग्रहसे ही सिद्ध हो पाती है. किसी भी अन्य साधनों द्वारा जीव भगवानकी भक्ति प्राप्त नहीं कर सकता. (१०६)

[1]''नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।

यमेवैष वृणुते[2] तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्''।।

१. कठमुण्डकयोः ३।२।३. २. स्वीयतया अङ्गीकरोति.

श्रुतियोंमें कहा गया है, 'इस आत्माको प्रवचन, मेधा, अनेक ज्ञानके वचनोंको सुननेसे भी प्राप्त नहीं किया जा सकता. यह आत्मा जिसका वरण करता है, वही उसे प्राप्त कर सकता है. अतः यह आत्मा स्वयं अपनी प्राप्ति करनेवालेका वरण करता है.'

[1]यस्मामतं तस्य मतं मतं यस्य न वेद सः'' ।

''नाहं[2] वेदैर् न तपसा''

[3]''न रोधयति मां योगो न साङ्ख्यं धर्म उद्धव'' ।

इत्यसाधनताम् आह साधनानां हरिः स्वयम् ।।१०७।।

१. तलवकारोपनिषदि. २. गीता.११।५३. ३. श्रीभाग.पु.१०।१२।१.

'जिनके स्वरूपका ज्ञान कोई प्राप्त नहीं कर पाता है, उनका ज्ञान उनकी इच्छा होनेपर ही प्राप्त होता है', 'मुझे वेद, ज्ञान, यज्ञ, तप आदि द्वारा जाना तथा देखा नहीं जा सकता है', 'मुझमें चित्तको स्थापित करना योग, सांख्य, तप आदि किसीभी साधन द्वारा संभव नहीं है'. इन सभी वचनोंमें स्वयं भगवानने ही अन्य सभी साधनोंकी निष्फलताका निरूपण किया है. अतः भगवद्अनुग्रह ही एकमात्र साधन है. (१०७)

सेवा तु साधनं तन्वाऽस्माभिर्यत्किञ्चिद् अर्पितम् ।

लौकिकं कृपया सेवात्वेन सोऽङ्गीकरोति चेत् ।।१०८ ।।

देह द्वारा की गई सेवा भी तब साधनरूप बनती है, जब जीवों द्वारा अर्पित लौकिक पदार्थोंका भगवान् कृपा करके अंगीकार करते हैं. भगवद्

अंगीकारके अभावमें तो वह भी निष्फल ही होगी. (१०८)

[१]**''किम् आसनं ते गरुडासनाय किं भूषणं कौस्तुभभूषणाय।**
लक्ष्मीकलत्राय किम् अस्ति देयं वागीश किं ते वचनीयम् अस्ति''।।१०९।।

१. मानसपूजास्थं वचनम् इदं निबन्धे धृतम्.

अनेक शास्त्रीय वचनोंमें भगवद्प्राप्ति तथा भगवानके लौकिक साधनोंसे गम्य होनेके विषयमें वर्णन किया गया है, यथा– 'गरूड जैसा आसन जिनका हो, उन्हें कौनसा आसन दिया जा सकता है? कौस्तुभमणि धारण करनेवाले भगवानको कौनसे आभूषण धराए जा सकते है? लक्ष्मी जिनकी पत्नी हो उन्हे क्या अर्पित किया जा सकता है? जो स्वयं वाणीके पति हैं, उनके लिए किन वचनोंका प्रयोग किया जा सकता है?' (१०९)

[१]**विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयम् अनुवर्त्तिनीं भवान्।**
योगिनामप्यलभ्यस्य सर्वेशस्य परस्य हि।
आत्मपूर्णस्य लाभाय दीनानुग्राहिणः श्रुतौ।।११०।।

'ऋषियोंने स्तुति कीः हे भगवान्! आपकी लीला निराली है. अन्य लोग वैभवके लिए तरसते हुए जिन लक्ष्मीजीका भजन करते हैं, वे स्वयं आपकी सेवा करते हैं; तथापि आपका उनके प्रति कोइ आग्रह नहीं है' 'योगियोंको भी जो सर्वेश्वर भगवान लभ्य नहीं है, वे दैन्यपूर्वक आत्मसमर्पण करनेवालोंको प्राप्त होते है, ऐसा सुना है'(१. भाग.पुरा.४।७।३४) (११०)

सुगमं साधनं प्रोक्तं सर्वथा शरणागतिः।
[१]तस्यैवाकैतवोपाधि स्वसर्वस्वनिवेदनम्।।१११।।

[२]**''यो ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गोपायति कृष्णः।**
यस्तं देवम् आत्मवृत्तिप्रकाशं मुमुक्षुर्वै शरणम् अनुव्रजेत्''।।११२।।

१. भगवत एव शरणागतिः. २. गोपालपूर्वतापनीये.

सर्वेश्वर, सर्वपर, स्वतस्तृप्त योगियोंके लिए दुर्लभ, दीनदयाल प्रभुकी प्राप्तिका सुगम साधन श्रुतिमें सर्वत्र शरणागतिको ही कहा है. उन्हीं भगवानको निष्कपट निष्कामभावसे अपने सर्वस्वका निवेदन करें. गोपालतापनी एवं श्वेताश्वतर उपनिषदमें भी कहा है कि, 'जिन्होंने अपने गोप्यस्वरूपको विद्या देकर ब्रह्माजीके सामने प्रकट किया, जो देव स्वयं आत्मवृत्तिसे ही प्रकाशित होते

है, मोक्षकी कामनावाले उन्हींकी शरणमें जाते है.' (११२)

''[1]श्रीकृष्णो वै परमं दैवतम्'

[2]'मुमुक्षुर्वै शरणम् अहं प्रपद्ये'।

[3]'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः'।।११३।।

१. आरम्भेऽपि. २. श्वेताश्वरादौ. ३. श्रीमद् भगवतद्गीतायाम्.

आरंभमें कहा है कि, 'श्रीकृष्ण परम देव हैं. मोक्षकी इच्छावाला मैं उन्हींकी शरणमें जाता हुं.' भगवान स्वयं भी शरणागत जीवके प्रति अपने भावोंका कथन करते हुए आज्ञा करते हैं – 'सभी धर्मोंका त्याग करके तु मेरी शरणमें आजा. मैं तुझे सभी पापोंसे मुक्त करके तुझे मुक्त कर दूंगा. (११३)

'तस्मात् त्वम् उद्धवोत्सृज्य चोदनां प्रतिचोदनाम्।

प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च।।११४।।

मामेकमेव शरणम् आत्मानं सर्वदेहिनाम्।

याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयम्'।।११५।।

